| अधिमुक्तिः | ※ श्रद्धाः । | ।।यो.बिं. २४९टी।। |
| अधिमुक्त्याशयः | ※ आप्तश्रद्धारुपः । | ।।यो.बिं. २९४टी।। |
| अधृतिः | ※ क्वचित् क्षेत्रादौ तद्वियोगबुद्धिः । | ।।उप.मा.(सि.) ३१९ टी।। |
| अधैर्यम् | ※ विपत्स्वस्थैर्यम् । | ।।अ.सा.द्वि. ५१टी।। |
| अध्यक्षम् | ※ प्रत्यक्षप्रमाणम् । | ।।अ.सा.च. ९५टी।। |
| अध्यवसानम् | ※ सुनिश्चितध्येयस्वरुपगतज्ञानादिरुपजीवपरिणामः । | ।।अ.सा.पं. ८४टी।। |
| अध्यात्मचिंतकाः | ※ भावयोगयः । | ।।यो.बिं. ४०४टी।। |
| अध्यात्मम् | ※ गतमोहाधिकाराणामात्मानमधिकृत्य या ।<br>प्रवर्तते क्रिया शुद्धा तदध्यात्मं जगु-र्जिनाः ।।२६।। | ।।अ.सा.प्र.।। |
| | ※ आत्मानमधिकृत्य भवतीत्यध्यात्मं शुद्धात्मस्वरुपश्रवणमनननिदिध्या-सनरुपमिति यावत् । | ।।अ.सा.प्र. ६टी।। |
| | ※ सज्ज्ञानक्रियात्मकात्मानुयायिनी परिणतिः । | ।।अ.सा.द्वि. ९१टी।। |
| - | ※ ज्ञानक्रियाशुद्धिरुपप्रोज्वलमनःपरिणतिमयम् । | ।।अ.सा.पं. १३१टी।। |
| | ※ उचितप्रवृत्तेर्व्रतभृतो मैत्र्यादिभावगर्भं शास्त्राज्जीवादितत्त्वचिन्तनम् । | ।।यो.विं. ३टी।। |
| | मैत्र्यादिसारमऽध्यात्मं तद्विदो विदुः ।<br>औचित्याद् वृत्तयुक्तस्य, वचनात्तत्त्वचिन्तनम्। ।।३५८ ।। | ।।यो.बिं. ।। |
| | ※ परमार्थभावनारुपम् । | ।।यो.बिं. ३७९टी।। |
| अध्यासः | ※ अतस्मिन् तद्बुद्ध्यारोपः । | ।।अ.सा.च. ११२टी।। |
| अनध्यवसायः | ※ विधीयमानानुष्ठानोचिताध्यवसायाभावः। | ।।यो.बिं. १५१टी।। |
| अनध्यवसायी | ※ न विद्यतेऽध्यवसायो लक्ष्ये लक्ष्यतारुपशुभपरिणतिर्यस्य स शून्यहृदयः । | ।।अ.सा.तृ. ६४टी।। |
| अनध्यवसितम् | ※ शून्यमनसाऽज्ञातमनुपलक्षितम् । | ।।अ.सा.तृ. ६६टी।। |
| अननुगामुकं(अवधिज्ञानम्) | ※ यत्र क्षेत्रे स्थितस्योत्पन्नं ततः प्रच्युतस्य प्रतिपतति, प्रश्नादेशपुरुषज्ञानवत् । | ।।हित. ९१टी।। |
| अननुष्ठानम् | ※ न अनुष्ठानं धर्मसेवनमननुष्ठानं यदोघसंज्ञानुगतं तदननुष्ठानमुच्यते । | ।।अ.सा.तृ. ५८टी।। |
| | ※ प्रणिधानाद्यभावेन कर्मानध्यवसायिनः ।<br>संमूर्च्छिमप्रवृत्ताभमननुष्ठानमुच्यते ।।६४।। | ।।अ.सा.तृ.।। |
| | ※ अनाभोगवतश्चैतदऽननुष्ठानमुच्यते ।<br>सम्प्रमुग्धं मनोऽस्येति ततश्चैतद्यथोदितम् ।। १५८ ।। | ।।यो.बिं. ।। |
| अनन्तम् | ※ नास्यान्तो विद्यते इत्यनन्तं, केवलात्मनोऽनन्तत्वात् । | ।।ल.वि. सिव-मयल व्या.।। |
| अनन्यदेवतः | ※ न विद्यतेऽन्या भगवद्व्यतिरिक्ता देवता यस्य । सोऽनन्यदेवतः | ।।उप.मा.(सि.) २३१ टी।। |
| अनन्यविकृतम् | ※ नास्त्यन्यकृतो विकारो यस्मिन् तन्निर्विकारं रुपमात्मसौन्दर्यं स्वभावो वा । | ।।अ.सा.ष. ८४टी।। |
| अनपेक्षितगुरुलाघवम् | ※ गुरुःनिश्चयनयः, तदितरो लघुः, तयो-र्भावो 'गुरुलाघवं । सद्भूतार्थविषयः | |

| शब्दाः | उपनिषद् | ग्रन्थाः |
|---|---|---|
| | सम्यक्स्तवः,गुरुपक्षश्च तत्राश्रयितुं युक्तो, नेतरः, इति तत्त्वपक्षोपेक्षणात् अनपेक्षितं गुरुलाघवं यत्र तद्यथा भवतीति । यद्वा गुणदोषविषयं गुरुलाघवमपेक्ष्य प्रेक्षावतोऽपि क्वचिद् व्यवहारत-स्तत्त्वोप्लम्भशून्या प्रवृत्तिः स्यात् तत् अनपेक्षितगुरुलाघवम् । | ।।ल.वि. लोगपईवाणं व्या.।। |
| अनर्थः | ✻ अहितोऽनिच्छाविषयोऽनादेयत्वात् । | ।।अ.सा.च. ५७टी।। |
| अनर्थदण्डः | ✻ निष्फलपापारम्भप्रवृत्तिः । | ।।ध.र. ४१टी।। |
| अनर्थदण्डः | ✻ जं इंदियसयणाई, पडुच्च पावं करेज्ज सो होइ ।<br>अत्थे दंडे इत्तो, अन्नो उ अणत्थदंडो य ।।९८।। | ।।संबोध.प्र.श्राव.प्र.अधि.।। |
| अनवस्था | ✻ मर्यादाहानिः । | ।।ध.र. १३३टी।। |
| अनवस्थितं(अवधिज्ञानम्) | ✻ पुनः पुनर्वर्द्धते हीयते च हीयते वर्द्धते च, प्रतिपतति चोत्पद्यते च सलिलोर्म्मिवत् । | ।।हित. ९१टी।। |
| अनवास्थाप्यता | ✻ दुष्टपरिणामस्याकृततपोविशेषस्य व्रतानामारोपणम् । तपःकर्म्म चास्योत्थान-निषदनादिकर्म्मकरणाशक्तिपर्यन्तम् । एतावति तपसि कृते तस्योत्थापना विधीयते । | ।।हित. १९०टी।। |
| अनशनम् | ✻ अशनमाऽऽहारस्तत्परिहारोऽनशनम् । तच्च नमस्कारसहितादि षण्मासान्तं-श्रीमन्महावीरतीर्थे, प्रथमजिनतीर्थे तु संवत्सरपर्यन्तम्, मध्यमतीर्थकृत्ती-र्थेष्वष्टौ मासान् यावत्, इदमित्वरम् यावत्कथितं तु भक्तप्रत्याख्यान-इङ्गिनीपादपोपगमरुपम् । केवलमिङ्गिनी सचेष्टस्य, पादपोपगमं तु निरुद्धबाह्यचेष्टस्य । | ।।हित. १८९टी।। |
| अनाकारम् | ✻ सामान्यग्रहणपरिणामवत् । | ।।ल.वि. सव्वन्नूणं व्या.।। |
| अनादर आशातना | ✻ जारिसतारिसवेसो, जहा तहा जम्मि तम्मि कालम्मि ।<br>पूयाइ कुणइ सुण्णो, अणायरासायणा एसा ।।८२।। | ।।संबोध.प्र.देव.अधि.।। |
| अनादिनिधने | ✻ आदिः आरम्भदिनम्, निधनं-विनाशावसरः, न विद्येते आदिनिधने यस्य स तथा । | ।।हित. ७टी।। |
| अनाभिग्रहिकं(मिथ्यात्वम्) | ✻ प्राकृतलोकानां सर्वे देवा वन्दनीया नावन्दनीयाः, एवं सर्वे गुरवः, सर्वे धर्म्मा इति । | ।।हित. १५टी।। |
| अनाभोगः | ✻ भवस्वरुपानिर्णायको योऽनाभोग उपयोगाभावः । | ।।यो.बिं. १८२टी।। |
| | ✻ क्रियास्वनुपयोगः । | ।।अ.सा.तृ. ७३टी।। |
| अनाभोगद्रव्यस्तव | ✻ पूयाविहिविरहाओ अपरिन्नाणाओ जिणगयगुणाणं ।<br>सुहपरिणामकयत्ता, एसो णाभोगदव्वथओ ।।२०८।। | ।।संबोध.प्र.देव.अधि.।। |
| अनाभोगिक(मिथ्यात्वम्) | ✻ विचारशून्यस्यैकेन्द्रियादेर्वा विशेषज्ञानविकलस्य स्यादिति । | ।।हित. १५टी।। |
| अनायतनम् | ✻ दंसणनिब्भेयणि या चरित्तनिब्भेयणी य अणवरयं ।<br>जत्थ पयट्टइ विगहा तमणाययणं महापावं ।। २ ।। | ।।ध.र. ३७टी।। |
| अनिकाचिता | ✻ स्पृष्टाद्यवस्थास्थिताः । | ।।हित. १९४टी।। |
| अनियतः | ✻ मासकल्पादिविहारी । | ।।उप.मा.(सि.)३८८ टी।। |
| अनिष्टपथः | ✻ अनिष्टः संसारः पथो मार्गः, संसारस्य मार्गोऽनिष्टपथः । | ।।उप.मा.(सि.) ३२७ टी।। |

| शब्दाः | उपनिषद् | ग्रन्थाः |
|---|---|---|
| अनुकंपा | * दुःखिष्वप्राप्तधर्मेषु च द्रव्यतो भावतश्च क्रमेण दया । | ।।अ.सा.च. ५८टी।। |
| | * द्रव्यतो दुःखितस्य दुःखप्रतीकारकरणे भावतश्च अप्राप्तधर्मस्य धर्मप्रापणे करुणा । | ।।अ.सा.तृ. ९०टी।। |
| | * द्रव्यतो भावतश्च यथाशक्ति दुःखितदुःखपरिहारेच्छा । | ।।यो.विं. ८टी।। |
| अनुकम्पादानम् | * दीणाणमणाहाण य बंधवरहियाण वाहिविहुराण<br>चारयपडियाण विएसियाण वसणावलीढाणं ।। ६८ ।।<br>अंधाण य पंगूण य कुणीण खुज्जाण वामणाणं च<br>बालाण य वुड्ढाण य छुहियाण पिवासियाणं च ।। ६९ ।।<br>एवंविहाण पाणीण दिंती करुणामहन्नवा जमिह ।<br>तं अणुकंपादाणं भन्नइ सन्नाणसालीहिं ।। ७० ।। | ।।हित.।। |
| अनुचिंतनम् | * मनसैवाविस्मरणनिमित्तं सूत्राद्यनुस्मरणम् । | ।।हित. ४८५टी।। |
| अनुचितकारी | * विरुद्धप्रवृत्तिमान् । | ।।ल.वि. प्रस्तावना।। |
| अनुचितवृत्ति-आशातना | * धरणरणरुयणविगहा, तिरिबंधणरंधणाइगिहकिरिया ।<br>गालीविज्ञवणिज्जाइ चेइए चयणुचियवित्ती ।।८५।। | ।।संबोध.प्र.देव.अधि.।। |
| अनुचिन्तनम् | * सूक्ष्मार्थानां मनसा आलोचनम् । | ।।अ.सा.पं. ११४टी।। |
| अनुप्रेक्षा | * अनित्यतादिचिन्तनरुपा ध्यानोत्तरकालीनभावना भवति । | ।।अ.सा.पं. ८४टी।। |
| | * तत्त्वार्थानुचिन्ता । इयमप्यत्र ज्ञानावरणीयकर्म्मक्षयोपशमसमुद्भवोऽनु-<br>भूतार्थाभ्यासभेदः परमसंवेगहेतुः तद्दार्ढ्यविधायी, उत्तरोत्तरविशेषसम्प्रत्य-<br>याकारः केवलालोकोन्मुखश्चित्तधर्म्मः । अनुप्रेक्षानलोऽप्यात्मरत्नमुपसंप्राप्तः<br>कर्ममलं दग्ध्वा कैवल्यमापादयति तथातत्स्वभावत्वादिति । | ।।ल.वि. अरिहंत चेइ. व्या.।। |
| अनुबंधः | * उत्तरत्रानुवृत्तिलक्षणः । | ।।यो.बिं. २११टी।। |
| अनुबन्धकर्म | * अनुबन्धेनात्मस्वरुपानुकूलेन शान्तवृत्त्या तत्त्वानुगतं तपःशीलशुभध्यानादि-<br>करणमनुबन्धकर्म अनुबंधक्रिया । | ।।अ.सा.प्र. ४६टी।। |
| अनुबन्धानुष्ठानम् | * तृतीयमप्यदः किं तु, तत्त्वसंवेदनानुगम् ।<br>प्रशान्तवृत्त्या सर्वत्र, दृढमौत्सुक्यवर्जितम् ।।२१४ ।। | ।।यो.बिं.।। |
| अनुभवः | * लोकप्रतीतिरुपः । | ।।यो.बिं. ५०२टी।। |
| | * सर्वस्य स्वप्रत्यक्षवेदनाज्ज्ञानम् । | ।।अ.सा.च. ३९टी।। |
| | * अभ्रान्तयथार्थवस्तुस्वरुपग्राहिप्रमाणजं ज्ञानम् । | ।।अ.सा.स. १टी।। |
| | * तत्तज्ज्ञानवृत्तिः । | ।।ल.वि. जिणा.जाव. व्या.।। |
| अनुमा | * अनु लिंगदर्शनतः पश्चात् मा लिंगिज्ञानं अनुमा व्याप्तिविशिष्टपक्षधर्म-<br>ताज्ञानजन्यं ज्ञानं, यथा धूमज्ञानानन्तरं पर्वतो वह्निमानिति ज्ञानम् । | ।।अ.सा.च. ९४टी।। |
| | अनुमानज्ञानम् । | ।।अ.सा.च. ९५टी।। |
| अनुमानम् | * तथोपपत्त्यऽन्यथानुपपत्तिरुपम् । | ।।यो.बिं. ४१२टी।। |
| | * लिङ्गाल्लिङ्गज्ञानम् । | ।।यो. दृ. १०१टी।। |
| | * लिंगिज्ञानप्रमाणम् । | ।।अ.सा.पं. ७४टी।। |
| अनुयोगी | * अनुरुपो ज्ञानादिभिः सह योगः सम्बनधोऽनुयोगः ।<br>सोऽस्याऽस्तीत्यनुयोगी । | ।।उप.मा.(सि.)३८८ टी।। |

| शब्दाः | | उपनिषद् | ग्रन्थाः |
|---|---|---|---|
| अनुरागः | * | प्रीतिप्रकर्षः । | ।।ध.र. १२५टी।। |
| अनुवृत्तिः | * | व्याप्तिरन्वयोऽनादिप्रवाहेण या या वर्तना स्वस्मिन् संबंधवतीति यावत् । | ।।अ.सा.द्वि. ६०टी।। |
| अनुशयम् | * | क्रोधानुबन्धम् । | ।।उप.मा.(सि.)७५ टी।। |
| अनुषंगोपनता | * | अनुषंगोऽन्यस्योद्देशेऽनिच्छितस्येतरस्य निष्पत्तिः । | ।।अ.सा.द्वि. १०३टी।। |
| अनुष्ठानम् | * | नक्तन्दिनविभागव्यवस्थापितक्रियाकलापरुपम् । | ।।हित. ३९८टी।। |
| | * | परब्रह्मप्राप्त्युपायसेवनम् । | ।।अ.सा.तृ. ७६टी।। |
| | * | अलुप्तवीर्याचारेण विहीतम् । | ।।हित. ३९८टी।। |
| अनुस्रोतः | * | इन्द्रियकषायानुकूला वृत्तिरनुस्रोतस्तत्प्रतिकूला तु प्रतिस्रोतः । | ।।यो.बिं. २०२टी।। |
| अनेकाग्रता | * | चित्तविसंस्थुलता । | ।।उप.मा.(सि.)३१८ टी।। |
| अन्तःकरणरत्नम् | * | अन्तःकरणं मनः तदेव रत्नं, तस्य चिन्तारत्नादिभ्योऽप्यऽतिशायितत्वात् । | ।।यो.बिं. २२९टी।। |
| अन्तरात्मा | * | निर्गतदेहादिप्रतिबन्धसाक्षिधरत्वमात्रवृत्तिः । | ।।अ.सा.स. २०टी।। |
| | * | धर्मार्थीभूतान्तरंगवृत्तिः । | ।।अ.सा.च. २१टी।। |
| | * | कायादीनां योऽधिष्ठाता कृताकृतदर्शकः । | ।।अ.सा.स. २१टी।। |
| अन्यथाबुद्धिः | * | अतथाज्ञानम् । | ।।अ.सा.च. ११२टी।। |
| अन्यसंयोगयोग्यता | * | अन्येन कर्मणा सह यो जीवस्य संयोगस्तस्माज्जाताऽन्यसंयोगयोग्यता भवमाता । | ।।यो.बि. ४०६टी।। |
| अन्वयसंपत्तिः | * | अविच्छेदभावः । | ।।यो.विं १टी।। |
| अन्वयि | * | ध्रौव्यसत्तारुपेण सर्वकालं संबद्धम् । | ।।अ.सा.ष. २३टी।। |
| अपक्षपातभावः | * | माध्यस्थ्यसुस्थचेतः । | ।।ध.र. २३टी।। |
| अपवादः | * | विशेषभणितः । | ।।ध.र. ५२टी।। |
| | * | द्रव्याद्यपेक्षम् (अनुष्ठानम्) । | ।।उप.मा.(सि.)२१८ टी।। |
| | * | कारणिको विशेषविधिः । | ।।अ.सा.द्वि. ३५टी।। |
| | * | विशेषः कारणिकः । | ।।अ.सा.द्वि. ७१टी।। |
| | * | कारणविशेषे समाचरणीयो मार्गः । | ।।अ.सा.पं. १३०टी।। |
| | * | सूत्राबाधया गुरुलाघवालोचनपरोऽधिकदोषनिवृत्त्या शुभः शुभानुबन्धी महासत्त्वाऽऽसेवित उत्सर्गभेद एव, न तु सूत्रबाधया गुरुलाघवचिन्ताऽभावेनाहितमऽहितानुबन्ध्यऽसमंजसं परमगुरुलाघवकारि क्षुद्रसत्त्वविजृम्भितमिति । | ।।ल.वि. प्रस्तावना।। |
| | * | विशेषरुपम् । | ।।हित. ४०४टी।। |
| अपवादसूत्र-दृष्टांतम् | * | न या लभेज्जा निउणं सहायं गुणाहियं वा गुणओ समं वा ।<br>एक्कोवि पावाइं विवज्जयंतो विहरेज्ज कामेसु असज्जमाणो ।।६।। | ।।ध.र. १०६टी।। |
| अपहसनम् | | उत्प्रासनम्। | ।।उप.मा.(सि.)३१६ टी।। |
| अपायः | * | अवगृहीते विषये सम्यगसम्यगितिगुणदोषविचारणाऽध्यवसायेऽपनोदोऽपायः। | ।।हित. ८०टी।। |
| अपायम् | * | अपायमाहुःकर्मैव, नापरं किञ्चित् । | ।।यो.बिं. ३७३ टी ।। |
| अपायविचयधर्मध्यानम् | * | रागद्दोसकसायासवाइकिरियासु वट्टमाणाणं ।<br>इहपरलोगावाए, झाइज्जा वज्जपरिवज्जी ।।५४।। | ।।संबोध.प्र.ध्यान अधि.।। |

| शब्दाः | | उपनिषद् | ग्रन्थाः |
|---|---|---|---|
| **अपायविचयध्यानम्** | ※ | रागद्वेषकषायादिपीडितानां जनुष्मताम् । | |
| | | ऐहिकामुष्मिकांस्तांस्तान्नानापायान् ॥१२०॥ | ॥अ.सा.पं.॥ |
| **अपायविचयम्** | ※ | अपाया ज्ञानादिविनाशहेतुभूता रागादस्तेषां कष्टहेतुत्वेन निर्धारणं अपायविचयम् । | ॥अ.सा.पं. ११८टी॥ |
| **अपायाः** | ※ | नाऽर्थ्यन्ते न काम्यन्ते ये दारिद्र्यक्षुद्रोपद्रवादयोऽपायाः । | ॥ध.र. २टी॥ |
| **अपार्थकः** | ※ | अपगतपरमार्थप्रयोजनः । | ॥यो.बिं. ३०६टी॥ |
| **अपुनर्बंधकः** | ※ | न पुनर्भूयस्तीव्राध्यवसायेन पापकर्म बध्नाति यः स तथा । | ॥अ.सा.प्र. ३९टी॥ |
| | ※ | पावं न तिव्वभावा कुणइ, ण बहुमण्णई भवं घोरं । | |
| | | उचियट्ठिइं च सेवइ, सव्वत्थ वि अपुणबंधोत्ति ॥ १३ ॥ | ॥यो.श.॥ |
| | ※ | य इह परिणामादि भेदादऽपुनर्बन्धकत्वेन तांस्तान् कर्मपुद्गलान् बध्नाति | |
| | | स तत्क्रियाविष्टोऽप्यऽपुनर्बन्धक उत्कृष्टस्थितेः । | ॥यो.श. ९टी॥ |
| | ※ | आदिधार्म्मिकः । | ॥ल.वि. प्रणिधान सूत्रम्॥ |
| | ※ | ये सत्त्वा उत्कृष्टां कर्मस्थितिं तथा अपुनर्बन्धकत्त्वेन | |
| | | क्षपयन्ति ते खल्वऽपुनर्बन्धकाः। | ॥पंच सू.- पं.सू.टी॥ |
| **अपुनर्बंधकादिभूमिका** | ※ | तत्तद्धर्मस्थानयोग्यतारुपा । | ॥यो.श. २४टी॥ |
| **अपूर्वकरणम्** | ※ | अपूर्वपरिणामः शुभोऽनादावपि भवे तेषु तेषु धर्मस्थानेषु वर्तमानस्य तथा- | |
| | | ऽसंजातपूर्वो ग्रंन्थिभेदादिफल उच्यते । | ॥यो. दृ. १०टी॥ |
| | ※ | अपूर्वपरिणामः शुभोऽनादावपि भवे तेषु तेषु धर्मस्थानेषु वर्तमानस्य | |
| | | तथाऽसंजातपूर्वो ग्रन्थिभेदादिफल उच्यते । | ॥ल.वि. नमुत्थुणं व्या.॥ |
| **अपेक्षा** | ※ | इहलोकपरलोकफलस्पृहा । | ॥यो.बिं. १५५टी॥ |
| **अपोहः** | ※ | उक्तियुक्तिभ्यां विरुद्धादर्थात्प्रत्यपायसम्भावनया व्यावर्तनम् विशेषज्ञानम् । | ॥ल.वि. सरणदयाणं व्या.॥ |
| **अप्रज्ञाप्याः** | ※ | रक्तद्विष्टादयः । | ॥यो.बिं. ४०२टी॥ |
| **अप्रतिपाति** | ※ | प्रतिपतनं हि स्वरुपात् प्रच्यवनम्, तन्न विद्यते यस्य तदप्रतिपाति । | ॥हित. ९८टी॥ |
| **अप्रतिबद्धः** | ※ | द्रव्यक्षेत्रकालभावप्रतिबन्धवन्ध्यः । | ॥हित. ४६३टी॥ |
| **अप्रतिस्रावी** | ※ | निश्छिद्रशैलभाजनवत् परकथितात्मगुह्यजलाऽप्रतिस्रवणशीलः । | ॥उप.मा.(सि.)११ टी॥ |
| **अप्रत्ययानुग्रहबोधतन्त्राः** | ※ | अप्रत्ययो = हेतुनिरपेक्षात्मलाभत्वेन महेशः, तस्य | |
| | | अनुग्रहो = बोधयोग्यस्वरुपसम्पादनलक्षण उपकारस्तेन | |
| | | बोधः = सदसत्प्रवृत्तिनिवृत्तिहेतु-र्ज्ञानविशेषस्ततप्रधान- | |
| | | स्तन्त्र = आगमो येषां ते तथा सदाशिववादिन ईश्वरकारणिकाः । | ॥ल.वि. सयं संबुद्धाणं व्या.॥ |
| **अप्रमतः** | ※ | मिथ्यात्वादिसकलप्रमादवर्जितः । | ॥अ.सा.च. ५१टी॥ |
| | ※ | न प्रमत्तः कर्तव्ये कर्तव्यबुद्धियुक्तः सदा सावधानोऽप्रमत्तः । | ॥अ.सा.पं. ७टी॥ |
| | ※ | न प्रमत्तोऽप्रमत्तस्त्यक्तरागादिसर्वप्रमादः । | ॥अ.सा.पं. ८२टी॥ |
| **अप्रमादः** | ※ | अशैथिल्यम् । | ॥ध.र. ७९टी॥ |
| | ※ | अकर्तव्येऽकर्तव्यधीः कर्तव्ये च कर्तव्यधीः सावधनतेति यावत् । | ॥अ.सा.च. ५२टी॥ |
| **अप्रमादिः** | ※ | विकथादिप्रमादरहितोऽप्रमादिः । | ॥यो.दृ. ४टी॥ |

| शब्दाः | उपनिषद् | ग्रन्थाः |
|---|---|---|
| अब्रह्मवर्जनप्रतिमा | * असिणाण वियडभोई, मोलियडो दिवसबंभयारी य ।<br>रत्तिपरिमाणकडो, पडिमावज्जेसु दिवसेसु ।।९९।।<br>एवं किरियाजुत्तो, बंभं वज्जेइ नवरि राइं पि ।<br>छम्मासावहि नियमा, एसा हु अबंभपडिमत्ति ।।१००।।<br>सिंगारकहविभूसुक्करिसं इत्थीकहं च वज्जंतो ।<br>चयइ अबंभमेगंतओ य छट्टीइ छम्मासे ।।१०१।। | ।।संबोध.प्र.श्राव.प्र.अधि.।। |
| अभयम् | * विशिष्टमात्मनः स्वास्थ्यम्, निःश्रेयसधर्म्मभूमिका<br>(बीजभूतो मार्गबहुमानादिर्गुणः) निबन्धनभूता धृतिरित्यर्थः । | ।।ल.वि. अभयदयाणं व्या.।। |
| अभिगमनम् | * काले तद्(गुरु) अभिमुखं यानम् । | ।।उप.मा.(सि.) १५ टी।। |
| अभिगमनरुचिः | * योऽङ्गोपाङ्गादिरूपं सूत्रमधीयमानः तत्त्वाभिलाषी जातः सोऽभिगमनरुचिः । | ।।अ.सा.च. ७टी।। |
| अभिग्रहमतिकः | * अभिग्रहा द्रव्यादिषु नानारुपा नियमाः, तेषु स्वपरविषये मतिस्तद्ग्रहणग्रहण-<br>परिणामो यस्याऽसौ अभिग्रहमतिकः । | ।।उप.मा.(सि.)११ टी।। |
| अभिधेयः | * अभिधानविषयभावपरिणतिमान् । | ।।ल.वि. पुरिस. गंध. व्या.।। |
| अभिन्नसूत्रचारी | * अभिन्नम् अविवृतार्थम् यत् सूत्रं विशिष्टव्याख्यानरहितं सूत्रमात्रमित्यर्थः ।<br>तेन चरितुं तदनुसारेणानुष्ठानं कर्तुं धर्मो यस्य सोऽभिन्नसूत्रचारी । | ।।उप.मा.(सि.) ४१५ टी।। |
| अभियोगः | * आज्ञादानम् । | ।।ध.र. ४१टी।। |
| अभिसन्धिः | * तथाविधाशयलक्षणः । | ।।यो. दृ. ११८टी।। |
| अभ्युत्थानम् | * सम्मुखमुत्थानम् । | ।।हित. २१६टी।। |
| अमरणमरणावन्ध्यबीज -योग | * चरममरणावन्ध्यकारणसम्यक्त्वादियोगः । | ।।पंच सू-तृ.सू.टी।। |
| अमाघातः | * अमारिः। मा लक्ष्मीः सा चेह प्राणरुपा ततस्तस्या घातो हननं तस्याऽभावो-<br>ऽमाघातः। | ।।उप.मा.(सि.)२६९ टी।। |
| अमूर्त्तत्वम् | * रुपादिरहितत्वम् । | ।।ल.वि. पुरिस.पुण्ड. व्या.।। |
| अमृतम् | * मोक्षः । | ।।हित. १७टी।। |
| अमृतानुष्ठानम् | * जिनोदितमिति त्वाऽऽहु-र्भावसारमऽदः पुनः ।<br>संवेगगर्भमऽत्यन्तमऽमृतं मुनिपुङ्गवाः ।। १६० ।। | ।।यो.बिं. ।। |
| | * अमृतमिव यज्जन्मादिरोगहरं परं प्रकृष्टं सूत्रानुसारेण विधिशुद्धं मोक्षार्थिभिः<br>क्रियते तदमृतानुष्ठानमुच्यते । | ।।अ.सा.तृ. ५८टी।। |
| | * सहजो भावधर्मो हि शुद्धश्चन्दनगन्दवत् ।<br>एतद्गर्भमनुष्ठानममृतं संप्रचक्षते ।।८१।।<br>जैनीमाज्ञां पुरस्कृत्य प्रवृत्तं चित्तशुद्धितः ।<br>संवेगगर्भमत्यन्तममृतं तद्विदो विदुः ।।८२।।<br>शास्त्रार्थालोचनं सम्यक् प्रणिधानं च कर्मणि ।<br>कालाद्यंगाविपर्यासोऽमृतानुष्ठानलक्षणम् ।।८३।। | ।।अ.सा.तृ.।। |
| अयोगता | * शैलेष्यऽवस्थारुपा । | ।।यो.श. ९२टी।। |

| शब्दाः | उपनिषद् | ग्रन्थाः |
|---|---|---|
| **अयोगियोगः** | ※ अयोगिव्यापारो विपरीतोपदेशादिः अत्यन्तविपाकदारुणो ज्ञेयः । | ।।यो.श. ३७टी।। |
| **अरतिः** | ※ गाढं चित्तोद्वेगः । | ।।उप.मा.(सि.) ३१८ टी।। |
| **अरतिविनोदम्** | ※ परितापप्रेरणम् । | ।।उप.मा.(सि.) ४६१ टी।। |
| **अरमन्तिका** | ※ धर्मध्यानवैमुख्यम् । | ।।उप.मा.(सि.) ३१८ टी।। |
| **अरुजम्** | ※ रुजाशब्देन व्याधिवेदनाभिधानं, ततश्चाविद्यमानरुजमरुजम्, तन्निबन्धनयोः शरीरमानसोरभावात् । | ।।ल.वि. सिव-मयल व्या.।। |
| **अरुहाः** | ※ न रोहन्ति न भवाङ्कुरोदयमाऽऽसादयन्ति, कर्मबीजाभावादिति अरुहाः (अरिहंताः) । | ।।पंच सू-प्र.सू.टी।। |
| **अर्थः** | ※ उपदेशपदप्रसिद्धपदवाक्यमहावाक्यैदंपर्याऽर्थपरिशुद्धज्ञानम् । | ।।यो.विं ११टी।। |
| | ※ अर्थशब्दस्यागमवचनत्वाद् अर्थ्यतेऽनेन तत्वम् इति कृत्वा । | ।।यो. दृ. ३टी।। |
| | ※ सूत्राभिधेयः । | ।।ध.र. ५२टी।। |
| | ※ वस्तुविचारः । | ।।ध.र. १०१टी।। |
| | ※ विवेकविकलै- र्याच्यते इत्यर्थो हिरण्यादिः । | ।।उप.मा.(सि.) ५० टी।। |
| | ※ साध्यरुपसद्वस्तु । | ।।अ.सा.च. ५७टी।। |
| | ※ आगमवचनः, अथ्येतेऽनेन तत्त्वमिति कृत्वा । | ।।ल.वि. नमुत्थुणं व्या.।। |
| **अर्थक्रिया** | ※ स्थित्युत्पादलयरुपा । | ।।अ.सा.च. ९८टी।। |
| **अर्थम्** | ※ वस्तुसद्भावम् । | ।।अ.सा.च. १५७टी।। |
| **अर्थी** | ※ धर्माधिकारी प्रस्तावात्तदभिलाषातिरेकवान् । | ।।ल.वि. प्रस्तावना।। |
| **अर्हन्** | ※ सुरेन्द्रादिकृतपूजां ज्ञानादिसकलैश्वर्यं चार्हतीत्यर्हन् जिनेश्वरः । | ।।अ.सा.पं. ६९टी।। |
| **अर्हन्तः** | ※ अशोकाद्यऽष्टमहाप्रातिहार्यलक्षणां पूजामऽर्हन्तीत्यऽर्हन्तः । | ।।पंच सू.- प्र.सू.टी।। |
| | ※ अशोकादिपूजामर्हन्तीत्यर्हन्तः । | ।।उप.मा.(सि.)४४८ टी।। |
| | ※ अशोकाद्यष्टमहाप्रातिहार्यादिरुपां पूजामर्हन्तीत्यर्हन्तः तीर्थकराः । | ।।ल.वि. अरिहंत चेइ. व्या.।। |
| **अल्पभवता** | ※ अल्पः = पुद्गलपरावर्तादारतो भवः = संसारो यस्य तद्भावोऽल्पभवता । | ।।ल.वि. नमुत्थुणं व्या.।। |
| **अल्पार्थना** | ※ अतितुच्छलब्ध्यादिस्पृहणा । | ।।यो.बिं. १५६टी।। |
| **अवगतम्** | ※ सम्यगऽवबुद्धम् । | ।।ध.र. ९६टी।। |
| **अवग्रहः** | ※ अव्यक्तं यथास्वमिन्द्रियैर्विषयाणामालोचनमवधारणमवग्रहः । | ।।हित. ८०टी।। |
| **अवज्ञा आशातना** | ※ तत्थ अवण्णासायण, पल्हत्थियदेवपिट्ठदाणं च । पुडपुडियपयपसारण, दुट्ठासणसेवणं जिणग्गे ।।८१।। | ।।संबोध.प्र.देव अधि.।। |
| **अवञ्चकः** | ※ समाधिविशेषः । | ।।यो. दृ. ३३टी।। |
| | ※ चित्रक्षयोपशमतस्तथाविधाशयविशेषोऽव्यक्तसमाधिरेवैषः । | ।।यो. दृ. ३४टी।। |
| **अवश्चिका क्रिया** | ※ पराव्यसनहेतुः शरीरव्यापारः । | ।।ध.र. ४७टी।। |
| **अवधिज्ञानम्** | ※ अवही किल मज्जाया सा विज्जइ जम्मि तं अवहिनाणं । भवपच्चइयं च खओवसमसमुत्थं च तं पि दुहा ।। ८८ ।। | ।।हित.।। |
| **अवन्ध्यम्** | ※ न कदाचिन्निष्फलम् । | ।।यो.विं. १टी।। |
| **अवमम्** | ※ दुर्भिक्षम् । | ।।उप.मा.(सि.)५२३ टी।। |

| शब्दाः | उपनिषद् | ग्रन्थाः |
|---|---|---|
| अवसन्नः | * ओसन्नो वि य दुविहो, सव्वे देसे य तत्थ सव्वंमि ।<br>उउबद्धपीढफलगो, ठवियगभोई य नायव्वो ॥१२॥<br>आवस्सयसज्झाए, पडिलेहणझाणाभिक्खभत्तट्ठे ।<br>आगमणे निग्गमणे, ठाणे अ निसीयण तुअट्टे ॥१३॥<br>आवस्सयाइं न करइ, अहवा य करेइ हीणमहियाइं ।<br>गुरुवयणबला उ तहा, भणिओ देसावसन्नोत्ति ॥१४॥ | ॥संबोध.प्र.गुरु अधि.॥ |
| | * आवस्सयाइयाइं न करे अहवावि हीणमहियाइं ।<br>गुरुवयणबलाइ तहा भणिओ एसो हु ओसन्नो ॥ १ ॥ | ॥ध.र. ११४टी॥ |
| | * आवश्यकादिष्ववसदनादवसन्नः । | ॥उप.मा.(सि.)३५३ टी॥ |
| | * आवश्यकादिषु शिथिलः । | ॥उप.मा.(सि.)३८७ टी॥ |
| | * मन्दक्रियोद्यमः । | ॥अ.सा.प्र. ६७टी॥ |
| अवसन्नचरणकरणम् | * शिथिलितमूलोत्तरगुणम् । | ॥उप.मा.(सि.)२२८ टी॥ |
| अवसन्नचरणकरणाः | * स्वयं कर्मपरतन्त्रतया प्रमादिनः । | ॥उप.मा.(सि.)६५/५१४ टी॥ |
| अवस्थितं (अवधिज्ञानम्) | * यावति क्षेत्रे उत्पन्नं ततो न प्रतिपतति, आ केवलप्राप्तेरवतिष्ठते । | ॥हित. ९१टी॥ |
| | * आ मरणान्तं भवेत् भवान्तरमपि वा सङ्क्रामति (यत् तत्) । | ॥हित. ९२टी॥ |
| अविकत्थनः | * अबहुभावी अनात्मश्लाघापरो वा । | ॥उप.मा.(सि.)११ टी॥ |
| अविकृतात्मा | * सर्वतः स्वस्वरुपात्किञ्चिदऽप्रच्यवमानः । | ॥यो.बिं. ४४९टी॥ |
| अविद्या | * अज्ञानफला माया । | ॥अ.सा.पं. ७२टी॥ |
| | * कर्म्मकृतो बुद्धिविपर्यासः । | ॥ल.वि. वियट्ट. व्या.॥ |
| अविद्याकल्पितम् | * अनादिवितथवासनावशोत्पन्नविकल्पकल्पितशरीरम् । | ॥यो.बिं. ३६४टी॥ |
| अविद्यामलिनात्मा | * सद्भूतवस्तुविषयभ्रान्तिवशाशुद्धीभूतस्वरुपः । | ॥यो.बिं. ४१टी॥ |
| अविधिः | * आगमोक्तादन्यथाविधानम् । | ॥अ.सा.च. ५५टी॥ |
| अविनीतः | * आसनदानादिविनयविकलः । | ॥उप.मा.(सि.) २७ टी॥ |
| अविवेकिता | * कार्याकार्ययो - र्निर्विचारता । | ॥अ.सा.द्वि. ३५टी॥ |
| अविशुद्धः | * अनालोचितातिचारतया कलुषितचित्तः । | ॥उप.मा.(सि.) ६५ टी॥ |
| अवेद्यपददुष्टजीवः | * दीणो माई मच्छरठाणी किवणो भवाहिनंदी य ।<br>माणी अहलारंभी, अवेज्जपयदुट्ठदोसजुओ ॥२६॥ | ॥संबोध.प्र.मिथ्या.अधि.॥ |
| अवेद्यसंवेद्यपदम् | * मिथ्यादृष्ट्याऽऽशयस्थानम् , यथावस्थितवस्तुतत्त्वाऽनापादनात् । | ॥यो. दृ. ७२टी॥ |
| | * अवेद्यसंवेद्यपदं, विपरीतमतो मतम् ।<br>भवाभिनन्दिविषयं, समारोपसमाकुलम् ॥७५॥ | ॥यो. दृ.॥ |
| | * महामिथ्यात्वनिबन्धनं पशुत्वादिशब्दवाच्यं च । | ॥यो. दृ. ८६टी॥ |
| अव्यक्तः | * भावबालः । | ॥पंच सू.- च.सू.टी॥ |
| अव्याक्षिप्तः | * शब्दादिषु रागद्वेषावगच्छन् । | ॥उप.मा.(सि.) २९६ टी॥ |
| अशठः | * असढो परं न वंचइ वीससणिज्जो पसंसणिज्जो य ।<br>उज्जमइ भावसारं उचिओ धम्मस्स तेणेसो ॥ १४ ॥ | ॥ध.र.॥ |

| शब्दाः | उपनिषद् | ग्रन्थाः |
|---|---|---|
| अश्लाघाभयम् | ※ अकीर्तिभयम्, एवं हि क्रियमाणे महदायशो भवती ति तद्भयान्न प्रवर्तते इति । | ।।ल.वि. अभयदाणं व्या.।। |
| असंगानुष्ठानम् | ※ व्यवहारकाले वचनप्रतिसंधाननिरपेक्षं दृढतरसंस्काराच्चन्दनगन्धन्यायेनात्म-सात्भूतं जिनकल्पिकादीनां क्रियासेवनम-ऽसंगानुष्ठानम् । | ।।यो.विं १८टी।। |
| | ※ जं पुण अब्भासरसा, सुयं विणा कुणइ फलनिरासंसो । तमसंगाणुट्ठाणं, विण्णेयं णिऊणदंसीहिं ।।२४०।। | ।।संबोध.प्र.देव.अधि.।। |
| असंमोहजनकम् | ※ युक्तस्वरप्रधानतया स्वव्यतिरिक्ततदनुष्ठानप्रवृत्तजनासंमोहसंपादकम् । | ।।या.बि. ३९८टी।। |
| असंमोहो बोधः | ※ सदनुष्ठानवज्ज्ञानं बोधराज इति । | ।।यो. दृ. १२१टी।। |
| असंयताः | ※ मुत्कलमनोवाक्कायाः । | ।।उप.मा.(सि.) ४३५ टी।। |
| असंयमपदाः | ※ पृथिव्याद्युपमर्दस्थानाः । | ।।उप.मा.(सि.) २१ टी।। |
| असङ्गः | ※ रागद्वेषमोहाद्यविषयः । | ।।ल.वि. पुक्खर. व्या.।। |
| असच्छ्रद्धा | ※ असच्छ्रद्धा शास्त्रबाह्या स्वाभिप्रायतस्तथाविधाऽसद्ग्रहात्मिका गृह्यते । | ।।यो. दृ. १७टी।। |
| असत् | ※ अयुज्यमानम् । | ।।ल.वि.नमुत्थुणं व्या.।। |
| असत्क्रिया | ※ असर्वज्ञोक्ताऽविधिकृता च क्रियाऽमोक्षोपायत्वात् । | ।।अ.सा.तृ. ७४टी।। |
| असत्फला | ※ अविद्यमानाभिप्रेतार्थाः । | ।।यो.बिं. २२६टी।। |
| असदग्रहम् | ※ अशोभनाभिनिवेशम् । | ।।ध.र. ७३टी।। |
| असद्ग्रहः | ※ असद्बोधः । | ।।ध.र. १०७टी।। |
| | ※ असत्यविद्यमाने विपर्ययवति वा वस्तुनि ग्रह आग्रहोऽन्यथाश्रद्धानप्ररुपणम् । | ।।अ.सा.च. १४८टी।। |
| | ※ दुराग्रहः । | ।।अ.सा.च. १५६टी।। |
| असपत्नः | ※ परस्पराविरोधी, स्वस्वकालानुष्ठानात् । | ।।ल.वि. पुक्खर. व्या.।। |
| असमञ्जसत्वम् | ※ सन्न्यायविरुद्धम् । | ।।यो.श. ८०टी।। |
| असम्प्रज्ञातः | ※ यत्र समाधौ वृत्त्याद्यऽशेषं निरुध्यते, आत्मा च लब्धतत्समाधिस्वरुपाऽनुवेधो भवति सोऽसम्प्रज्ञातो मानसविज्ञानवैकल्यादुच्यत इति । | ।।यो.बिं. ४४१टी।। |
| असहिष्णुः | ※ सुकुमारदेहः । | ।।उप.मा.(सि.) ४०३ टी।। |
| असाधारणम् | ※ क्वचिदन्यत्रावृत्तम् । | ।।ल.वि. पुरिससिहाणं व्या.।। |
| अस्तित्वम् | ※ सद्भावः । | ।।ल.वि. अरिहंत चेइ. व्या.।। |
| अस्तिवादः | ※ तत्वेषु जीवाजीवादिषु अस्तिवादः शङ्कादिपरिहारेण सर्वज्ञप्रणेतृप्रत्ययेनैव निर्विवादश्चेतःसंवादः । | ।।हित. २४टी।। |
| अहिंसा | ※ प्राणिदया । | ।।अ.सा.च. ४५टी।। |
| | ※ करुणा । | ।।अ.सा.च. ४९टी।। |
| अहितम् | ※ भवावस्थानम् । | ।।हित. १०टी।। |
| | ※ पापोदेशरुपं स्वपरयोरनर्थानुबन्धि दीर्घभवभ्रमणकारणं अवेतनक्रीतं नरकपथपाथेयम् । | ।।हित. १३टी।। |
| अहितार्थः | ※ रागद्वेषकरणलक्षणः संसारकारणम् । | ।।उप.मा.(सि.) ३२९ टी।। |

| शब्दाः | उपनिषद् | ग्रन्थाः |
|---|---|---|
| | **आ** | |
| **आकुट्टिः** | ❊ उपेत्यकरणम् । | ।।हित. ५१टी।। |
| **आक्रोशः** | ❊ वचनैः शपनम् । | ।।उप.मा.(सि.) १३५ टी।। |
| **आक्षेपणी कथा** | ❊ आक्षिपत्याऽऽवर्जयत्यत्यभिमुखीकरोति या सा आक्षेपणी कथा शृङ्गारादिप्राया । | ।।हित. ४७२टी।। |
| **आगमः** | ❊ गुरुवचनप्रत्ययः । | ।।या.बिं./२३९टी।। |
| | ❊ सर्वज्ञवचनम् । | ।।यो.दृ./१०टी।। |
| | ❊ वितरागवचनम् । | ।।ध.र. ८०टी।। |
| | ❊ आगमो ह्याप्तवचनमाऽऽप्तं दोषक्षयाद्विदुः ।<br>वीतरागोऽनृतं वाक्यं न ब्रूयाद्धेत्वसंभवात् ।। १ ।। | ।।ध.र. ८०टी।। |
| | ❊ आप्तवचनम् । | ।।यो.दृ./१०१टी।। |
| **आगमधार्मिकाः** | ❊ आगमप्रधाना धार्मिका आगमधार्मिका वेदवादिनः । ते हि आत्माधर्मादि-केऽतीन्द्रियार्थे आगममेव प्रमाणं प्रतिपद्यन्ते, न प्रत्यक्षादिकमपि,यदाहुस्ते<br>अतीन्द्रियाणामर्थानां साक्षाद्द्रष्टा न विद्यते ।<br>वचनेन हि नित्येन, यः पश्यति स पश्यति । ।।१।। इति । | ।।ल.वि. तित्थयराणं व्या.।। |
| **आगमनीतिः** | ❊ सिद्धान्तभणिताचारः, अथवा संविग्नबहुजनाचीर्णमिति द्विरुपोऽवगन्तव्य इति । | ।।ध.र. ८०टी।। |
| **आगमव्यवहारः** | ❊ आगम सुय आणा धारणा य जीए च पंच ववहारा ।<br>केवलमणोहिचउदसदसनवपुव्वाइ पढमोऽत्थ ।।६६।। | ।।संबोध.प्र.आलो.अधि.।। |
| **आगमश्रद्धा** | ❊ जिनागमे दृढा प्रीतिः । | ।।अ.सा.पं. १५४टी।। |
| **आचरणम्** | ❊ शुभभावनाभ्यासादितदुपायसेवने प्रवर्तनम् । | ।।अ.सा.तृ. ९६टी।। |
| **आचारः** | ❊ पुरुषार्थप्रतिबद्धः शिष्टजनाचीर्णश्च । | ।।हित. ३३९टी।। |
| **आचार्यः** | ❊ पडिरुवो तेयस्सी जुगप्पहाणागमो महुरवक्को ।<br>गंभीरो धीमंतो उवएसपरो य आयरिओ ।।३।। | ।।ध.र. ४९टी।। |
| | ❊ ज्ञानादिपञ्चविधमाचारं स्वयमाचरति परांश्चाचारयतीत्याचार्यः । | ।।हित. १९०टी।। |
| **आजीवकाः** | ❊ आजीवन्ति द्रव्यलिङ्गेन लोकमिति आजीवका निह्नवाः । | ।।उप.मा.(सि.) ४५९ टी।। |
| **आजीवभयम्** | ❊ वर्त्तनोपायस्तस्मिन् अन्येनोपरुध्यमाने भयमाजीवभयम् । | ।।ल.वि. अभयदयाणं व्या.।। |
| **आजीवी** | ❊ लिङ्गोपजीवको वेषविडम्बकः । | ।।उप.मा.(सि.) २९८ टी।। |
| **आज्ञा** | ❊ शङ्कादिरहितं द्वादशाङ्गागमरुपं वचनमाज्ञा । | ।।हित. ४८४टी।। |
| | ❊ जिनैर्नानुमतं किंचिन्निषिद्धं वा न सर्वथा ।<br>कार्ये भाव्यमदंभेनेत्येषाज्ञा पारमेश्वरी ।।७३।। | ।।अ.सा.प्र.।। |
| | ❊ सिद्धान्तोक्तपद्धतिः । | ।।अ.सा.तृ. ८२टी।। |
| | ❊ आप्तोपदेशः । | ।।ल.वि. अरिहंत चेइ. व्या.।। |
| **आज्ञामृतम्** | ❊ आज्ञैवामृतं परमस्वास्थ्यकारित्वादाज्ञामृतम् । | ।।ल.वि. अरिहंत चेइ. व्या.।। |
| **आज्ञारुचिः** | ❊ यो वितरागद्वेषमोहे जिने प्रत्ययवशात् तत्त्वाभिलाषी जातः, स आज्ञारुचिः । | ।।अ.सा.च. ७टी।। |
| **आज्ञाविचयधर्मध्यानम्** | ❊ सुणिऊणमणाइनिहणं-भूअहियं भूयभावणमहग्घं ।<br>अमियमजियं महत्थं, महाणुभावं महाविसयं ।।४६।। | |

| शब्दाः | उपनिषद् | ग्रन्थाः |
|---|---|---|
| | झाइज्जा निरवज्जं, जिणाण आणं जगप्पईवाणं । | |
| | अनिउणजणदुन्नेयं नयभंगपमाणगमगहणं ।।४७।। | |
| | तत्थ य मइदुब्बलेणं, तव्विहायरियविरहओ वा वि । | |
| | नेयगहणत्तणेण य, नाणावरणोदएणं च ।।४८।। | |
| | हेऊदाहरणासंभवे य सइ सुट्ठु जं न बुज्झिज्जा । | |
| | सव्वन्नुमयमवितहं तहावि तं चिंतए मइमं ।।४९।। | |
| | अणुवकयपराणुग्गहपरायणा जं जिणा जगप्पवरा । | |
| | जियरागदोसमोहा, य नन्नहावाइणो तेणं ।।५०।। | ।।संबोध.प्र.ध्यान अधि.।। |
| आज्ञाविचयध्यानम् | ※ नयभंगप्रमाणाढ्यां हेतूदाहरणान्विताम् । | |
| | आज्ञां ध्यायेज्जिनेन्द्राणामप्रमाण्याकलंकिताम् ।।११९।। | ।।अ.सा.पं.।। |
| आज्ञाविचयम् | ※ यस्या भंगे संसारपातादिरुपं महद्भयं वर्तते नृपादेशभंगवत् साज्ञा जिनागमरुपा | |
| | वाणी, तस्या यो विशिष्टो विविधो वा चयो निर्णयकरणरुपोपचयो | |
| | यत्र तदाज्ञाविचयम् । | ।।अ.सा.पं. ११८टी।। |
| आतङ्कः | ※ सद्योघाती रोगः । | ।।पंच सू.- तृ.सू.टी।। |
| आत्मकर्म | ※ आत्मना स्वयमेव विकल्पितं स्वस्वमतानुसारेण लोकसंज्ञया मिथ्यादृशां | |
| | यमनियमादिकरणीयं आत्मकर्म आत्मक्रिया । | ।।अ.सा.प्र. ४६टी।। |
| आत्मदर्शनम् | ※ आत्मनैवाऽऽत्माऽवलोकनम् । | ।।यो.बिं. ४५७टी।। |
| आत्मप्रेक्षणम् | ※ आत्मनःप्रकर्षेण ईक्षणं निरुपणमित्यर्थः। कथम् ? अतिनिपुणं स्वतः परतः | |
| | स्वभावादिभिः । दोषापेक्षया किमहं रागबहुलो मोहबहुलो द्वेषबहुलो | |
| | इत्युत्कटदोषप्रतिपक्षभावनाभ्यासोपपत्तेः । | ।।यो.श. ५२टी।। |
| आत्मवान् | ※ आत्मा यस्य वशेऽस्ति स आत्मवान् । | ।।अ.सा.पं. ३८टी।। |
| आत्मसम्प्रेक्षणम् | ※ किं कृतं किं वा कर्तव्यशेषमित्याद्यात्मनिभालनरुपम् । | ।।यो.बिं. ३९४टी।। |
| आत्मसाक्षिकम् | ※ प्रत्यायितस्वचित्तं । | ।।उप.मा.(सि.) २० टी।। |
| आत्महितम् | ※ स्वपथ्यं तपःसंयमादिकम् । | ।।उप.मा.(सि.) १०८ टी।। |
| | ※ स्वस्मै पथ्यं जिनवचनोक्तसदनुष्ठानम् । | ।।उप.मा.(सि.) ४५३ टी।। |
| आत्मा | ※ निस्तरङ्गमहोदधिकल्पः । | ।।यो.बिं. ३६६टी।। |
| | ※ अतति सततं गच्छत्यपरापरपर्यायानित्यात्मा जीवः । | ।।अ.सा.च. २४टी।। |
| | ※ जीवोऽजस्वभाववान्, न विद्यते जन्मस्भावो यस्य स । | ।।अ.सा.ष. २५टी।। |
| आत्मानुष्ठानम् | ※ द्वितीयं तु यमाद्येव लोकदृष्ट्या व्यवस्थितम् । | |
| | न यथाशास्त्रमेवेह , सम्यग्ज्ञानाद्यऽयोगतः ।। २१३ ।। | ।।यो.बिं.।। |
| आत्मारामसुनिः | ※ आत्मनि निजस्वभावे आरामो विश्रामो रमणप्रवृत्तिर्वा यस्य स मुनि-योंगी । | ।।अ.सा.स. ८टी।। |
| आत्मोत्कर्षः | ※ आत्मनि सौष्ठवाभिमानः । | ।।ध.र. १३४टी।। |
| आदरः | ※ हृदि बहुमानपूर्वकोद्यमवत्वम् । | ।।अ.सा.द्वि. ७६टी।। |
| | ※ इष्टादौ यत्नातिशयः । | ।।यो. दृ. १२३टी।। |
| आदान-निक्षेपणा समितिः | ※ ओहारोवहोपग्गहियं भंडगं दुविहं मुणी । | |
| | गिण्हंतो निक्खिवंतो य आयाणं निक्खिवे विहिं ।।१५।। | ।।संबोध.प्र.गुरु अधि.।। |

| शब्दाः | उपनिषद् | ग्रन्थाः |
|---|---|---|
| आदानभण्डमत्तनिक्षे-पणासमिति: | * दट्ठुं दिट्ठीइ, पमज्जिऊण रयहरणमाइणा सम्मं ।<br>आयाणसमिइसमिया गिण्हंति मुयंति उवगरणं ।।४८२।। | ।।हित.।। |
| | * पुव्विं चक्खुपरिक्खियपमज्जियं जो ठवेइ गिण्हइ वा ।<br>आयाणभंडनिक्खेवणाए, समिओ मुणी होइ ।।२९८।। | ।।उप.मा.(सि.)।। |
| आदानभयम् | * चौरादिभ्यो यद्भयं तदादानभयम् । | ।।ल.वि. अभयदयाणं व्या.।। |
| आदिकरा: | * आदौ करणशीला:, अनादावपि भवे तदा तदा तत्तत्कर्म्माण्वादिसम्बन्ध-<br>योग्यतया विश्वस्यात्मादिगामिनो जन्मादिप्रपञ्चस्येति । | ।।ल.वि.आइगराणं व्या.।। |
| आदिकर्मकम् | * प्रधानधार्मिकलक्षणम् । | ।।यो. बिं. ३८१टी।। |
| आदिकर्मण: | * प्रथममेवारब्धस्थूलधर्माचारा: । | ।।यो.बिं. ११९टी।। |
| आदेश: | * वस्तुप्रमाणीकरणे पक्ष: सामान्यप्रकार इति यावत् । | ।।अ.सा.ष. ५३टी।। |
| आध्यानम् | * उचित प्रवृत्ते-र्व्रतभृतो मैत्र्यादिभावगर्भ शास्त्राज्जीवादितत्वचिन्तनम् । | ।।यो.विं ३टी।। |
| आनन्द: | * सम्यग्दर्शनलाभरुप:, ''तमोग्रन्थिभेदादानन्द:'' इतिवचनात् । | ।।ल.वि. मग्गदयाणं व्या.।। |
| आनुगामुकं (अवधिज्ञानम्) | * यत्र क्वचिदुत्पन्नं तत्रस्थस्य क्षेत्रान्तरगतस्याऽपि न प्रतिपतति भास्करप्रकाशवत् । | ।।हित. ९१टी।। |
| आपवादिकम् | * अपवादेन निर्वृत्तमापवादिकमं यद् द्रव्यक्षेत्राद्यपेक्षमिति । | ।।उप.मा.(सि.) ४०० टी।। |
| आप्त: | * अविप्रतारक: । | ।।उप.मा.(सि.) ४८८ टी।। |
| आभिग्रहिकं मिथ्यात्वम् | * पाखण्डिनां स्वस्वशास्त्रनियन्त्रितविवेकालोकानां परपक्षप्रतिक्षेपदक्षाणां भवति । | ।।हित. १५टी।। |
| आभिनिवेशिकं मिथ्यात्वम् | * जानतोऽपि यथावस्थितं वस्तु दुरभिनिवेशलेशविप्लोवितधियो जमालेरिव<br>भवति । | ।।हित. १५टी।। |
| आभोगद्रव्यस्तव: | * देवगुणपरिन्नाणा, तब्भावाणुगयमुत्तमं विहिणा ।<br>आयारसारं जिणपूयणेण आभोगदव्वथओ ।।२०६।। | ।।संबोध.प्र.देव अधि.।। |
| आय: | * अन्यसंभूति: । | ।।पंच सू.-तृ.सू.टी।। |
| आयत: | * आयतो गुरुबहुमान:साद्यऽपर्यवसित्वेन दीर्घत्वादाऽऽयतो मोक्ष:,स गुरुबहुमान:,<br>गुरुभावप्रतिबन्ध एव मोक्ष इत्यर्थ: । | ।।पंच सू.-च.सू.टी।। |
| आयतनम् | * धार्मिकजनमीलनस्थानम् । | ।।ध.र. २७टी।। |
| | * जत्थ साहम्मिया बहवे सीलवंता बहुस्सुया ।<br>चरित्तायारसंपन्ना आययणं तं वियाणाहि ।। १ ।। | ।।ध.र. ३७टी।। |
| आयतार्थी | * मोक्षार्थी । | ।।पंच सू.- च.सू.टी।। |
| आयास: | * चित्तखेद: । | ।।ध.र. ६२टी।। |
| आयुक्त: | * धर्मध्यानोपयुक्त: सन् । | ।।उप.मा.(सि.) २९६ टी।। |
| आयोज्यकरणम् | * केवलाभोगेनाचिन्त्यवीर्यतया योज्यं - तथा तत्कालक्षपणीयत्वेन भवोपग्राहि-<br>कर्मणस्तथावस्थानभावे करणं-कृतिरायोज्यकरणं शैलेश्यवस्थाफलमेतत् । | ।।यो. दृ. १०टी।। |
| | * केवलाभोगेनाचिन्त्यवीर्यतया आयोज्य = ज्ञात्वा तथा तत्कालक्षपणीयत्वेन<br>भवोपग्राहिकर्म्मणस्तथाऽवस्थानभावेन करणं = कृति:, आयोज्यकरणं<br>शैलेश्यवस्थाफलमेतत् । | ।।ल.वि. नमुत्थुणं व्या.।। |
| आरंभत्यागप्रतिमा | * आरंभसयंकरणमट्ठमिया अट्ठमासे वज्जेइ ।<br>असिणाणो वि हु पूयापरायणो उसिणजलन्हाणो ।।१०५।। | ।।संबोध.प्र.श्राव.प्र.अधि.।। |

| शब्दाः | उपनिषद् | ग्रन्थाः |
|---|---|---|
| आराधनता | * नमस्कारप्रत्याख्यानादिभावरुपा। | ।।उप.मा.(सि.) १५७ टी।। |
| आराधना | * जा जिणवयणे जयणा, विहिकरणं दव्वपमुहजोगेहिं। | |
| | सा धम्माराहणा खलु, विराहणा ताण पडिसेहो ।।३।। | ।।संबोध.प्र.आलो.अधि.।। |
| आरोग्यम् | * नीरोगता, संयमभारोद्वहनक्षमतेत्यर्थः। | ।।उप.मा.(सि.) ४६६ टी।। |
| आर्यः | * सर्वहेयधर्मेभ्य आराद्यागयायिन्। | ।।यो.बिं. २१८टी।। |
| आलम्बनतत्परः | * यत् किञ्चिद् व्याजीकृत्य सर्वकार्येषु प्रवर्तते। | ।।उप.मा.(सि.) ३८५ टी।। |
| आलोचनम् | * गुरोः पुरतः आसेवनानुलोम्येन प्रायश्चित्तानुलोम्येन वा स्वापराधस्य प्रकटनम्। | ।।हित. १९०टी।। |
| आलोचना | * लोयालोयस्स मज्जाया आत्ति लोयत्ति लोयणं तस्स। | |
| | अयणत्ति संपाडण-मालोयणसद्दणिज्जुत्ती ।।१८।। | ।।संबोध.प्र.आलो.अधि.।। |
| आलोचना प्रतिक्रमण-प्रायश्चित्तम् | * आलोइज्जइ गुरुणो पुरओ, कज्जेण हत्थसयगमणे। | |
| | समिइपमुहाण मिच्छा-करणे कीरइ पडिक्कमणं ।।४९।। | ।।संबोध.प्र.आलो.अधि.।। |
| आवर्तः | * नरनारकादिपर्यायपरिवर्त्तरुपः। | ।।ल.वि.तिन्ना.तार.व्या.।। |
| | * आवर्तन्ते प्राणिनोऽस्मिन्नित्याऽऽवर्त्तः संसारः। | ।।पंच सू.- च.सू.टी।। |
| आवश्यकानि | * सामायिक-प्रतिक्रमणादीनि नित्यकृत्यानि। | ।।उप.मा.(सि.) २३४ टी।। |
| आविद्धदज्ञनादि सिद्धम् | * सर्व्वजनप्रतीतम्। | ।।ल.वि.जिणा.जाव. व्या.।। |
| आशयः | * परिणामः। | ।।ल.वि. पुक्खर. व्या.।। |
| - | * भावः। | ।।यो.विं १टी।। |
| आशातना | * ज्ञानाद्यायशातनरुपा। | ।।हित. २२२टी।। |
| आश्रवाः | * नवकर्मजलप्रवाहप्रवेशमार्गाः। | ।।अ.सा.पं. १३०टी।। |
| आसन्नसिद्धिपथः | * संसारचारए चारए व्व, आवीलियस्स बंधेहिं। | |
| | उव्विग्गो जस्स मणो, सो किर आसन्नसिद्धिपहो ।।२८८।। | ।।उप.मा.(सि.)।। |
| आसेवनापुलाकः | * आसेवणापुलाओ, पंचविहो नाणदंसणचरित्ते। | |
| | लिंगंमि अहासुहुमो, होइ आसेवणानिरओ ।।२४४।। | ।।संबोध.प्र.गुरु अधि.।। |
| आस्तिक्यम् | * आस्थारुपम्। | ।।अ.सा.च. ५७टी।। |
| आस्रवः | * आस्रवत्याऽऽपतति कर्म यस्मिन् स आस्रवः। | ।।यो.बिं. ३७६टी।। |
| | * शुभाशुभकर्म्माश्रयणरुप आस्रवः। | ।।हित. १५टी।। |

## इ

| शब्दाः | उपनिषद् | ग्रन्थाः |
|---|---|---|
| इङ्गिनीपादपोगमे (अनशने) | * एकाकिनः शून्यारण्ये तीर्थादिषु यज् जायते, | |
| | केवलमिङ्गिनी सचेष्टस्य पादोपगमं तु निरुद्धबाह्यचेष्टस्य। | ।।हित. १८९टी।। |
| इच्छा-प्रवृत्तियोगः | * इच्छा तद्वत्कथाप्रीतियुक्ताऽविपरिणामिनी। | |
| | प्रवृत्तिः पालनं सम्यक् सर्वत्रोपशमान्वितम् ।।८७।। | ।।अ.सा.तृ.।। |
| इच्छायोगः | * कर्तुमिच्छोः श्रुतार्थस्य ज्ञानिनोऽपि प्रमादतः। | |
| | विकलो धर्मयोगो यः स इच्छायोग उच्यते ।।१।। | ।।ल.वि.नमुत्थुणं व्या.।। |
| | * स्थानादियोगयुक्तानां कथायां प्रीत्या अर्थबुभुत्सयाऽर्थबोधेन वा जनितो या हर्षस्तल्लक्षणया सङ्गता सहिता विपरिणामिंनी विधिकर्तृबहुमानादिगर्भ | |

| शब्दाः | उपनिषद् | ग्रन्थाः |
|---|---|---|
| | स्वोल्लासमात्राद्यत्किञ्चिदभ्यासादिरुपं विचित्रं परिणाममादधाना इच्छा भवति, द्रव्यक्षेत्राद्यसमाग्र्येणाङ्गसाकल्याभावेऽपि यथाविहितस्थानादि-योगेच्छया यथाशक्ति क्रियमाणं स्थानादि इच्छारुपमित्यर्थः । | ।।यो.विं. ६टी।। |
| | * कर्तुमिच्छोः श्रुतार्थस्य, ज्ञानिनोऽपि प्रमादतः ।<br>विकलो धर्मयोगो यः, स इच्छायोग उच्यते ।।३ ।। | ।।यो. दृ.।। |
| | * तद्वत्कथाप्रीतियुता, तथाऽविपरिणामिनी ।<br>यमेष्विच्छाऽवसेयेह, प्रथमो यम एव तु ।।२१५ ।। | ।।यो. दृ.।। |
| इच्छायोगादयः | * न्यायतन्त्रसिद्धा इच्छादिप्रधानाः क्रियया विकलाविकलाधिकास्तत्व-धर्मव्यापाराः । | ।।ल.वि. नमुत्थुणं व्या.।। |
| इत्वरास्रवभावः | * केवलं योगप्रत्ययद्विसामायिकबलवेदनीयबन्धसद्भावः । | ।।यो.बिं. ३७७टी।। |
| इन्द्रियम् | * इन्दनादिन्द्रो जीवः, सर्वविषयोपलब्धिभोगलक्षणपरमैश्वर्ययोगात्, तस्य लिङ्गमिन्द्रियं श्रोत्रादि । | ।।ल.वि. चक्खुदयाणं व्या.।। |
| इन्द्रियार्थाश्रया बुद्धिः | * तीर्थयातृकदर्शने तद्गमनबुद्धिवत् । | ।।यो. दृः१२१टी।। |
| इर्यासमितिः | * जुगमित्तंतरदिट्ठी, पयं पयं चक्खुणा विसोहिंतो ।<br>अव्वक्खित्ताउत्तो, इरियासमिओ मुणी होई ।।२९५।। | ।।उप.मा.(सि.)।। |
| | * इरियासमियाण भवे परिमलियपहम्मि मिहिरकरपुट्ठे ।<br>अणवज्जकज्जमासज्ज गमणमेगग्गमणनयणं ।। ४६७ ।। | ।।हित.।। |
| | * त्रसस्थावरजन्तुजाताऽभयदानदीक्षितानां मुनीनां प्राणीरक्षानिमित्तमात्मर-क्षार्थं च चरणाग्रादारभ्य युगमात्रक्षेत्रं यावदवलोक्य यदीरणं गमनं सैवेर्यासमितिः । | ।।हित. ४६७टी।। |
| इष्टम् | * अनुमानादि । | ।।अ.सा.च. ८२टी।। |
| | * सपरिणामं हितम्, उत्तरोत्तरशुभफलानुबन्धि सुखकारि प्रकृतहितयोगसाध्योऽ-नुग्रह इति भावः । स्वादुपथ्यान्नवदतिरोगिणः । | ।।ल.वि. लोगहिआणं व्या.।। |
| | * वचनोक्तमेव । | ।।ल.वि. नमो. जिअ. व्या.।। |
| इष्टसिद्धिः | * विशिष्टमार्गावताररुपाः । | ।।यो. बिं. ११९टी।। |
| इहलोकभयम् | * मनुष्यादिकस्य सजातीयादेरन्यस्मान्मनुष्यादेरेव सकाशाद् यद्भयं तदिहलोकभयम् । | ।।ल.वि. अभयदयाणं व्या.।। |

## ई

| शब्दाः | उपनिषद् | ग्रन्थाः |
|---|---|---|
| ईर्यासमितः | * ईरणमीर्या गमनमित्यर्थः, तस्यां सम्यगित ईर्यासमितः,यथोक्तगमनानुष्ठायी । | ।।उप.मा.(सि.) २९६ टी।। |
| ईश्वरः | * मुक्तो बुद्धोऽर्हन्वापि यदैश्वर्येण समन्वितः ।<br>तदीश्वरः स एव स्यात्संज्ञाभेदोऽत्र केवलम् ।।३०२ ।। | ।।यो बिं.।। |
| ईहा | * अवग्रहगृहीते विषयार्थैकदेशाच्छेषाऽनुगमननिश्चयविशेषजिज्ञासा चेष्टा ईहा । | ।।हित. ८०टी।। |

| शब्दाः | उपनिषद् | ग्रन्थाः |
|---|---|---|
| | **उ** | |
| **उक्तक्रिया** | ※ उक्तस्य विज्ञातस्य तत्तत्कालयोगिनः तदासेवनसमये तथोपयोगपूर्वं शक्तितस्तथाक्रिया । | ।।ल.वि. नमुत्थुणं व्या.।। |
| **उचितवृत्तिः** | ※ ब्राह्मणादिस्ववर्णोचितविशुद्धवृत्तिमान् (स्वकुलाद्युचितपरिशुद्धसमाचारा) । | ।।ल.वि. प्रस्तावना।। |
| **उच्चारः** | ※ पुरीषम् । | ।।उप.मा.(सि.) १५९ टी।। |
| **उत्कृष्ट-मध्यम-जघन्य श्रावकः** | ※ उक्किट्ठमज्झिमजहन्नभेएहिं ते वियाणिज्जा ।<br>उक्किट्ठो पडिमठिओ, मज्झिमओ बारसवओ य ।।१२।।<br>एगाइवयजहण्णो सकम्मनिरओ जहुत्तविहिकलिओ ।<br>भत्तट्ठाइयनियमुज्जुत्तो संपत्तसम्मत्तो ।।१३।। | ।।संबोध.प्र.श्राव.प्र.अधि.।। |
| **उत्तरसांख्याः** | ※ एकं नित्य सर्वात्मसु प्रधानामिति प्रतिपन्नाः । | ।।ल.वि. आइगराणं व्या.।। |
| **उत्तानमतिः** | ※ अनिपुणबुद्धिः । | ।।ध.र. ८टी।। |
| **उत्पादः** | ※ सर्वेषां वस्तूनां वर्तमानपर्यायस्य व्ययेनानागतपर्यायत्वेनोद्भवनं । | ।।अ.सा.पं. १२२टी।। |
| **उत्सर्गः** | ※ सामान्योक्तिः । | ।।ध.र. ५२टी।। |
| | ※ निर्विशेषणमनुष्ठानम् । | ।।उप.मा.(सि.) २१८ टी।। |
| | ※ सामान्यतः साधुसामाचारमार्गः । | ।।अ.सा.द्वि. ७१टी।। |
| | ※ सदा समाचरणीयो मार्गः । | ।।अ.सा.पं. १३०टी।। |
| | ※ सामान्यरुपम् । | ।।हित. ४०४टी।। |
| **उत्सर्गसूत्र-दृष्टांतम्** | ※ इच्चेसिं छण्हं जीवनिकायाणां नेव सयं दंडं समारंभेज्जा ।। ५ ।। | ।।ध.र. १०६टी।। |
| **उत्सर्गापवादसूत्र-दृष्टांतम्** | ※ अट्टज्झाणाभावे सम्मं अहियासियव्वओ वाही ।<br>तब्भावम्मि उ विहिणा पडियारपवत्तणं नेयं ।।७।। | ।।ध.र. १०६टी।। |
| **उत्सूत्रप्ररुपणा** | ※ सूत्रनिरपेक्षदेशना । | ।।ध.र. १०१टी।। |
| **उत्सूत्रम्** | ※ आगमादुत्तीर्णम् । | ।।उप.मा.(सि.) ५१८ टी।। |
| **उदकशूकरः** | ※ नित्यस्नायित्वात् त्रिदण्डी । | ।।उप.मा.(सि.) २६७ टी।। |
| **उदात्तः** | ※ उच्चोच्चतराद्याऽऽचरणस्थितिबद्धचित्तः । | ।।यो.बिं. १८६टी।। |
| **उदारबुद्धिः** | ※ योगी । | ।।अ.सा.तृ. ११७टी।। |
| | ※ उदारा परमार्थपरीक्षाविधौ प्रधाना बुद्धि-र्मति-र्यस्य स मुनिः । | ।।अ.सा.च. १६९टी।। |
| **उदासीनः** | ※ रागाद्यन्तरालवर्ती माध्यस्थ्यपरिणामी । | ।।अ.सा.पं. ३५टी।। |
| **उद्दिष्टवर्जनप्रतिमा** | ※ दसमी पुण दसमासे, उद्दिट्ठकडंपि तत्थ न वि भुंजे ।<br>छुरमुंडो ससिहो वि हु, सज्झायज्झाण पुव्वुत्तो ।।१०८।।<br>जं निहियमत्थजायं, पुच्छंतसुयाण नवरि सो तत्थ ।<br>जइ जाणइ तो साहइ अह नवि तो बेइ न वियाणे ।।१०९।। | ।।संबोध.प्र.श्राव.प्र.अधि.।। |
| **उद्भटवेषः** | ※ रागान्धजघन्यजननेपथ्यः । | ।।ध.र. ४०टी।। |
| **उद्भावनम्** | ※ परसमक्षं गुणवर्णनम् । | ।।उप.मा.(सि.) २३७ टी।। |
| **उद्यमसूत्र-दृष्टांतम्** | ※ दुमपत्तए पंडुयए जहा निवडइ राइगणाण अच्चए ।<br>एवं मणुयाण जीवियं समयं गोयम ! मा पमायए ।। १ ।। | |

| शब्दाः | उपनिषद् | ग्रन्थाः |
|---|---|---|
| | वंदइ उभओ कालंपि चेइयाइं थयथुईपरमो ।<br>जिणवरपडिमा घरधूयपुप्फगंधच्चणे जुत्तो ॥ २ ॥ | ॥ध.र. १०६टी॥ |
| उद्वेगकः | ❋ मनाग् धर्मधृतेश्चलनम् । | ॥उप.मा.(सि.) ३१८ टी॥ |
| उन्मादः | ❋ मतिभ्रंशश्चित्तविभ्रमो वा । | ॥अ.सा.ष. २१०टी॥ |
| उन्मार्गः | ❋ मोक्षप्रतीपा वर्त्तिनी । | ॥ध.र. ९६टी॥ |
| | ❋ चौर्य-पारदार्यादिभावोत्पथः । | ॥उप.मा.(सि.) २२ टी॥ |
| उपकरणेन्द्रियम् | ❋ विषयग्रहणे समर्थं छेद्यच्छेदनेखडगस्येव धरा, यस्मिमन्नुपहते निवृत्तिसद्-<br>भावेऽपि विषयं न गृहणाति । | ॥ल.वि. चक्खुदयाणं व्या.॥ |
| उपकारपरः | ❋ नरमणिः । | ॥हित. ३८५टी॥ |
| उपक्रमः | ❋ प्रोज्ज्वलनम् । | ॥हित. १९४टी॥ |
| उपचारः | ❋ व्यवहारोऽपेक्षा च । | ॥अ.सा.द्वि. ७५टी॥ |
| | ❋ उपचरितवस्तुव्यवहाररुपः । | ॥यो.बिं. १५टी॥ |
| | ❋ आरोपः कल्पना इति यावत् । | ॥अ.सा.च. १११टी॥ |
| उपचारविनयः | ❋ मणवयणकायजोगे सुपसत्थे तेसु धरइ निच्चं पि ।<br>आसायणं च सम्मं, वज्जंतो वहइ बहुमाणं ॥ २२२ ॥ | ॥हित.॥ |
| उपदेशः | ❋ उपदिश्यत इत्युपदेशो हितप्रवृत्तिहेतुवचनप्रपञ्चः । | ॥ध.र. १टी॥ |
| | ❋ वस्तुधर्मप्रकाशनम् । | ॥अ.सा.च. १४९टी॥ |
| उपदेशपरः | ❋ सद्वचनै-र्मार्गप्रवर्तकः । | ॥उप.मा.(सि.)११ टी॥ |
| उपदेशरुचिः | ❋ यो गुरुपद्देशं श्रुत्वा तत्त्वाभिलाषी भवति स उपदेशरुचिः । | ॥अ.सा.च. ७टी॥ |
| उपयुक्तः | ❋ दत्तावधानः । | ॥ध.र. ११३टी॥ |
| उपयोगः | ❋ ज्ञानदर्शनरुपः सामान्यविशेषबोधरुपो वा चेतनाव्यापारः । | ॥अ.सा.पं. १२३टी॥ |
| | ❋ सामान्यविशेषात्मको ज्ञानव्यापारः । | ॥अ.सा.ष. ८५टी॥ |
| उपशमः | ❋ रागादिजयः । | ॥उप.मा.(सि.) ४८३ टी॥ |
| | ❋ क्रूराणामनन्तानुबन्धिक्रोधादिकषायाणां क्षयोपशमाद् वा तद्विपाकदर्शनाद्<br>वा कृतापराधेष्वपि प्राणिषु यः कषायानुदयः स उपशमः । | ॥हित. २४टी॥ |
| उपशमसम्यक्त्वम् | ❋ खीणंमि उइण्णंमि, अणुइज्जंते अ सेसमिच्छत्ते ।<br>अंतोमुहुत्तमित्तं, उवसमसम्मं लहइ जीवो ॥९॥ | ॥संबोध.प्र. सम्य. अधि.॥ |
| उपशमसारविचारः | ❋ उपशमः कषायानुदयः, तत्सारं तत्प्रधानं विचारयति धर्मादिस्वरुपं यः<br>स उपशमसारविचारः । | ॥ध.र. ७३टी॥ |
| उपसर्गाः | ❋ उपसृज्यते सन्मार्गात् प्रेर्यते एभिरित्युपसर्गाः कदर्थनानि । | ॥उप.मा.(सि.) ५ टी॥ |
| उपाधिः | ❋ उप-समीपे आधीयते धार्यत इत्युपाधिः । | ॥यो.बिं. ४४८टी॥ |
| उपाध्यायः | ❋ आचारगोचरं विनयं स्वाध्यायं चाचार्यलब्धानुज्ञाः साधव उप समीपे अधीयतेऽ-<br>स्मादित्युपाध्यायः । | ॥हित. १९०टी॥ |
| उवभोग-परिभोगौ | ❋ उवभोगो विगईओ, तंबोलाहार पुप्फफलमाई ।<br>परिभोगे वत्थसुवण्ण-माइयं इत्थिगेहाइं ॥६५॥ | |

| शब्दाः | | उपनिषद् | ग्रन्थाः |
|---|---|---|---|
| | | सइवेलं खलु भोगोऽसणपुप्फाईणमसइमुवभोगो । भोगुवभोगं दुविहा, संकप्पारंभओ अहवा ।।६८।। | ।।संबोध.प्र.श्राव.प्र.अधि.।। |
| | | **ऊ** | |
| **ऊनोदरता** | ※ | द्वात्रिंशतः कवलेभ्यो यथाशक्ति शनैः शनैराहारं न्यूनयति यावदष्टकवलाहार इति । इदं पुरुषापेक्षं, स्त्रीणांस्त्वष्टाविंशतिकवलाहारप्रमाणमतस्तासाम-मष्टाविंशतेरारभ्योनोदरता भावनीया । | ।।हित. १८९टी।। |
| **ऊहः** | ※ | विज्ञातमर्थमवलम्ब्य अन्येषु व्याप्त्या तथाविधवितर्कणं सामान्यज्ञानम् । | ।।ल.वि. सरणदयाणं व्या.।। |
| | ※ | विमलमनोरुपः स्फुरद्रत्नकल्पः समुज्जृम्भमाणरुचिजालजटिलपद्मरागादि-मणिविशेषसमानः । | ।।यो.बिं. २०८टी।। |
| | | **ऋ** | |
| **ऋजुव्यवहारः** | ※ | उजुववहारो चउहा जहत्थभणणं अवंचिगा किरिया । हुंतावायपगासण मेत्तीभावो य सब्भावा ।। ४७ ।। | ।।ध.र.।। |
| **ऋजुव्यवहारी** | ※ | प्रगुणव्यवहारवान् । | ।।ध.र. ४८टी।। |
| **ऋतम्भरः** | ※ | सम्यग्दर्शनपूर्वको देवतापूजादिव्यापारः । ऋतस्य=सत्यस्य भरणात् । | ।।ल.वि. मग्गदयाणं व्या.।। |
| **ऋद्धयः** | ※ | पुरुषार्थोपबृंहणपटवः सम्पदः । | ।।हित. ३५७टी।। |
| **ऋद्धिः** | ※ | सत्कर्म्मानुकूल्येनोपनता सम्पत् । | ।।हित. ३५४टी।। |
| | | **ए** | |
| **एकता** | ※ | अनन्यता । | ।।अ.सा.ष. १२टी।। |
| **एकत्ववितर्काविचार-शुक्लध्यानम्** | ※ | जं पुण सुनिप्पकंपं, निवायसरणप्पईवमिव चित्तं । उप्पायट्ठिइभंगाइयाणमेगंमि पज्ञाए ।।८३।। अवियारमत्थवंजण-जोगंतरओ तयं बिइअसुक्कं । पुव्वगयसुयालंबणमेगत्तवियक्कमवियारं ।।८४।। | ।।संबोध.प्र.ध्यान अधि.।। |
| **एकाकी** | ※ | केवलो धर्मबन्धुरहितः । | ।।उप.मा.(सि.) ३८७ टी।। |
| **एकाग्रं चित्तम्** | ※ | समाधौ स्थिरम् । | ।।अ.सा.स. ३टी।। |
| | ※ | अद्वेषादिगुणवतां नित्यं खेदादिदोषपरिहारात् । सदृशप्रत्ययसंगतमेकाग्रं चित्तमाम्नातम् ।।७।। | ।।अ.सा.स.।। |
| **एकान्तः** | ※ | अव्यभिचारः । | ।।ल.वि. पुरिस. गंध. व्या.।। |
| **एकान्तिकं मिथ्यात्वम्** | ※ | क्षणिकोऽक्षणिको जीवः, सर्वथा सगुणोऽगुणः । इत्यादिभाषमाणस्य, तदैकान्तिकमुच्यते ।।६।। | ।।संबोध.प्र.मिथ्या.अधि.।। |
| **एवंभूतप्रतिमा** | ※ | खुरमुंडो लोएण व, रयहरण पडिग्गहं च गिण्हित्ता । समणब्भूओ विहरइ, मासा इक्कारसुक्कोसं ।।११०।। नियकुलनिस्साए वा, साहम्मियाण भिक्खत्थमुवहिंडे । पडिमापडिवन्नस्स य, दलाहि मे भिक्खमिइवयणो ।।१११।। मुणिवसहिओ बहिया, वसही पुव्वुत्तज्झाणसंजुत्तो । गामंतरे विहारं, साहुव्व करिज्जमपमाओ ।।११२।। | |

| शब्दाः | उपनिषद् | ग्रन्थाः |
|---|---|---|
| | ससहाओ जइ नइवि, संतरिज्ञा वि तहाविहे कज्जे ।<br>भावत्थयसंजुत्तो, दव्वत्थयमित्थ नो कुज्ञा ।।११३।।<br>आसेविऊण एया, पडिवज्जइ सव्वविरइमह देसे ।<br>गिहिभावं पडिवज्जइ, कोवि पुणो जह तहा भावे ।।११४।। | ।।संबोध.प्र.श्राव.प्र.अधि.।। |
| एषणासमिति: | ✻ बायालमेसणाओ, भोयणदोसे य पंच सोहेइ ।<br>सो एसणाए समिओ, आजीवो अन्नहा होइ ।।२९७।। | ।।उप.मा.(सि.)।। |
| | ✻ उग्गमउप्पायणदुविहएसणासुद्धमन्नवत्थाई ।<br>कारणजाए जइणो गिण्हंता एसणासमिया ।। ४७७ ।। | ।।हित.।। |

## ओ

| शब्दाः | उपनिषद् | ग्रन्थाः |
|---|---|---|
| ओघः | ✻ सामान्यव्याख्यानः । | ।।हित. ४०५टी।। |
| ओघदृष्टिः | ✻ सामान्यदर्शनं भवाभिनन्दिसत्त्वविषया,<br>ज्ञानावरणीयादिकर्मक्षयोपशमवैचित्र्याच्चित्रा । | ।।यो. दृ. १४टी।। |
| ओघसंज्ञा | ✻ प्रवृत्तप्रवाहदृष्टिः । | ।।अ.सा.तृ. ६५टी।। |
| | ✻ न लोकं नापि सूत्रं नो गुरुवाचमपेक्षते ।<br>अनध्यवसितं किञ्चित् कुरुते चौघसंज्ञया ।।६६।। | ।।अ.सा.तृ.।। |
| औचित्यप्रवृत्तिः | ✻ परलोकप्रधाना (प्रवृत्तिः) । | ।।ल.वि. प्रस्तावना।। |
| औचित्यम् | ✻ तत्तद्द्रव्यक्षेत्रकालाद्यनुरुपम् । | ।।यो.बिं. ३४७टी।। |
| | ✻ उचितप्रवृत्तिरुपम् । | ।।यो.बि. ३५८टी।। |
| | ✻ दृष्टादृष्टापायपरिहारप्रवृत्तिरुपा । | ।।ल.वि. प्रस्तावना।। |
| औत्सर्गिकम् | ✻ तत्रोत्सर्गेण निर्वृतमौत्सर्गिकं यन्निर्विशेषणं क्रियते । | ।।उप.मा.(सि.) ४०० टी।। |
| औदासिन्यम् | ✻ मध्यस्थ्यपरिणामी तद्भाव औदासिन्यं, सांसारिके सुखे दुःखे चोपेक्षावत्त्वम् । | ।।अ.सा.द्वि. ३६टी।। |
| औपशमिकं सम्यक्त्वम् | ✻ तत्रोपशमो भस्मछन्नाग्निवत् मिथ्यात्वमोहनीयस्यानन्तानुबन्धिनां च क्रोध-मान-माया-लोभानामनुदयावस्था, उपशमः प्रयोजनं प्रवर्त्तकमस्येत्यौपशमिकम् । तच्चानादिमिथ्यादृष्टेः करणत्रयपूर्वकमान्तर्मुहूर्तिकं चतुर्गतिगतस्यापि जन्तोर्भवति । उपशमश्रेण्यारुढस्येवौपशमिकं सम्यक्त्वं भवति । | ।।हित. १५टी।। |
| | ✻ मिच्छत्तस्स उवसमा, उवसमं तं भणंति समयण्णू ।<br>तं उवसमसेढीए, आइमसम्मत्तलाभे वा ।।८५।। | ।।संबोध.प्र. सम्य. अधि.।। |

## क

| शब्दाः | उपनिषद् | ग्रन्थाः |
|---|---|---|
| कटुककषायाः | ✻ कटुकाश्च ते संयमसुखभङ्गहेतुत्वात् कषायाश्च कटुककषायाः । | ।।उप.मा.(सि.) ३६ टी।। |
| कदाग्रहः | ✻ कुत्सित आग्रहो गर्हिताग्रह इति यावत् । | ।।अ.सा.पं. १२७टी।। |
| कन्दर्प्पः | ✻ कामस्तद्धेतुस्तत्प्रधानो वा वाक्प्रयोगः कन्दर्प्पः । | ।।हित. ४२३टी।। |
| करणम् | ✻ क्रियतेऽनेनेति करणं कर्तुः साधकतमं तच्चेह परिणामः । | ।।यो.बिं. २६४टी।। |
| | ✻ पिण्डविशुद्ध्यादि । | ।।उप.मा.(सि.) ४१७ टी।। |

| शब्दाः | उपनिषद् | ग्रन्थाः |
|---|---|---|
| करुणम् | ❊ विवेकीनां कृपाकारणम् । | ।।उप.मा.(सि.) ४६७ टी।। |
| करुणा | ❊ परदुःखसमुच्छेदनप्रवृत्तिः । | ।।यो.बिं. ४१८टी।। |
| | ❊ परदुःखनिवारणबुद्धिः । | ।।ध.र. १२४टी।। |
| कन्दर्पम् | ❊ सामान्येन हास्यम् । | ।।उप.मा.(सि.) ३१६ टी।। |
| कर्म | ❊ क्रियते इति कर्म ज्ञानावरणादि । | ।।उप.मा.(सि.) ४६० टी।। |
| | ❊ संसारफलं ज्ञानावरणादिकम् । | ।।अ.सा.पं. ७२टी।। |
| | ❊ ज्ञानावरणादिरुपं क्रियास्वभावं प्रवर्तनादिव्यापारधर्मवद् भवति । | ।।अ.सा.ष. २५टी।। |
| | ❊ शुभाशुभादृष्टोदयम् । | ।।अ.सा.ष. ४५टी।। |
| कर्मयोगः | ❊ स्थानादिषु स्थानोर्णालक्षणम् । | ।।यो.विं २टी।। |
| | ❊ तपःसंयमादिक्रियारुपोपायः । | ।।अ.सा.पं. ८३टी।। |
| कर्मसम्बन्धयोग्यता | ❊ ज्ञानावरणादिकर्मसंश्लेषनिमित्तभावम् । | ।।यो.बिं. १६४टी।। |
| कलमलकः | ❊ विषयलौल्यात् तदप्राप्तौ चेतसः क्षोभः । | ।।उप.मा.(सि.) ३१८ टी।। |
| कलुषीकृतः कर्मः | ❊ जलमिव पार्थिवरेणुभिः, अनेन बद्धावस्थां लक्षयति । | ।।उप.मा.(सि.) २४९ टी।। |
| कल्पः | ❊ कारणवशात् करणम् । | ।।हित. ५१टी।। |
| कल्पाकल्पम् | ❊ कल्प्यं यत् साधूनामुचितं ततोऽन्यदकल्प्यम् यद्वा कल्पो मासकल्पादिः स्थविरकल्पादिर्वा ततो ऽन्योऽकल्पः, कल्पश्चाकल्पश्च कल्पाकल्पम् । | ।।उप.मा.(सि.) ४१७ टी।। |
| कल्याणः | ❊ परिशुद्धप्रवचनाधिगमातिशायिधर्मकथाऽविसंवादिनिमित्तादिलक्षणः । | ।।यो.बिं. २८८टी।। |
| कल्याणाशययोगः | ❊ मनाग् मुक्त्यनुकूलशुभभावसम्बन्धः । | ।।यो.बिं. १७९टी।। |
| कविः | ❊ कवते गद्यपद्यादिभिः प्रबन्धैर्वर्ण्णनं करोतीति कविः । | ।।हित. २५टी।। |
| कषशुद्धम् | ❊ अविरुद्धं कर्तव्यार्थोपदेशकं वाक्यं, यथा स्वर्गमोक्षार्थिना तपोध्यानब्रह्मचर्य-समितिगुप्तिदानादिशुद्धा क्रिया कर्तव्या इत्येवंभूतो विध्युपदेशो यत्र पदे पदे भूयान् भवेत्, निषेधस्तु न हिंस्यात्सर्वभूतानि, नानृतं वदेदित्यादिरुपौ विधिप्रतिषेधौ तत्र प्रभूततयोपलभ्येते तत्कषशुद्धम् । | ।।अ.सा.च. २१टी।। |
| कषायाः | ❊ कष्यन्ते हिंस्यन्ते प्राणिनोऽस्मिन्ननेनेति वा कषः संसारः कर्म्म वा तस्य आया लाभाः प्राप्तय इति व्युत्पत्तेः । | ।।हित. ४९२टी।। |
| | ❊ क्रोधाभिमानकापट्यतृष्णाभिनिवेशजाः क्रियाः । | ।।अ.सा.पं. १२०टी।। |
| काकिणी | ❊ रुपकाशीतितमभागरुपा । | ।।उप.मा.(सि.) १८८ टी।। |
| काङ्क्षा | ❊ अन्यान्यदर्शनाभिलाषाः शैवसौगतादिदर्शनानामप्यर्हद्दर्शनसाम्येनैवा--वस्थापनम् । | ।।हित. २३टी।। |
| कान्तादृष्टिः | ❊ कान्तायामेतदन्येषां, प्रीतये धारणा परा ।<br>अतोऽत्र नान्यमुन्नित्यं, मीमांसास्ति हितोदया ।। १६२ ।। | ।।यो.दृ.।। |
| कापिलाः | ❊ कपिलस्य शिष्याः कापिला आसूर्यादयः । | ।।अ.सा.च. १०३टी।। |
| | ❊ सांख्याः । | ।।हित. ३१३टी।। |
| कापोतलेश्या | ❊ मूढो आरंभपिओ, पावं न गणेइ सव्वकज्जेसु ।<br>न गणेइ हाणिवुड्ढी, कोहजुओ काउलेसाए ।।१६।। | ।।संबोध.प्र.लेश्या अधि.।। |

| शब्दाः | उपनिषद् | ग्रन्थाः |
|---|---|---|
| कामः | * मदनो वेदोदयजनितविकार इति यावत् । | ।।अ.सा.प्र. १५टी।। |
| कामविनयः | * कामविणओ य कामिणिजणम्मि कामिण चाडुपभिईओ ।<br>एसो लोइयविणओ चउप्पयारो समक्खाओ ।। २१८ ।। | ।।हित.।। |
| कायक्रिया | * आगमबाधयाऽसद्भावतो भावशून्यया, वचनबाधोपेतयावा तथाविधानुष्ठानसम-<br>भिव्यङ्ग्यो दोषक्षयोऽक्षय एव, जन्मान्तरादिनिमित्तयोगतस्तदधिकभावादिति । | ।।यो.श. ८६ टी।। |
| कायक्लेशः | * कायो देहस्तस्य शास्त्राविरोधेन बाधनं क्लेशः । दुर्लभलाभबुद्ध्या कायोत्स-<br>र्गोत्कटिकासनकेशोल्लुञ्चनातापनादिषु दुष्करकृत्येषु वर्त्तनम् । | ।।हित. १८९टी।। |
| कायगुप्तिः | * वीरासणाइएहिं अगणंता गिम्हसिसिरमसगाई ।<br>आयाविंता मुणिणो अपमत्ता हुंति तणुगुत्ता ।। ४८६ ।। | ।।हित.।। |
| कायपातिनः | * कायमात्रेणैव सावद्यक्रियावतारिणः । | ।।यो.बिं. २७१टी।। |
| कायशुध्दिः | * छिन्नंतो भिन्नंतो, पीलिज्जंतो व डज्झमाणो वि ।<br>जिणवज्जदेवयाणं, न नमइ जो तस्स तणुसुध्दी ।।६७।। | ।।संबोध.प्र. सम्य. अधि.।। |
| कायिकमिथ्यात्वत्यागः | * करसन्नभमुहखेवाइएहिं, न य कारवेइ अन्नेणं ।<br>न पसंसइ अन्नकयं, छोडियहसियाइचेट्ठाहिं ।।४८।। | ।।संबोध.प्र. सम्य. अधि.।। |
| कारक-रोचक-दीपक सम्यक्त्वम् | * विहियाणुट्ठाणं पुण, कारगमिह रोअगं तु सद्दहणं ।<br>मिच्छद्दिट्ठी दीवइ, जं तत्ते दीवगं तं तु ।।८३।। | ।।संबोध.प्र. सम्य. अधि.।। |
| कारुदितम् | * ईषद् रुदितम् । | ।।उप.मा.(सि.) ३१९ टी।। |
| कार्योत्सर्गः | * कायः शरीरं, तस्योत्सर्गः कृताकारस्य स्थानमौनध्यानक्रियाव्यतिरेकेण<br>क्रियान्तराध्यासमधिकृत्य परित्याग इत्यर्थः । | ।।ल.वि. अरिहंत चेइ. व्या.।। |
| कालातीतम् | * ग्रहणकालात् पौरुषीत्रयातिवाहनेन । | ।।उप.मा.(सि.) ३६२ टी।। |
| कालादिकारणापेक्षम् | * दुष्मादिस्वरुपालोचनपूर्वकम् । | ।।ध.र. ८१टी।। |
| काव्यभावम् | * श्रृङ्गारादिरससूचकवचनरहस्यम् । | ।।ल.वि. पुक्खर. व्या.।। |
| किं | * (१) क्षेप-अर्थे, "स किं सखा योऽभिद्रुह्यति ?"<br>(२) प्रश्न-अर्थे, "किं ते प्रियं करोति ? "<br>(३) निवारण-अर्थे, "किं ते रुदितेन ?"<br>(४) अपलाप-अर्थे, "किं ते धारयामि ?"<br>(५) अनुनय अर्थे, "किं तेऽहं करोमि ?"<br>(६) अवज्ञान-अर्थे, "कस्त्वामुल्लापयते ?" | ।।ल.वि. प्रस्तावना।। |
| किट्टीकृत-कर्म | * अन्योन्यानुवेधद्वारेण रसलोलीभूतसुवर्णचूर्णवद्, अनेन निधत्तावस्थामाऽऽचष्टे । | ।।उप.मा.(सि.) २४९ टी।। |
| कीर्तिः | * एकदिग्गामिनी लोकान्तरितप्रसिद्धिरुपा वा । | ।।हित. १९२टी।। |
| कुग्रहाः | * दुष्षमाभाविनो मतिमोहविशेषाः । | ।।ध.र. १४४टी।। |
| कुचितिकाग्रहः | * कौटिल्यावेशरुपः । | ।।यो.बिं. ३०८टी।। |
| कुच्छा | * निन्दा । | ।।उप.मा.(सि.) ३२१ टी।। |
| कुतर्कः | * बोधरोगः शमापायः, श्रद्धाभङ्गोऽभिमानकृत् ।<br>कुतर्कश्चेतसो व्यक्तं, भावशत्रुरनेकधा ।। ८७ ।। | ।।यो. दृ.।। |

| शब्दाः | उपनिषद् | ग्रन्थाः |
|---|---|---|
| | * यथावस्थितबोधोपघातकारी, असदभिनिवेशजनक आगमनिरपेक्षश्चेतसः परमार्थरिपुः, अनेकधाऽऽर्यापवादादिकारणेन । | ।।यो. दृ. ८७टी।। |
| कुदेवत्वम् | * किल्बिषिकादित्वम् । | ।।उप.मा.(सि.) २५९ टी।। |
| कुप्यम् | * रुपसुवर्णव्यतिरिक्तं कांस्यलोहताम्रादिभाण्डम् । | ।।हित. ४२३टी।। |
| कुलम् | * एकपुरुषसन्तानः । | ।।हित. १४टी।। |
| | * बहूनां गच्छानामेकजातीयानां समूहः कुलं चन्द्रादि । | ।।हित. १९०टी।। |
| कुलयोगिनः | * योगिनां कुले जाता–स्तद्धर्मानुगताश्च ये । कुलयोगिन उच्यते, गोत्रवन्तोऽपि नापरे ।। २१०।। | ।।यो. दृ.।। |
| कुलिङ्गिनः | * शाक्यादयः । | ।।उप.मा.(सि.) २३२ टी।। |
| कुलिङ्गी | * एकेन्द्रियादि । | ।।हित. ४६९टी।। |
| कुशलचित्तम् | * भगवदर्हत्सु द्वेषाद्यऽभावेन प्रीत्यादिमच्चित्तम् । | ।।यो. दृ. २३टी।। |
| कुशलबुद्धयः | * कल्याणमतयः । | ।।हित. ३३८टी।। |
| कुशलम् | * बुद्धिमान् । | ।।ल.वि. नमो. जिअ. व्या.।। |
| कुशलहेतुः | * अपायपरिहारेण कल्याणहेतुरिति । | ।।यो.श. ५०टी।। |
| कुशीलः | * कुत्सितं शीलमस्येति कुशीलः । | ।।उप.मा.(सि.) ३५३ टी।। |
| कुशीलः | * कालविणयाइरहिओ, नाणकुसीलो य दंसणे इणमो । निस्संकियाइरहिओ, चरणकुसीलो इमो होइ ।।१५।। कोउयभूइकम्मे, पसिणापसिणो निमित्तमाजीवी । कक्ककुरुयाइलक्खण–मुवजीवइ विज्जमंताइं ।।१६।। | ।।संबोध.प्र.गुरु अधि.।। |
| कुशीलचारित्रम् | * आसेवणा कसाए दुहा कुसीलो दुहावि पंचविहो । नाणे दंसण चरणे तवे य अह सुहुमए चेव ।।२।। इह नाणाइकुसीलो उवजीवी होइ नाणमाईणि । अह सुहमो पुण तुस्स एस तवस्सित्ति संसाए ।।३।। | ।।ध.र. १३५टी।। |
| कुशीलजनः | * पार्श्वस्थादिलोकः । | ।।उप.मा.(सि.) २२५ टी।। |
| कुशीलनिर्ग्रंथः | * पडिसेवणाकसाए, दुहा कुसीलो दुहावि पंचविहो । नाणे दंसणचरणे, तवे य अहसुहुमए चेव ।।२४६।। | ।।संबोध.प्र.गुरु अधि.।। |
| कुशीलाः | * सातिचारज्ञानादिगुणाः । | ।।ध.र. १३५टी।। |
| कुहूः | * अमावास्याया रात्रिः । | ।।अ.सा.च. १५२टी।। |
| कूटस्थः | * गुणपर्यायघनवदनुत्पन्नोऽविनष्टस्थिरैकरुपः । | ।।अ.सा.ष. ८९टी।। |
| कृतघ्नः | * नरावकरः । | ।।हित. ३८५टी।। |
| | * हणइ किर परकयं जं तेण कयग्घो इमु त्ति भणइ जणो । अप्पकयं चिय सुकयं निहणइ एसु त्ति मह बुद्धी ।। ३८७ ।। | ।।हित.।। |
| कृतघ्नाः | * नृजघन्याः । | ।।हित. ३८४टी।। |
| कृतज्ञः | * परेण कृतमुपकारमऽविस्मृत्या जानातीति कृतज्ञः । | ।।ध.र. २६टी।। |
| | * बहु मन्नइ धम्मगुरुं परमुवयारित्ति तत्तबुद्धीए । | |

| शब्दाः | | उपनिषद् | ग्रन्थाः |
|---|---|---|---|
| | | तत्तो गुणाण वुड्ढी गुणारिहो तेणिह कयन्नू ।। २६ ।। | ।।ध.र.।। |
| | ✻ | स स्तोकमप्युपकारमैहिकं पारत्रिकं वा न विस्मरति । | ।।ध.र. ७टी।। |
| कृतज्ञता | ✻ | परकृतोपकारपरिज्ञानम् । | ।।यो.बिं. १२६टी।। |
| | ✻ | उपकाराविस्मृतिः । | ।।ध.र. १२९टी।। |
| कृतव्रतकर्मः | ✻ | विणयबहुमाणसारं गीयत्थाओ करइ वयसवणं । | |
| | | भंगयभेयइयारे वयाण सम्मं वियाणाइ । ३५ ।। | |
| | | गिण्हइ गुरुण मुले इत्तरमियरं व कालमह ताइं । | |
| | | आसेवइ थिरभावो आयंकुवसग्गसंगेवि । ।। ३६ ।। | ।।ध.र.।। |
| कृतागमः | ✻ | कृतो विहितः सामर्थ्यादात्मन्यागमः श्रुतं येन स कृतागमः । | ।।उप.मा.(सि.) १६४ टी।। |
| कृष्णलेश्या | ✻ | वेरेण निरणुकंपो, अइचंडो दुम्मुहो खरो फरुसो । | |
| | | किण्हाइ अणज्झप्पो, वहकरणरओ य तक्कालं ।।१४।। | ।।संबोध.प्र.लेश्या अधि.।। |
| केलिकिलत्तणम् | ✻ | केलिना क्रीडया किरति विक्षिपति परानिति केलिकिलस्तद्भावस्तत्त्वम् । | ।।उप.मा.(सि.) ३१६ टी।। |
| केवलज्ञानम् | ✻ | केवलनाणं पुण सव्वदव्वपज्ञायकालअक्खलियं । | |
| | | एगसरुवमणंतं अप्पडिवाई निरावरणं ।। ९८ ।। | ।।हित.।। |
| | ✻ | अस्यैवात्मनस्तथाभव्यत्ववशात् स्फटिकवलयवदपुनः सङ्घटनाय विघटिते | |
| | | घातिकर्म्मचतुष्टये अनन्तवीर्यानन्दात्मकं यद् आत्मस्वरुपमुन्मीलति तत् | |
| | | केवलज्ञानमित्युच्यते । | ।।हित. ९८टी।। |
| | ✻ | करामलकवत्सर्वभावावभासिनिरावरणज्ञानम् । | ।।अ.सा.द्वि. ६७टी।। |
| केवलम् | ✻ | सकलद्रव्यपर्यायगोचरत्वात् परिपूर्णं ज्ञानमुपयोगविशेषः । | ।।यो.बिं. ३६७टी।। |
| कौटस्थ्यम् | ✻ | कूटस्थस्य भावः कौटस्थ्यं उत्पादव्ययनिरपेक्षैकपरिणामत्वं । | ।।अ.सा.तृ. ३४टी।। |
| कौलाः | ✻ | नास्तिका योगिदर्शनदृश्या इति । | ।।हित. ३१३टी।। |
| कौलाचार्याः | ✻ | चार्वाकाः । | ।।हित. ३५३टी।। |
| क्रमः | ✻ | कालभेदेन क्रियाणां भवनं करणं वा । | ।।अ.सा.च. ८९टी।। |
| क्रिया | ✻ | प्रवृत्तिनिवृत्तिरुपव्यपारः । | ।।अ.सा.ष. ९९टी।। |
| क्रूरः | ✻ | क्लिष्टभावः क्रोधादिदूषितपरिणामः । | ।।ध.र. १२टी।। |
| क्लीबः | ✻ | हीनसत्वः । | ।।उप.मा.(सि.) ३५६टी।। |
| क्लीबप्रकृतयः | ✻ | सत्त्वशून्यचेतांसि । | ।।हित. २३६टी।। |
| क्लेशः | ✻ | मोहोफलो रागादिगणः । | ।।अ.सा.पं. ७२टी।। |

## ख

| | | | |
|---|---|---|---|
| खण्डना | ✻ | एकादिमूलगुणविराधनम् । | ।।उप.मा.(सि.) २५४ टी।। |
| खपुरीकृत-कर्म | ✻ | गाढं तद्भावमाऽऽपन्नो गुन्दादिरुपतां गतः तदन्यद्रव्यवत्,अमुना निकाचितावस्थां | |
| | | सूचयति । | ।।उप.मा.(सि.) २४९ टी।। |
| खराः | ✻ | कर्मणा निष्ठुराः । | ।।उप.मा.(सि.) १५१ टी।। |
| खेलः | ✻ | श्लेष्मा । | ।।उप.मा.(सि.) ३०० टी।। |

| शब्दाः | उपनिषद् | ग्रन्थाः |
|---|---|---|
| | **ग** | |
| **गंभीरः** | ✻ अनुत्तानः । | ।।यो.बिं. ३१७टी।। |
| | ✻ अतुच्छः परैरलब्धमध्य इत्यर्थः । | ।।उप.मा.(सि.)१० टी।। |
| **गंभीरचित्तः** | ✻ अनुपलक्ष्यमाणहर्षविषादादिविकारः । | ।।यो.बिं. ४०३टी।। |
| **गच्छः** | ✻ एकाचार्यप्रणेयः साधुसमूहः । | ।।हित. १९०टी।। |
| | ✻ सद्गुर्वधिष्ठितसुसाधुगणः । | ।।उप.मा.(सि.) ५२५ टी।। |
| **गड्डुरिकप्रवाहम्** | ✻ गड्डुरिका एढकास्तासां प्रवाहः सञ्चरणं गड्डुरिकप्रवाहम्, एकस्या अनुमार्गेण सर्वासां गमनम् । | ।।ध.र. ६८टी।। |
| **गणः** | ✻ मल्लादि-महाजनसमुदायो वा । | ।।हित. १४टी।। |
| | ✻ कुलसमुदायो गणः कोटिकादिः । | ।।हित. १९०टी।। |
| | ✻ साधुसंहतिरुपः । | ।।उप.मा.(सि.) ८ टी।। |
| **गणधरः** | ✻ देवदानवमानवादिमाननीयमहिमा तीर्थकराग्रिमशिष्यः । | ।।यो.बिं. २८९टी।। |
| | ✻ तीर्थकृदनन्तरशिष्यः । | ।।हित. १४३टी।। |
| **गणधरेन्द्राः** | ✻ गणधराः सामान्यसूरयस्तेषु प्राग्भवार्जितेन तीर्थकृन्नामकर्म्मणः किञ्चिदूनेन कर्म्मणा समुत्पन्नास्तीर्थ कृत्कल्पपरमैश्वर्येणेन्द्रा इवेन्द्राः । | ।।हित. ५टी।। |
| **गणावच्छेदकः** | ✻ संपुण्णजोगवाही, कालग्गहणप्पभिइअणुट्ठाणे ।<br>उज्झमइ उज्झमावइ, जहजुग्गं सो गणी गच्छे ।।१९३।।<br>उद्धावणा पहावण, खित्तोवहिमग्गणेसु अविसाई ।<br>सुत्तत्थतदुभयविऊ,गुणसिद्धो एरिसो अ गणी ।।१९४।। | ।।संबोध.प्र.गुरु अधि.।। |
| **गणिम-धडिम-मिज्ज-पारिच्छिण्णम्** | ✻ गणिमं जाईफलपुप्फलाइ धडिमं च कुंकुमगुडाई ।<br>मिज्जं चुप्पडलोणाइ रयणवत्थाइ परिछिज्जं ।।१।। | ।।हित. ४२३टी।। |
| **गणिम-धरिममेय-पारिच्छेद्यम्** | ✻ गणिमं जाइफल-फोफलाइ, धरिमं तु कुंकुमगुडाइ ।<br>मेज्जं चोप्पडलोणाइ, रयणवत्थाइ परिच्छेज्जं ।।५३।। | ।।संबोध.प्र.श्राव.प्र.अधि.।। |
| **गतानुगतिकम्** | ✻ अविचारितचारिणम् । | ।।ध.र. ६८टी।। |
| **गमाः** | ✻ अर्थमार्ग्गाः । | ।।ल.वि. प्रस्तावना।। |
| **गम्भीराः** | ✻ अतुच्छत्वात् परैरलब्धमध्या इति । अथवा सुखदुखोद्गिरणार्थं शरीराह्लादपरितापकथनप्रयोजनमधिकृत्योदधय इव गम्भीराः । पररमै निष्कारणं तदकथनान्नतुच्छा इति । | ।।उप.मा.(सि.) ७८टी।। |
| **गरानुष्ठानम्** | ✻ गरः कुद्रव्यसंयोगेन निष्पन्नं कालान्तरे प्राणापहारि विषं तद्वदनुष्ठानमपि गरानुष्ठानमुच्यते । | ।।अ.सा.तृ. ५८टी।। |
| | ✻ दिव्यभोगाभिलाषेण कालान्तरपरिक्षयात् ।<br>स्वादृष्टफलसंपूर्तेर्गरानुष्ठानमुच्यते ।।६१।। | ।।अ.सा.तृ.।। |
| | ✻ निदानचिन्तनरुपमिति यावत् । | ।।अ.सा.तृ. ६१टी।। |
| | ✻ दिव्यभोगाभिलाषेण, गरमाहुर्मनीषिणः ।<br>एतद्विहितनीत्यैव, कालान्तरनिपातनात् ।। १५७ ।। | ।।यो.बि.।। |

| शब्दाः | उपनिषद् | ग्रन्थाः |
|---|---|---|
| गर्वितः | * स्वगुणोत्सेकवान्, आत्मश्लाघापरो वा । | ।।उप.मा.(सि.) २७ टी।। |
| गांभीर्यम् | * अलक्षितविकाररुपम् । | ।।यो.बिं. २४७टी।। |
| गीतार्थः | * गीतं सूत्रमर्थश्च व्याख्यानं तौ द्वौ वेत्ति यः स तथा । | ।।अ.सा.द्वि. ७५टी।। |
| | * गीयं भन्नइ सुत्तं अत्थो तस्सेव होइ वक्खाणं ।<br>गीएण य अत्थेण य संजुत्तो होइ गीयत्थो ।। ३ ।। | ।।ध.र. ३५टी।। |
| | * विदितागमतत्वः । | ।।ध.र. ८५टी।। |
| | * संसारवृद्धिभिरवो विदितागमतत्त्वः । | ।।ध.र. ९९टी।। |
| | * सम्यक् समयसागरावगाहनावगतज्ञानानुयोगरहस्यः । | ।।हित. १०४टी।। |
| | * अधिगतागमः | ।।उप.मा.(सि.) ३७६टी।। |
| | * विदितागमः । | ।।उप.मा.(सि.) ३९५टी।। |
| | * गृहीतागमसारः पुरुषः । | ।।उप.मा.(सि.) ५२७टी।। |
| | * गीयं कप्पनिसीहाइ सुत्तं, अत्थं च तदुभयविहिन्नू ।<br>सो गीयत्थो अन्नो, समवायधरोऽणुओगधरो ।।३१२।। | ।।संबोध.प्र.गुरु अधि.।। |
| गीतार्थपारतन्त्र्यम् | * आगमविदाज्ञा । | ।।ध.र. ८९टी।। |
| गुणः | * अप्राधान्यं गौणतेति यावत् । | ।।अ.सा.पं. २४टी।। |
| गुणम् | * सम्यग्दर्शनविरत्यादिकम् । | ।।ध.र. १९टी।। |
| गुणरागी | * गुणेषु बहुमानवान् । | ।।ध.र. ६टी।। |
| | * गुणेषु धार्मिकलोकभाविषु रज्यत्येवंशीलो गुणरागी । | ।।ध.र. १९टी।। |
| | * गणरागी गुणवंते बहु मन्नइ निग्गुणे उवेहेइ ।<br>गुणसंगहे पवत्तइ संपत्तगुणं न मयलेइ ।। १९ ।। | ।।ध.र.।। |
| गुणवन्तः | * गुरुगुणभाजो यतिश्रावकादिनः । | ।।ध.र. १९टी।। |
| गुणवान् | * सज्झाए करणंमि य विणयम्मि य निच्चमेव उज्जुत्तो ।<br>सव्वत्थणभिनिवेसो वहइ रुइं सुट्ठुजिणवयणे ।। ४३ ।। | ।।ध.र.।। |
| गुणव्रतम् | * उड्ढहोतिरियदिसिं, चाउम्मासाइकालमाणेण ।<br>गमणपरिमाणकरणं, गुणव्वयं होइ पढममिह ।। ४२५ ।। | ।।हित.।। |
| गुणश्रेणिः | * ज्ञानादिगुणपद्धतिः । | ।।उप.मा.(सि.) ६५टी।। |
| गुणसंपत् | * परिपूर्णधर्मसाधनसामग्री । | ।।ध.र. १२५टी।। |
| गुणसंप्रयोगम् | * गुणै – र्ज्ञानादिभिः सह संबन्धम् । | ।।ध.र. १८टी।। |
| गुणस्थानम् | * गुणानां सज्ज्ञानादीनां स्थानं भाजनम् । | ।।अ.सा.प्र. ३८टी।। |
| गुणाः | * ज्ञानादयः । | ।।उप.मा.(सि.) ३१५टी।। |
| | * वस्तुधर्माः शुभाशुभस्वरुपाः । | ।।ध.र. १टी।। |
| | * धर्मवर्तनप्रकाराः । | ।।अ.सा.स. ४६टी।। |
| | * पुरुषार्थोपयोगिजीवाजीवधर्म्माः । | ।।ल.वि.पुरिस.पुण्ड.व्या.।। |
| गुणानुरागः | * गुणपक्षपातः । | ।।ध.र. ७९टी।। |
| गुणायुक्तः | * गुणेषु प्रतिदिनक्रियासु आयुक्तोऽप्रमादी गुणायुक्तः । | ।।उप.मा.(सि.) ३८८टी।। |

| शब्दाः | उपनिषद् | ग्रन्थाः |
|---|---|---|
| गुप्तिः | ✻ प्रवीचाराप्रवीचाररुपा । | ।।ध.र. ११३टी।। |
| गुरुः | ✻ धर्माचार्यः । | ।।हित. २९०टी।। |
| | ✻ धर्मोपदेशदायकः । | ।।अ.सा.प्र. ६टी।। |
| | ✻ धर्मोपदेशदः । | ।।अ.सा.च. १५७टी।। |
| | ✻ अन्वर्थव्यवस्थितशब्दार्थः गृणाति शास्त्रार्थमिति गुरुरित्यन्वर्थः । | ।।यो.श. २४टी।। |
| | ✻ शास्त्रार्थं गृणातीति गुरुः । | ।।ध.र. १३०टी।। |
| | ✻ धर्मज्ञो धर्मकर्त्ता च सदा धर्मप्रवर्त्तकः । सत्वेभ्यो धर्मशास्त्राणां देशको गुरुरुच्यते ।। १ ।। अपरिस्सावी सोमो संगहसीलो अभिग्गहमईओ । अविकत्थणो अचवलो पसन्नहियओ गुरु होइ ।। २ ।। | ।।ध.र. ४९टी।। |
| | ✻ गृणाति शास्त्रार्थमिति गुरुः । | ।।उप.मा.(सि.) ७ टी।। |
| गुरुकुलवासः | ✻ गुरुपदच्छायासेवनम् । | ।।ध.र. १२७टी।। |
| | ✻ गुर्वधिष्ठितगच्छमध्यस्थानम् । | ।।उप.मा.(सि.) ७५ टी।। |
| गुरुपदसेवानिरतः | ✻ गुरवस्तेषां पदानि चरणास्तेषां सेवा सम्यगाराधनम्, न पुनराऽऽसन्नवर्तित्व-मात्रम्, तस्यां निश्चयेन रतो निरतो नैहिकफलार्थमेव, न च क्वचिन्निष्ठुरो-क्तिभिर्निर्भर्त्सितोऽपि गुरुं जिहासति, केवलं गुरुषु बहुमानमेव विधत्ते । | ।।ध.र. १२६टी।। |
| गुरुबहुमानः | ✻ मानसप्रीत्यतिशयः । | ।।ध.र. १३३टी।। |
| गुरुमूलम् | ✻ गीतार्थगुरुजनोपान्तम् । | ।।हित. ६५टी।। |
| गुरुयोगः | ✻ गुरुणा यथार्थाभिधानेन स्वपरतन्त्रविदा परहितनिरतेन पराशयवेदिना सम्यक्सम्बन्धः । | ।।ल.वि. नमुत्थुणं व्या.।। |
| गुरुवचनम् | ✻ सामान्येन सामाचारीप्ररुपकमाऽऽचार्यवचः । | ।।उप.मा.(सि.) ६१टी।। |
| गुरुवचनसाधुप्रतिपत्तिः | ✻ तीर्थकर–गणधरादिवचसा शोभनप्रतिज्ञा । | ।।उप.मा.(सि.) २४५टी।। |
| गुरुवर्गः | ✻ गौरव्यलोकसमुदायरुपः । | ।।यो.बिं. ११०टी।। |
| गुरुशुश्रुषा | ✻ सेवाए कारणेण य संपायणभावओ गुरुजणस्स । सुस्सूसणं कुणंतो गुरुसुस्सूसो हवइ चउहा ।। ४९ ।। | ।।ध.र.।। |
| गुरुलाघवचिन्ता | ✻ गुणदोषविषया गुरुलघुभावमीमांसा । | ।।यो.बिं. २१७टी।। |
| गुर्वनुपदेश्यः | ✻ उपदेशमर्हतीत्युपदेश्यः, ततोऽन्योऽनुपदेश्यः, गुरोरनुपदेश्यो गुर्वनुपदेश्यः । | ।।उप.मा.(सि.) २६टी।। |
| गौरवम् | ✻ अभिमानः स्वोत्कर्षपरापकर्षमाहात्म्यवृद्धेरिच्छारुपः । | ।।अ.सा.प्र. २९टी।। |
| ग्रंथिः | ✻ गंठित्ति सुदुब्भेओ, कक्खडघणरुढगूढगंठिव्व । जीवस्स कम्मजणिओ, घणरागद्दोसपरिणामो ।।६।। | ।।संबोध.प्र.सम्य. अधि.।। |
| ग्रन्थः | ✻ शास्त्रविशेषः । | ।।अ.सा.स. ४७टी।। |
| ग्रहणम् | ✻ शास्त्रार्थमात्रोपादानम् । | ।।ल.वि.सरणदयाणं व्या.।। |
| ग्रहम् | ✻ अतत्त्वाभिनिवेशम् । | ।।यो.बिं. ३१७टी।। |

## घ

| शब्दाः | उपनिषद् | ग्रन्थाः |
|---|---|---|
| घातिकर्म्मक्षयः | ✻ ज्ञानावरणाद्यदृष्टचतुष्टयप्रलयः । | ।।ल.वि.तित्थयराणं व्या.।। |

## च

| | | |
|---|---|---|
| **चक्षुदाः** | * चक्षु=विंशिष्टमेवात्मधर्म्मरुपं (उपयोगविशेषतया जीवस्वभावभूतं) तत्त्वा-वबोधनिबन्धनश्रद्धास्वभावं (जीवादिपदार्थप्रतीतिकारणश्रद्धालक्षणं) गृह्यते, तं ददातीति चक्षुदाः । | ।।ल.वि. चक्खुदयाणं व्या.।। |
| **चपलाः** | * चित्त-कायाभ्यां तरलाः, चित्तेनास्थिरतयाऽपरापरशास्त्रपल्लवग्राहिणः, कायेनाऽसमञ्जसगात्रविक्षेपिणः । | ।।उप.मा.(सि.) ७४टी।। |
| **चरणम्** | * यतिधर्मः, षट्कायसंयमः , चारित्रमोहनीयकर्मक्षयोपशमश्च । | ।।ध.र. ११०टी।। |
| | * व्रतादि । | ।।उप.मा.(सि.) ४१७टी।। |
| | * समतास्थितिरुपचारित्रम् । | ।।अ.सा.तृ. ११४टी।। |
| **चरमावर्तः** | * चरमोऽन्त्यो यः पुद्गलपरावर्तः, एकपुद्गलपरावर्तपरिमाणशेषसंसारकालः । | ।।अ.सा.तृ. ७३टी।। |
| **चारणलब्धिः** | * यया संख्यातीतयोजनानि यावद्गमनमार्गेन गन्तुं प्रत्यागन्तुं च सामर्थ्यं भवति । | ।।अ.सा.द्वि. १०३टी।। |
| **चारित्रभावना** | * जीवस्य नवकर्मानादानं पूर्वकृतनिर्जरणं शुभकर्मादानं च चारित्राद् भवतीति चारित्रभावना । | ।।अ.सा.पं. १०२टी।। |
| | * नवकम्माणायाणं, पोराणविणिज्जरं सुभादाणं ।<br>चारित्तभावणाए, झाणमयत्तेण य समेइ ।।३३।। | ।।संबोध.प्र.ध्यान अधि.।। |
| **चारित्रभेदिनी कथा** | * न संभवन्तीदानीं महाव्रतानि, ज्ञानदर्शनाभ्यां तीर्थं प्रवर्त्तत इति ज्ञानदर्शन-कृत्येष्वेवादरो विधेय इति । | ।।ध.र. २०टी।। |
| **चारित्रम्** | * महाव्रतसमितिगुप्तिक्षान्त्यादिरुपम् | ।।हित. २२०टी।। |
| | * अध्यात्मादिः । अध्यात्मम्, भावना, आध्यानम्, समता, वृत्तिसंक्षयश्च । | ।।यो.विं ३टी।। |
| | * क्रियात्मकसंयमम् । | ।।अ.सा.द्वि. ५७टी।। |
| | * स्वस्वभावे स्थैर्यम् । | ।।अ.सा.ष. ६टी।। |
| **चारित्रविनयः-तपविनयः उपचारविनय** | * चरणे तवम्मि य इमो विणओ तेसिं जहुत्तकरणं जं ।<br>उवयारिओ उ विणओ आयरियाईसु इय नेओ ।। २२१ ।। | ।।हित.।। |
| **चारित्रिणः** | * शुद्धचारित्रवन्तः । | ।।ध.र. ८६टी।। |
| **चारित्री** | * मग्गाणुसारी सद्धो, पण्णवणिज्जो कियापरो चेव ।<br>गुणरागी सक्कारंभसंगओ तह य चारित्ती ।। १५ ।। | ।।यो.श. ।। |
| **चारिसञ्जीवनीचारन्यायः** | * चारेः प्रतीतरुपाया मध्ये संजीवन्यौषधिविशेषश्चारि संजीवनी तस्याश्चारश्चरणं स एव न्यायो दृष्टान्तश्चारिसंजीवनीचारन्यायः । | ।।यो.बिं. ११९टी।। |
| **चार्वाकः** | * चर्वति भक्षयति विनाशयतीति चार्वाकः । | ।।अ.सा.च. ६८टी।। |
| **चार्वाकदर्शनम्** | * सर्वभक्षिनास्तिकमतम् । | ।।अ.सा.च. ८६टी।। |
| **चालनम्** | * पक्षविचारणम् । | ।।अ.सा.द्वि. ७२टी।। |
| **चिदानन्दमयम्** | * चिज्ज्ञानं तस्य तद्रुपो वा आनन्दः सकलद्वन्दवर्जितसहजाह्लादस्तेन प्रचुरस्तन्मयः । | ।।अ.सा.द्वि. ७९टी।। |
| **चिदानन्दम्** | * ज्ञानरुपपरमप्रमोदमयं पदम् । | ।।अ.सा.च. १०२टी।। |
| **चिन्तनम्** | * एकाग्रतया समालोचनम् । | ।।अ.सा.पं. ८७टी।। |

| शब्दाः | उपनिषद् | ग्रन्थाः |
|---|---|---|
| चिन्ता | ❊ शरीरधनविषयादिष्वार्तरौद्रध्यानानुगतविचारणारुपा भवति । | ।।अ.सा.पं. ८४टी।। |
| | ❊ अभिलाषः । | ।।ल.वि.नमुत्थुणं व्या.।। |
| चिन्तितम् | ❊ सूक्ष्मालोचनम् । | ।।उप.मा.(सि.) २६टी।। |
| चिररुढम् | ❊ अज्ञातादिभावम् । | ।।ध.र. ९९टी।। |
| चेतनम् | ❊ आत्मनो विज्ञानं गीयते। | ।।यो.बिं. ४४८टी।। |
| चेतना | ❊ चिद्रुपपरिणितिः । | ।।अ.सा.ष. ४५टी।। |
| चेतसो न्यासः | ❊ अभिलाषातिरेकाच्चैत्यवन्दने एव पुनः पुनर्मनसः स्थापनम् । | ।।ल.वि. प्रस्तावना।। |
| चेष्टा | ❊ कायवाङ्मनोव्यापाररुपा द्रव्यक्रिया । | ।।यो.विं १टी।। |
| चैतन्यम् | ❊ आत्मनो रुपं चैतन्यं, पुरुषस्य स्वरुपं इति वचनप्रामाण्यात् । | ।।यो.बिं. ४२७टी।। |
| चैत्यम् | ❊ चित्तम्-अन्तःकरणं, तस्य भावः कर्म्म वा चैत्यम् । | ।।ल.वि. अरिहंत चेइ. व्या.।। |
| चैत्यवंदनम् | ❊ लोकोत्तरकुशलपरिणामहेतुः, यथासंभवं ज्ञानावरणीयादिस्वभावकर्म्मक्षय-क्षयोपशमफलः परिणामः । | ।।ल.वि. प्रस्तावना।। |
| चैत्यवन्दनविधिः | ❊ त्रिकदशकाराधनारुपः । | ।।ध.र. ६९टी।। |
| चैत्यानि | ❊ अर्हद्‌बिम्बलक्षणानि । | ।।उप.मा.(सि.) २३०टी।। |
| | ❊ अर्हदालयाः । | ।।हित. ३५२टी।। |
| | ❊ प्रतिमालक्षणानि अर्हच्चैत्यानि प्रशस्तसमाधचित्तोत्पादकत्वात् । | ।।ल.वि.अरिहंत चेइ. व्या.।। |
| चोदना | ❊ उत्तमप्यकुर्वति असकृत् खरमधुरवचनैः प्रवर्तनं चोदना । | ।।उप.मा.(सि.) १५५टी।। |
| | ❊ व्युत्पन्नमतित्वाच्चालना । | ।।उप.मा.(सि.) १५७टी।। |

## छ

| | | |
|---|---|---|
| छद्मस्थाः | ❊ विशिष्टज्ञानातिशयरहिताः । | ।।हित. ४६८टी।। |
| छाया | ❊ लोकमध्ये उन्नतिः । | ।।उप.मा.(सि.) ३२७ टी।। |
| छिद्रप्रेक्षिणः | ❊ मत्सरितया गुरोरपि दोषस्थाननिरीक्षणशीलाः । | ।।उप.मा.(सि.) ७४ टी।। |
| छेदः | ❊ तपसा दुर्दमस्य अहोरात्रपञ्चकादिना क्रमेण श्रमणपर्यायच्छेदनम् । | ।।हित. १९०टी।। |
| छेदशुद्धम् | ❊ तत्र विधिप्रतिषेधयोः साफल्यताकारिणी व्रतादेःपालनात्मकक्रियोक्तिः, शुद्धा भिक्षा, निर्दोषा बाह्यचेष्टा इत्यादिरुपात्मकोपदेशो यत्र प्रचुरो भवति, तच्छास्त्रं छेदशुद्धं ज्ञेयम् । | ।।अ.सा.च. २१टी।। |
| छेदोपस्थापनं चारित्रम् | ❊ छित्तू णियपरियागं, पोराणं जो ठवेति अप्पाणं ।<br>धम्मंमि पंचजामे, छेओवट्ठावणं स खलु ।।२५७।। | ।।संबोध.प्र.गुरु अधि.।। |

## ज

| | | |
|---|---|---|
| जडः | ❊ विगतबोधो मूर्खः । | ।।अ.सा.पं. १७१टी।। |
| जनः | ❊ लोक उत्तममध्यमाधमलक्षणः । | ।।हित. १४टी।। |
| जननीसम-श्राद्धः | ❊ चिंतइ जइकज्जाइं न दिट्ठखलिओ वि होइ निन्नेहो ।<br>एगंतवच्छलो जइजणस्स जणणीसमो सड्ढो ।। १ ।। | ।।हित. ३०१टी ।। |
| जनपदत्यागम् | ❊ भवानुगतिकलोकव्यवहारपरित्यागम् । | ।।यो.बिं. ४१०टी।। |
| जनप्रियत्वम् | ❊ शिष्टलोकवल्लभभावः । | ।।यो.बिं. ५२टी।। |

| शब्दाः | उपनिषद् | ग्रन्थाः |
|---|---|---|
| जपः | ✻ जपःपुनः पुनः परिवृत्तिरुपः, सन्मंत्रविषयः, ऋषभादिदेवतास्तवरुपः प्रणवनमः-शब्दादिस्वाहापर्यन्तः । | ।।यो.बि. ३८२टी।। |
| | ✻ पञ्चविधस्वाध्यायरुपः । | ।।हित. ३७७टी।। |
| जयः | ✻ विबन्धकाभिभवः, विघ्नजयोऽनिवृत्तिकरणम् । | ।।ल.वि. मग्गदयाणं व्या.।। |
| जरा | ✻ वयोहानिः । | ।।हित. ६टी।। |
| जल्लः | ✻ देहमलः | ।।उप.मा.(सि.) ३०० टी।। |
| जातिवादी | ✻ सामान्यवस्तुवादी । | ।।अ.सा.पं. ७१टी।। |
| जिज्ञासा | ✻ योगमार्गं ज्ञातुमिच्छा । | ।।यो.बिं. १०१टी।। |
| | ✻ ज्ञातुमिच्छा तत्त्वविचारणा । | ।।अ.सा.तृ. २३टी।। |
| | ✻ वास्तविकधर्मादीनां ज्ञातुमिच्छा । | ।।अ.सा.तृ. ८५टी।। |
| | ✻ सविशेषनिर्धारणीयवस्तुस्वरूपं ज्ञातुमिच्छा । | ।।अ.सा.पं. ७६टी।। |
| | ✻ तत्र धर्मं प्रति मूलभूता वन्दना, अथ ''कोऽस्यार्थः' इति ज्ञातुमिच्छा जिज्ञासा । | ।।ल.वि. नमुत्थुणं व्या.।। |
| जिनधर्ममहारत्नम् | ✻ स्वर्गापर्गादिसुखश्रीसंपादनावन्ध्यनिबन्धनम् । | ।।ध.र. १टी।। |
| जिनपूजा | ✻ माल्यादिभि-र्भगवद्बिम्बाभ्यर्चनम् । | ।।उप.मा.(सि.) ४९१ टी।। |
| जिनप्रवचनम् | ✻ आचाराङ्गादिद्वादशाङ्गरुपः । | ।।हित. ४०८टी।। |
| जिनप्रवचने स्थिरत्वम् | ✻ शाक्यौलूक्यादिकुप्रावचनिकानां तथाविधाद्भुतभूपतिप्रतिपत्तिप्रभृतिप्रभाव-दर्शने जिनशासनं प्रति यद्वा मिथ्यात्वमोहनीयोदयवशात् कस्यापि निःप्रकम्पता । जिनशासनं प्रति विप्रतिपद्यमानस्य सैद्धान्तिकविशुद्धहेतु-दृष्टान्तबलेन पुनः स्थैर्योत्पादनम् । | ।।हित. २५टी।। |
| जिनमतम् | ✻ अर्हच्छासनम् । | ।।ध.र. ४टी।। |
| | ✻ मदगदौषधकल्पं सर्वज्ञवचनम् । | ।।उप.मा.(सि.) ३८१टी।। |
| जिनमतरहस्यम् | ✻ जीवाजीवादितत्त्वपरिज्ञानम् । | ।।हित. ४०२टी।। |
| जिनमुद्रा | ✻ चत्तारि अंगुलाइं, पुरओ ऊणाहिं जत्थ पच्छिमओ ।<br>पायाणं उस्सग्गो, एसा पुण होइ जिणमुद्दा ।।१।। | ।।ल.वि. प्रणिधान सूत्रम्।। |
| जिनवचनश्रुतिसकर्णाः | ✻ अर्हद्भाषितस्य कषायविपाकदर्शिनो या श्रुतिः श्रवणं तया सकर्णाः सश्रुतिका इति जिनवचनश्रुतिसकर्णाः । | ।।उप.मा.(सि.) ४३टी।। |
| जिनवराः | ✻ श्रुतादिजिनप्रधानाः । | ।।ल.वि. चतुर्विंशति व्या.।। |
| जिनशासनम् | ✻ दुरन्तसंसृतिसमुद्रवदुःखलक्षविमोक्षक्षमं सर्वविन्मूलत्वेनेतरकुशासनैर्दुर्द्धर्षम् । | ।।हित. ३५३टी।। |
| जिनसमयः | ✻ अर्हदागमः । | ।।हित. १९७टी।। |
| जिनसमयसागरः | ✻ जिनसमयः सिद्धान्तः स एव सूत्रार्थगम्भीरनीरपूरपूरितत्वेन, स्फुरद्दृष्टान्त-हेतुनयविचित्ररत्नराजिविराजितत्वेन मन्दमेधादुर्गमभङ्गतरङ्गसङ्गत्वेन च सागर इव सागरः । | ।।हित. ६टी।। |
| जिनाः | ✻ रागादिजेतारः । | ।।ध.र. ६९टी।। |
| | ✻ समग्रान्तरङ्गरिपुवर्गविजेतारः । | ।।हित. १टी।। |
| | ✻ रागद्वेषकषायेन्द्रियपरिषहोपसर्गघातिकर्म्मजेतृत्वात् । | ।।ल.वि.जिणा.जाव.व्या.।। |

| शब्दाः | उपनिषद् | ग्रन्थाः |
|---|---|---|
| | * रागादिजेतारः । | ।।ल.वि.चतुर्विंशति व्या.।। |
| जिनागमः | * जिनैः प्रणीतः सिद्धान्तो जिनागमः । | ।।ध.र. ६९टी।। |
| | * अर्हच्छासनम् । | ।।ल.वि. प्रस्तावना।। |
| जिनेन्द्रचन्द्राः | * जिना अवधिजिनादयस्तेषु विशिष्टज्ञानपरमैश्वर्यशालित्वेनेन्द्राः केवलिनस्तेष्वपि विशिष्टाष्टप्रातिहार्यादिदेदीप्यमानत्वेन चन्द्रास्तीर्थकृतः । | ।।हित. ८३टी।। |
| जीतम् | * यत्संविग्नजनाचीर्णं,श्रुतवाक्यैरबाधितम् ।<br>तज्जीतं व्यवहाराख्यं, पारम्पर्यविशुद्धिमत् ।। १ ।।<br>यदाचीर्णमसंविग्नैः, श्रुतार्थानवलम्बिभिः ।<br>न जीतं व्यवहारस्तदन्धसन्ततिसम्भवम् ।। २ ।।<br>तस्माच्छ्रुतानुसारेण, विध्येकरसिकैर्जनैः ।<br>संविग्नजीतमालम्ब्यमित्याज्ञा पारमेश्वरी ।। ३ ।। | ।।यो.विं १६टी।। |
| जीतव्यवहारः | * दव्वाई चिंतिऊणं, संघयणाईण हाणिमासज्ज ।<br>पायच्छित्तं जीयं, रुढं वा जं जहिं गच्छे ।।७१।।<br>जं बहुगीयत्थेहिं, आइन्नं तं जीयं समावण्णं ।<br>देसाइसव्ववववहार, पुरओ कारिज्ज दिज्जइ जा ।।७८।। | ।।संबोध.प्र.आलो.अधि.।। |
| जीवः | * शुद्धचैतन्यम् । | ।।अ.सा.च. १२२टी।। |
| जीवाः | * अजीवन् जीवन्ति जीविष्यन्ति यथायोग्यं दशधा प्राणान् धारयन्तीति जीवाः । | ।।अ.सा.च. १टी।। |
| जैमिनीयाः | * मीमांसकाः सर्वज्ञाभाववादिनः । | ।।अ.सा.ष. २०२टी।। |
| ज्येष्ठव्रतानि | * महाव्रतानि कनिष्ठानुव्रतापेक्षया तान्येवातिदुर्वहत्वात् । | ।।उप.मा.(सि) ६२टी।। |
| ज्योतिष्कम् | * ग्रहगणितम् । | ।।उप.मा.(सि) ११५टी।। |
| | **ड** | |
| डमरः | * कुतोऽपि हेतोःप्रकुपितदेवतादिजनितमशिवम् । | ।।हित. १२४टी।। |
| | **ण** | |
| णयणिपुणम् | * सद्भावानयनहेतुराक्षेपणादिरुपः प्रकार इह नयः, तन्निपुणम् । | ।।यो.श. २९टी।। |
| | **त** | |
| तत्त्वचिंतनम् | * जीवादिपदार्थसार्थपर्यालोचनम् । | ।।यो.बिं. ३५७टी।। |
| तत्त्वदर्शनम् | * योग एवेह परमार्थ इति समालोचनम् । | ।।यो.बिं. ४१०टी।। |
| तत्त्वधर्म्मयोनयः | * पारमार्थिककुशलोत्पत्तिस्थानानि धृति श्रद्धा-सुखा-विविदिषा-विज्ञप्तिरित्येता यथाक्रमम् अभय-चक्षु-मार्ग-शरण-बोधि-रपरनामानः । | ।।ल.वि. बोहिदयाणं व्या.।। |
| तत्त्वनिर्णयः | * परमार्थपरिच्छेदः । | ।।यो.दृ. ६५टी।। |
| तत्त्वभावितबुद्धयः | * परमार्थदर्शिधियः। | ।।ल.वि. नमुत्थुणं व्या.।। |
| तत्त्वम् | * परमार्थम् । | ।।यो.विं. ४टी।। |
| | * ऐदंपर्यपर्यालोचम् । | ।।यो.बिं. १टी।। |
| | * अनारोपितयथार्थवस्तु । | ।।अ.सा.च. ६टी।। |
| | * अनारोपितवस्तुसद्भावः । | ।।अ.सा.च. १५३टी।। |

| शब्दाः | उपनिषद् | ग्रन्थाः |
|---|---|---|
| | * सद्भावम् । | ।।अ.सा.च. १६८टी।। |
| | * सहजस्वरुपादिवस्तुभावम् । | ।।अ.सा.पं. १३६टी।। |
| | * अनुपचरितसत्पदार्थः । | ।।अ.सा.ष. १९०टी।। |
| तत्त्वसंवेदनानुगम् | * जीवादितत्त्वसम्यक्परिज्ञानानुगतम् । | ।।यो.बिं. २१४टी।। |
| तत्त्वान्तवादिनः | * कल्पिताविद्यावादिनः, तत्त्वनिष्ठारुपं निराकारं स्वच्छसंवेदनमेव वस्तुतया वदितुं शीलं येषां ते तथा तत्त्वान्तवादिनः । एते च सुगतशिष्यचतुर्थ-प्रस्थानवर्तिनो माध्यमिका इति सम्भाव्यते, तेषामेव निराकारं स्वच्छसंवेदन-मात्रमन्तरेण संवेदनान्तराणां भ्रान्तिमात्रतया एकान्तत एवासत्त्वाभ्युपगमात्। तथा च सौगतप्रस्थानचतुष्टयलक्षणमिदं, यथाः-<br>''अर्थो ज्ञानसमन्वितो मतिमता वैभाषिकेणोच्यते ।<br>प्रत्यक्षो न हि बाह्यवस्तुविसरः सूत्रान्ति-कैराश्रितः ।।१।।<br>योगाचारमतातानुगैरभिहिता साकारबुद्धिः परा ।<br>मन्यन्ते बत मध्यमाः कृतधियःस्वच्छां परां संविदम् ।।२।।'' | ।।ल.वि.जिणा.जाव.व्या.।। |
| तत्त्वाभिनिवेशः | * विज्ञानोहानुगमविशुद्धम् इदमित्थमेवेतिनिश्चयः । | ।।ल.वि. सरणदयाणं व्या.।। |
| तथाभव्यता | * तथाविधा विचित्रा भव्यता मुक्तिगमनयोग्यता । | ।।अ.सा.च. १४४टी।। |
| | * भविष्यति विवक्षितपर्यायेणेति भव्यः तद्भावो भव्यता, भव्यता नाम सिद्धि-गमनयोग्यता जीवानामनादिपारिणामिको भावः, तेनानियतप्रकारेण भव्यता तथाभव्यता । | ।।अ.सा.च. १४५टी।। |
| तथाभव्यत्वम् | * तथा = तेन प्रकारेण प्रतिविशिष्टं भव्यत्वमेव तथाभव्यत्वम् । | ।।ल.वि. सयंसंबुद्धाणं व्या.।। |
| | * भव्यत्वं नाम सिद्धिगमनयोग्यत्वमऽनादिपारिणामिको भावः । तथाभव्यत्वमिति विशिष्टमेतत्, कालादिभेदेनाऽऽत्मनां बीजसिद्धिभावात् । आदिशब्दात् कालनियतिकर्मपुरुषकारपरिग्रहः । | ।।पंच सू.-प्र.सू.टी।। |
| | * भव्यत्वं नाम सिद्धिगमनयोग्यत्वमनादिपरिणामिकोभावः, तथाभव्यत्वं चैतदेव कालनैयत्यादिना प्रकारेण वैचित्र्यमापन्नम् । | ।।यो.बिं. २७४टी।। |
| | * तथाफलपरिपाकी । | ।।पंच सू.-पं.सू.टी।। |
| | * तथा तेनानियतप्रकारेण भव्यत्वं सिद्धिगमनयोग्यत्वं विचित्रमेतत्, कालादिभेदेन सहकारिकालक्षेत्रगुर्वादिद्रव्यवैचित्र्येणात्मनां बीजादिसिद्धिभावाद्-धर्म्मप्रशंसा-धर्म्मचिन्ता-श्रवणादिसत्वात् । | ।।ल.वि.लोगुत्तमाणं व्या.।। |
| तथाविधलोकदृष्टि | * तथाविधः= परमार्थतोऽसत्यपि तथारुपे वस्तुनि बहुरुढव्यवहारप्रवृत्तः स चासौ लोकश्च तथाविधलोकः, तस्य दृष्टिः अभिप्रायो व्यवहारनय इत्यर्थः । | ।।ल.वि.लोगपईवाणं व्या.।। |
| तथावेषादिमात्रम् | * तत्प्रकारं भावसाराध्यात्मभावनायुक्तयोगियोग्यं यद्वेषादिमात्रं नेपथ्यचेष्टा-भाषालक्षणं श्रद्धानशून्यं वस्तु । | ।।यो.बिं. ३७०टी।। |
| | * तदिच्छोच्छेदरुपं द्राग् वैराग्यमुपजायते ।।१।। | ।।अ.सा.द्वि.।। |
| तद्धेतु-अनुष्ठानम् | * तद्धेतुः तस्य मोक्षस्य हेतुत्वेन तदभिलाषेण यद्भव्यैः क्रियते तद्धेतु-अनुष्ठानमुच्यते । | ।।अ.सा.तृ. ५८टी।। |

| शब्दाः | उपनिषद् | ग्रन्थाः |
|---|---|---|
| | ❋ सदनुष्ठानरागेण तद्धेतुर्मार्गगामिनाम् । | |
| | एतच्च चरमावर्तेऽनाभोगादेर्विना भवेत् ।।७३।। | ।।अ.सा.तृ.।। |
| | ❋ तद्धेतुः स एव मोक्ष एव मोक्षोद्देश एव हेतुः प्रवृत्तेः कारणं यत्रानुष्ठाने स तद्धेतुः । | ।।अ.सा.तृ. ७३टी।। |
| | ❋ एतद्रागादिदं हेतुः , श्रेष्ठो योगविदो विदुः । | |
| | सदनुष्ठानभावस्य शुभभावांशयोगतः ।। १५९ ।। | ।।यो.बिं. ।। |
| तनुशुश्रूषा | ❋ चरणक्षालनाङ्गसंवाहनोत्थापननिवेशनादिरुपा देशकालसात्म्यौचित्येन | |
| | भोजनशयनीयवसानाङ्गरागादिसम्पादनरुपा । | ।।हित २७३टी।। |
| तन्त्रम् | ❋ आगमम् । | ।।यो.बिं. ४५५टी।। |
| | ❋ योगप्रधानशास्त्रम् । | ।।यो.विं. २टी।। |
| तपः | ❋ तावेइ जेण कम्मं तविज्जए जं च सिवसुहत्थीहिं । | |
| | तेणिह तवं ति भन्नइ तं दुविहं बारसविहं च ।। १८७ ।। | ।।हित.।। |
| | ❋ छेदग्रंथानुसारेण जीतकल्पानुसारेण वा येन केनचित्तपसा विशुद्धिर्भवति | |
| | तत्तद् देयमासेवनीयं । | ।।हित. १९०टी।। |
| | ❋ यत्र रोधः कषायाणां ब्रह्म, ध्यानं जिनस्य च । | |
| | ज्ञातव्यं तत्तपः शुद्धमवशिष्टं तु लंघनम् ।।१५७।। | ।।अ.सा.ष.।। |
| तप-छेदप्रायश्चित्तम् | ❋ निव्विगयाई दिज्जइ, पुढवाइविघट्टणे तवविसेसो । | |
| | तवदुद्दमस्स मुणिणो, किज्जइ पज्जायवुच्छेए ।।५२।। | ।।संबोध.प्र.आलो.अधि.।। |
| तपस्वी | ❋ विकृष्टं दशमादि किञ्चिन्न्यूनषण्मासान्तं तपः कुर्वंस्तपस्वी । | ।।हित. १९०टी।। |
| | ❋ तपः सकामनिर्जरारुपं विकृष्टमष्टमदशमादि तद् यस्यास्तीति स तपस्वी । | ।।हित. २५टी।। |
| | ❋ विकृष्टतपोनिष्टप्तदेह । | ।।उप.मा.(सि.) ६३टी।। |
| तर्कः | ❋ न्यायप्रतिपादकशास्त्रम् । | ।।अ.सा.द्वि. ४०टी।। |
| | ❋ सन्नयायः । | ।।अ.सा.ष. २०१टी।। |
| तर्जना | साक्षेपमङ्गुल्यादिभि-र्निर्भर्त्सनम् । | ।।उप.मा.(सि.) १३६टी।। |
| तात्त्विकदृशी | ❋ तत्त्वे वस्तुपरमार्थे दृग् दर्शनं वर्तते यस्य स तथा । | ।।अ.सा.प्र. ९६टी।। |
| तात्त्विकप्रकृतिः | ❋ संक्लेशायोगतो भूयः कल्याणाङ्गतया च यत् । | |
| | तात्विकी प्रकृतिर्ज्ञेया तदन्या तूपचारतः ।। १८४ ।। | ।।यो.बिं. ।। |
| तापशुद्धिः | ❋ सा च कषच्छेदयो-मूलाधारभूतात्मवादात्मिका, कथमात्मन उत्पादविनाशौ | |
| | स्यातां न वेति विचाररुपा शास्त्रपरीक्षाविधौ तापशुद्धि र्भवेत् । | ।।अ.सा.च. २१टी।। |
| तारादृष्टिः | ❋ तारायां तु मनाक्स्पष्टं, नियमश्च तथाविधः । | |
| | अनुद्वेगो हितारम्भे, जिज्ञासा तत्त्वगोचरा ।। ४१ ।। | ।।यो. दृ.।। |
| तीर्णाः | ❋ ज्ञानदर्शनचारित्रपोतेन भवार्णवं तीर्णवन्तस्तीर्णाः । | ।।ल.वि.तिन्ना.तार.व्या.।। |
| तीर्थकरः | ❋ तित्थं तित्थे पवयणेण संगोवंगे य गणहरे पढमे । | |
| | जो तं करेइ तित्थंकरो य अण्णे कुतित्थिया ।।२९३।। | ।।संबोध.प्र.गुरु अधि.।। |

| शब्दाः | उपनिषद् | ग्रन्थाः |
|---|---|---|
| | * तीर्थकरणशीलाः, अचिन्त्यप्रभावमहापुण्यसंज्ञिततन्नामकर्म्मविपाकतः, तस्यान्यथावेदनाऽयोगात् । | ।।ल.वि. तित्थयराणं व्या.।। |
| तीर्थः | * तित्थं चाउव्वण्णो संघो, संघो वि इक्कगो पक्खो । चाउव्वण्णो वि संघो, सायरिओ भण्णए तित्थं ।।२९२।। | ।।संबोध.प्र.गुरु अधि.।। |
| | * व्यसनसलिलनिधिनिस्तारणोपायः स स्थावरजङ्गमभेदभिन्नस्तीर्थः । | ।।यो.बिं. ५७टी।। |
| | * अधिकृत श्रुतार्थोभयविद् अभ्यस्तभावनामार्ग आचार्यः । | ।।यो.श. ५२टी।। |
| | * तित्थे सुत्तत्थाणं गहणं विहिणा उ एत्थ तित्थमिणं । उभयन्नू चेव गुरु विही उ विणयाइओचित्तो ।। १ ।। | ।।ध.र. ५३टी।। |
| | * समुद्रादेरिव संसारस्यापि तरणार्थं सुखावतारो मार्गः । | ।।हित. २५टी।। |
| | * प्रवचनं प्रथमगणधरो वा । | ।।हित. १६७टी।। |
| | * चतुर्वर्णश्रमणसङ्घरुपः । | ।।हित. ३९१टी।। |
| | * जिनशासनम् । | ।।अ.सा.तृ. ६७टी।। |
| | * येनेह जीवा जन्मजरामरणसलिलं मिथ्यादर्शनाविरतिगम्भीरं महाभीषण-कषाय-पातालं सुदुर्लङ्घ्यमोहावर्त्तरौद्रं विचित्रदुःखौघदुष्टश्वापदं रागद्वेष-पवनविक्षोभितं संयोगवियोगविचीयुक्तं प्रबलमनोरथवेलाकुलं सुदीर्घं संसारसागरं तरन्ति तत् तीर्थमिति । एतच्च यथावस्थितसकलजीवादिप-दार्थप्ररुपकम्, अत्यन्तानवद्यान्याविज्ञातचरणकरणक्रियाऽऽधारम्, त्रैलोक्यगतशुद्धधर्मसंपद्युक्तमहासत्त्वाश्रयम्, अचिन्त्यशक्तिसमन्विताविसंवादिपरमबोहित्थकल्पं प्रवचनं संघं वा । | ।।ल.वि.तित्थयराणं व्या.।। |
| | * तीर्यतेऽनेनेति तीर्थम् । | ।।ल.वि.चतु.विशंति व्या.।। |
| तीर्थव्यवस्थापकगुरुः | * विधिश्रवणरसिकं श्रोतारमुद्दिश्य विधिप्रापणेनैव गुरुस्तीर्थव्यवस्थापको भवति विधिप्रवृत्त्यैव च तीर्थमव्यवच्छिन्नं भवतीति सिद्धम् । | ।।यो.विं. १५टी।। |
| तीर्थानि | * अर्हतां जन्म-निष्क्रमण-ज्ञान-निर्वाणादिस्थानानि । | ।।हित. ४५०टी।। |
| तीर्थोच्छेदः | * अविध्यनुष्ठाने क्रियमाण एव विहितान्यथाकरणादशुद्धपारम्पर्यप्रवृत्त्या सूत्रक्रियाया विनाशस्तीर्थोच्छेदः । | ।।यो.विं. १४टी।। |
| तीर्थोन्नतिः | * विधिव्यवस्थापने ह्येकस्यापि जीवस्य सम्यग् बोधिलाभे चतुर्दशरज्ज्वात्म-कलोकेऽमारिपटहवादनात्तीर्थोन्नतिः, अविधिस्थापने च विपर्ययात्तीर्थोच्छेद एवेति । | ।।यो.विं. १५टी।। |
| तेजस्विनः | * समग्राङ्गोपाङ्गतरङ्गितलवणिमजलोत्पीलाः । | ।।हित. ६३टी।। |
| तेजस्वी | * दीप्तिमान् । | ।।उप.मा.(सि.)१० टी।। |
| तेजोलेश्या | * शुभप्रभावरुपा । चित्तसुखलाभलक्षणा । | ।।पंच सू.- च.सू.टी।। |
| | * तेज इवात्मधर्मप्रकाशवती लेश्या ज्ञानकारुण्यादिरुपा परिणतिरानन्द इत्यर्थः । | ।।अ.सा.पं. ४१टी।। |
| | * दक्खो संवरसीलो, रिजुभावो दाणसीलगुणजुत्तो । धम्मंमि होइ बुद्धी, अरुसणो तेउलेसाए ।।१७ ।। | ।।संबोध.प्र.लेश्या अधि.।। |

| शब्दाः | उपनिषद् | ग्रन्थाः |
|---|---|---|
| **त्रिकोटिपरिशुद्धः** | ※ तिसृभिरादिमध्यान्ताविसंवादिलक्षणाभिः कषच्छेदतापरुपाभि-र्वा<br>कोटिभिः= विभागैः परिशुद्धो=निर्दोषो यो धर्म्मः । कषादिलक्षणं चेदम्,<br>पाणवहाईयाण पावट्ठाणं जो उ पडिसेहो ।<br>झाणज्झयणाईणं, जो उ विही एस धम्मकसो ।। १।।<br>बज्झाणुट्ठाणाणं जेण न वाहिज्जए तयं नियमा ।<br>संभवह य परिसुद्धं, सो पुण धम्ममि छेओत्ति ।।२।।<br>जीवाइभाववाओ, बंधाइपसाहगो इह तावो ।<br>एएहिं सुपरिसुद्धो धम्मो धम्मत्तणमुवेइ ।।३।। | ।।ल.वि. धम्मवर. व्या.।। |
| **त्रिकोटिपरिशुद्धिः** | ※ कषच्छेदतापपरिशुद्धिः । | ।।पंच सू.-पं.सू.टी।। |
| **त्रिपदी** | ※ उत्पादव्ययध्रौव्यलक्षणपदत्रयी । | ।।हित. १४२टी।। |
| **त्रैलोक्यगुरवः** | ※ त्रैलोक्यवासिसत्वेभ्यो गृणन्ति शास्त्रार्थमिति त्रैलोक्यगुरवः (तीर्थंकराः) । | ।।पंच सू.-प्र.सू.टी।। |

## द

| | | |
|---|---|---|
| **दक्षाः** | ※ सहजनिजप्रज्ञाऽवज्ञातवाचस्पतिमतिविभवाः । | ।।हित. ३७५टी।। |
| **दया** | ※ प्राणिरक्षा । | ।।ध.र. १७टी।। |
| | ※ पाणिंति जीवंती जं तेणं पाणिणो इह जीवा ।<br>सा होइ दया जं पुण तेसिं हिंसाइ परिहारो ।। ४६ ।। | ।।हित.।। |
| **दयालुः** | ※ मूलं धम्मस्स दया तयणुगयं सव्वमेवऽणुट्ठाणं ।<br>सिद्धं जिणिंदसमए मग्गिज्जइ तेणिह दयालू ।। १७ ।। | ।।ध. र.।। |
| **दर्प्पः** | ※ धावनवल्गनादिः । | ।।हित. ५१टी।। |
| **दर्शनप्रतिमा** | ※ पसमाइगुणविसुध्दं, कुग्गहसंकाइसल्लपरिहीणं ।<br>सम्मद्दंसणमणहं, दंसणपडिमा हवइ पढमा ।।९०।।<br>जम्हा दंसणपमुहाण कज्जमुप्पत्तिकायकिरीयाइ ।<br>सम्मं लक्खिज्जइ तिवेलपूयाओ पढम पडिमा ।।९२।।<br>सुस्सूस धम्मराओ, गुरुदेवाणं जहा समाहीयं ।<br>वेयावच्चे नियमो, दंसणपडिमा भवे एसा ।।९३।।<br>वावन्नदंसणाणं, निन्हवहाछंदकुग्गहहयाणं ।<br>मणसावि न वंदंति य, दंसणपडिमाट्ठिया सड्ढा ।।९४।। | ।।संबोध.प्र.श्राव.प्र.अधि.।। |
| **दर्शनभावना** | ※ दर्शने प्रयत्नपरस्य जीवस्य प्रशमसंवेगनिर्वेदानुकंपास्तिक्यरुपं जिनशासने<br>स्थैर्यं भवतीति दर्शनभावना । | ।।अ.सा.पं. १०२टी।। |
| | ※ संकाइदोसरहिओ, पसमत्थिज्जाइगुणगणोवेओ ।<br>होइ असंमूढमणो, दंसणसुद्धीइ झाणंमी ।।३२।। | ।।संबोध.प्र.ध्यान अधि.।। |
| **दर्शनभेदिनी कथा** | ※ ज्ञानाद्यतिशयतः कुतीर्थिकप्रशंसादिरुपा । | ।।ध.र. २०टी।। |
| **दर्शनम्** | ※ चैतन्यापरनामकम् । | ।।यो.बिं. ४५४टी।। |
| | ※ सम्यक्त्वं सामान्यबोधो वा । | ।।अ.सा.तृ. ११४टी।। |

| शब्दाः | उपनिषद् | ग्रन्थाः |
|---|---|---|
| | ※ वस्तुबोधः । | ।।ल.वि.लोगहिआणं व्या.।। |
| | ※ उपयोगभेद एव । | ।।ल.वि.सव्वन्नूणं व्या.।। |
| दाक्षिण्यपराः | ※ परोपरोधबन्धुरधियः | ।।हित. ३७५टी।। |
| दानम् | ※ त्यागः । | ।।ध.र. ११टी।। |
| | ※ दत्तं यदुपकाराय द्वयोरप्युपजायते ।<br>नातुरापथ्यतुल्यं तु तदेतद्विधिवन्मतम् ।। १२४ ।। | ।।यो.बिं.।। |
| | ※ स्वविभवातिसर्गरुपम् । | ।।यो.बिं. १२१टी।। |
| दान्तः | ※ मनइन्द्रियदमनतः । | ।।अ.सा.प्र. ३१टी।। |
| | ※ अन्तर्बहि-र्विषयविकारवर्जितः । | ।।अ.सा.पं. १५१टी।। |
| दिदृक्षा | ※ अनिवृत्तकौतुकत्वेन बाह्यानर्थान्द्रष्टुमिच्छा । | ।।यो.बिं. ४५५टी।। |
| दिविषद्दुर्गतिः | ※ आगामिनी भवे दिवि देवलोके सीदन्ति निवसन्तीति दिविषदो देवास्तेषां तेषु वा या दुर्गतिः किल्बिषिकदेवत्वरुपनीचत्वप्राप्तिः स्यात् । | ।।अ.सा.च. ५०टी।। |
| दिव्यज्ञानी | ※ विमलकेवलालोकभास्करो भगवदर्हद् । | ।।हित. २४०टी।। |
| दीनः | ※ परसुखं दृष्ट्वा दुखी दैन्यवान् वा । | ।।अ.सा.प्र. ३०टी।। |
| | ※ सदैवाऽदृष्टकल्याणः । | ।।यो.बिं. ८७टी।। |
| | ※ सदैवाऽदृष्टकल्याणदर्शी । | ।।यो. दृ. ७६टी।। |
| | ※ क्षीणसकलपुरुषार्थशक्तिः । | ।।यो.बिं. १२३टी।। |
| दीनवृत्तयः | ※ दीना दृश्यमाना श्रूयमाणा वाऽऽर्द्रहृदयानां दयोत्पादिनी वृत्तिश्चेष्टा येषां ते तथा । | ।।हित. १३टी।। |
| दीप्रादृष्टिः | ※ प्राणायामवती दीप्रा, न योगोत्थानवत्यलम् ।<br>तत्त्वश्रवणसंयुक्ता, सूक्ष्मबोधविवर्जिता ।। ५७ ।। | ।।यो. दृ.।। |
| दीर्घदर्शी | ※ आढवइ दीहदंसी सयलं परिणामसुंदरं कज्जं ।<br>बहुलाभमप्पकेसं सलाहणिज्जं बहुजणाणं ।। २२ ।। | ।।ध.र.।। |
| दीर्घायुषः | ※ प्रवर्त्तमानारकानुमाने पुरुषायुषजीविनः । | ।।हित. ६३टी।। |
| दुःखम् | ※ प्रतिकूलतया वेदनीयश्चित्तधर्मः कष्टमिति यावत् । | ।।अ.सा.च. १११टी।। |
| दुःखर्गभितवैराग्यम् | ※ गृहेऽन्नमात्रदौर्लभ्यं लभ्यन्ते मोदका व्रते ।<br>वैराग्यस्यायमर्थो हि दुःखगर्भस्य लक्षणम् ।। ४३ ।। | ।।अ.सा.द्वि.।। |
| दुःखार्त्तसत्वः | ※ असातोद्वेवेजितजन्तुः । | ।।हित. ६७टी।। |
| दुराराधाः | ※ दुःखेनाराध्यन्ते अभिमुखीक्रियन्ते इति दुराराधाः । | ।।हित. १३टी।। |
| दुर्गतिः | ※ तिर्यङ्नारकादिरुपा । | ।।हित. ३५१टी।। |
| दुर्भिक्षम् | ※ अवमम् । | ।।हित. १२४टी।। |
| दुर्मतिः | ※ निचितरागादिदूषणै-र्दूषिता मति-र्यस्य स दुर्मतिः । | ।।अ.सा.च. ४९टी।। |
| दुर्विदग्धः | ※ ज्ञानमदभृत्पंडितमन्यः । | ।।अ.सा.ष. १९४टी।। |
| | ※ विपरीतशास्त्रपल्लवग्राहिणः । | ।।उप.मा.(सि.) ४९० टी।। |

| शब्दाः | उपनिषद् | ग्रन्थाः |
|---|---|---|
| दुष्प्रणिधान-आशातना | * रागेण व दोसेण व, मोहेण व दूसिया मणोवित्ती ।<br>दुप्पणिहाणं भण्णइ, जिणविसए तं न कायव्वं ।।८४।। | ।।संबोध.प्र.देव अधि.।। |
| द्वन्द्वसहिष्णुता | * निरुपक्रमक्लिष्टकर्मोदयापादितानामिष्टवियोगानिष्टसंप्रयोगादीनां व्यसनानां सम्यक्सहनभावः । | ।।यो.बिं. ५३टी।। |
| दृष्टम् | * प्रत्यक्षप्रमाणम् । | ।।अ.सा.च. ८२टी।। |
| | * अशेषप्रमाणोपलब्धम् । | ।।ल.वि.नमो.जिअ. व्या.।। |
| दृष्टिः | * जिनोक्तिषु रुच्यात्मकं सम्यग्दर्शनम् । | ।।अ.सा.द्वि. ६३टी।। |
| | * बोधलक्षणाऽष्टधा भवति ।इमा मित्रा, तारा, बला, दीप्रा, स्थिरा, कान्ता, प्रभा, परा च । तत्राऽवन्ध्य (स्थिरादि) सद्दृष्टिहेतुत्वेन मित्रादिदृष्टीनामऽपि सत्वादिति । | ।।यो.दृ. १५टी।। |
| | * सच्छ्रद्धासङ्गतो बोधो, दृष्टिरित्यभिधीयते ।<br>असत्प्रवृत्तिव्याघाता - त्सत्प्रवृत्तिपदावहः ।। १७ ।। | ।।यो.दृ.।। |
| | * सच्छ्रद्धासङ्गतो बोधो दृष्टिः । दर्शनं दृष्टिरिति कृत्वा निष्प्रत्यपायतया शास्त्रा-विरुद्धप्रवृत्तिपदावहोऽवेद्यसंवेद्यपदपरित्यागेन वेद्यसंवेद्यपदप्रापक इत्यर्थः । | ।।यो.दृ. १७टी।। |
| | * दर्शनम् । | ।।ध.र. १८टी।। |
| दृष्टेष्टार्थाविरोधी | * दृष्टः सर्वनयवीक्षित इंद्रियादिप्रत्यक्षोऽशेषव्यवहारः इष्टश्च स्वर्गमोक्षादिगतो नैश्चयिकवस्तुस्वरुपसर्वज्ञागमानुमानादिगम्यश्च तादृशौ यावार्थौ पदार्थौ तयो-र्विषयेऽविरोधी विरोधी व्यभिचारी न भवतिः यः स तथा । | ।।अ.सा.च. ८२टी।। |
| देवः | * इष्टदृष्टोऽर्हदादिः । | ।।हित. २९०टी।। |
| देशः | * एगस्स भूमिवइणो नयरस्स व जो हविज्ज पडिबद्धो ।<br>भूभागः सो देसो तस्स विरुद्धं तु पडिकुलं ।।८३२२ ।। | ।।हित.।। |
| देशना | * वस्तुप्रज्ञापना मातृकापदत्रयोद्घाटरुपा । | ।।यो.बिं. ४२८टी।। |
| | * समुत्पन्नविमलकेवलस्यास्य (जिनस्य)सुरासुरनरनिकरविराजितायां समव-सरणसंसदि सर्वभाषापरिणामिण्या योजननिहारिण्या पञ्चत्रिंशद्गुणोपेतया गिरा भव्यलोकोपकृतये धर्म्मकथनम् । | ।।हित. ३टी।। |
| देशविरतिः | * पाणिवहाईयाणं पावट्ठाणाण देसपडिसेहो ।<br>देसविरइ त्ति समणोवासगधम्मु त्ति सा होइ ।। ४११ ।। | ।।हित.।। |
| देशविरतिपरिणामः | * जिनपूजा-सत्कारयोः करणलालस खल्वाद्यो देशविरतिपरिणामः,औचित्य-प्रवृत्तिसारत्वेन । | ।।ल.वि.अरिहंत चेइ. व्या.।। |
| औचित्यप्रवृत्तिः | * निजावस्थाया आनुरुप्येण या प्रवृत्तिः चेष्टा सा । | ।।ल.वि.अरिहंत चेइ. व्या.।। |
| देश-सर्वविरतश्रावकः | * देसे सड्ढो बारस-वयजुत्तो गिहिपसत्तवावारो ।<br>सव्वे पडिमाभिग्गहनिरओ णिद्धूयपावरओ ।।१०।। | ।।संबोध.प्र.श्राव.प्र.अधि.।। |
| देशावगाशिकव्रतम् | * पुव्विं दिसिवयमाणं, जं विहियं जम्मपभिइ देसिक्कं ।<br>तं चेव मुहुत्तमित्तं, जहन्नओ सव्ववयमाणं ।।११९।।<br>देसावगासियं पुण, दिसिपरिमाणस्स निच्चसंखेवो ।<br>अहवा सव्ववयाणं, संखेवो पइदिणं जो उ ।।१२२।। | ।।संबोध.प्र.श्राव.प्र.अधि.।। |

| शब्दाः | उपनिषद् | ग्रन्थाः |
|---|---|---|
| | ※ दिसिवयगहियस्स दिसापरिमाणस्सेह पइदिणं जं तु ।<br>गमणपरिमाणकरणं बीयं सिक्खावयं एयं ।। ४३७ ।। | ।।हित.।। |
| देहः | ※ संयमाधारः । | ।।हित. ३४४टी।। |
| दैवम् | ※ दैवं नामेह तत्त्वेन कर्मैव हि शुभाशुभम् ।<br>तथा पुरुषकारश्च स्वव्यापारो हि सिद्धिदः ।। ३१९ ।। | ।।यो.बिं. ।। |
| दोषशतमूलजालम् | ※ दुष्यते आत्मा एभिरिति दोषा रागादयः प्राणिवधादयो वा, तेषां शतानि, तेषां मूलं कारणं चासौ जालं च मत्स्यबन्धजालवत् तद् बन्दहेतुत्वाद्दोष-शतमूलजालम् । | ।।उप.मा.(सि.) ५१ टी।। |
| दोषाः | ※ मिथ्यात्वाविरतिक्रोधादिपापव्यापाराः । | ।।अ.सा.च. १५३टी।। |
| | ※ मदनमोहादयः सर्वविरतिप्रतिबंधकाः । | ।।अ.सा.पं. २७टी।। |
| | ※ दूषयन्तीति दोषाः रागादयः । | ।।यो.श. ५२टी।। |
| | ※ दुष्टव्यापाराः । | ।।ध.र. १२०टी।। |
| | ※ क्रोधादयः । | ।।उप.मा.(सि.) ३१५ टी।। |
| द्रढधर्मरागरक्ता | ※ धर्मे दुर्गतिप्रपतत्प्राणिगणधारणक्षमे रागः, अयमेव तत्त्वमिति प्रत्ययः, तेन रक्ताः, आमञ्जमनुप्रविश्य तन्मयतामाऽऽपादितेति । | ।।हित. १२टी।। |
| द्रव्यप्राणाः | ※ द्रव्येणाप्रधानभावेन प्राणा जीवितविशेषाः । | ।।अ.सा.ष. ५५टी।। |
| द्रव्य-भावलेश्ये | ※ तत्थ परिणामजणिया, सिलेसदव्वप्पकम्मगयभावा ।<br>कण्हाइ दव्वसइ वा, फलिहस्सिव दव्वओ अप्पा ।।२।। | ।।संबोध.प्र.लेश्या अधि.।। |
| द्रव्यम् | ※ द्रवति तांस्तान् पर्यायान् गच्छतीति द्रव्यम् । | ।।अ.सा.च. ३९टी।। |
| | ※ गुणपर्यायभाजनं वस्तु । | ।।अ.सा.ष. ९८टी।। |
| द्रव्यतीर्थम् | ※ यत्र भगवतामर्हतां जन्मदीक्षाज्ञानसमवसरणनिवार्णादि भवति। | ।।हित. २५टी।। |
| द्रव्यलेश्या | ※ कण्हाइदव्वजोयण, फलिहस्सिव अप्पणो य परिणामो ।<br>जायइ कज्जपवित्ती, दव्वओ सा भवे लेसा ।।२०।। | ।।संबोध.प्र.लेश्या अधि.।। |
| द्रव्यसाम-सम-सम्यगेकाः | ※ महुरपरिणाम सामं, समं तुला सम्मखीरखंडजुई ।<br>दोरे हारस्स चिई, इगमेयाइं तु दव्वंमी ।।१०७।। | ।।संबोध.प्र.श्राव.प्र.अधि.।। |
| द्रव्यादिवादिनः | ※ सर्वगतात्मवादिनो द्रव्यगुणकर्म्मसामान्यविशेषसमवायवादिनो वैशेषिकाः । | ।।ल.वि. सिव-मयल व्या.।। |
| द्रव्येन्द्रियम् | ※ बाह्यनिर्वृत्तिसाधकतमकरणरुपं ''निर्वृत्त्युपकरणे द्रव्येन्द्रिय'' मिति वचनात् । | ।।ल.वि. चक्खुदयाणं व्या.।। |
| द्विजाः | ※ लब्धदीक्षानामकद्वितीयजन्मनो मुनीनः । | ।।यो.बिं. ४४टी।। |
| द्विदलम् | ※ जंमि उ पीलिज्जंते, नेहो नहु होइ बिंति तं वियलं ।<br>विदले वि हु उप्पन्नं, नेहजुयं होइ नो विदलं ।।८५।।<br>उग्गमाणे विदलं, विदलं सव्वं च कट्ठदलयं च ।<br>निन्नेहं समदलयं, जं हुज्जा तं हवे विदलं ।।८६।।<br>निन्नेह विदलसंभवमवि, तयपत्ताइसव्वमवि विदलं ।<br>जइ गोरसंमि पडइ, ता तसजीवाण उप्पत्ती ।।८७ ।। | ।।संबोध.प्र.श्राव.प्र.अधि.।। |

| शब्दाः | उपनिषद् | ग्रन्थाः |
|---|---|---|
| द्वेषः | ✻ द्विष्यतेऽनेनेति द्वेषः, द्वेषवेदनीयं कर्म, आत्मनःक्वचिदऽप्रीतिपरिणामापादनाद्, द्वेषणं वा द्वेषः द्वेषवेदनीयकर्मापादितो भावोऽप्रीतिपरिणाम एव । | ।।पंच सू.- प्र.सू.टी।। |
| | ✻ अप्रीतिलक्षणो द्वेषः । | ।।यो.श. ५३टी।। |
| | ✻ अनुरागविषयोपरोधिनि प्रतिहति-र्द्वेष इति । | ।।यो.श. ७०टी।। |
| | ✻ द्वेषणं द्वेषः क्वचिदात्मनोऽप्रीतिपरिणामः । | ।।अ.सा.तृ. ३४टी।। |
| | ✻ अप्रीत्यरुच्यादिपरिणामजा द्वेषक्रिया । | ।।अ.सा.पं. १२०टी।। |
| | ✻ अप्रीतिस्वभावो द्विष्टः । | ।।अ.सा.ष. ४५टी।। |

## ध

| | | |
|---|---|---|
| धनम् | ✻ गणिम-धडिम-मेयपरीक्ष्यलक्षणम् । | ।।हित. ४२३टी।। |
| धन्याः | ✻ सुचरितसुकृताः । | ।।हित. १६६ टी ४६३टी।। |
| धर्मः | ✻ धर्मस्तावद्रागादिमलविगमेन पुष्टिशुद्धिमच्चित्तमेव । पुष्टिश्च पुण्योपचयः, शुद्धिश्च घातिकर्मणां पापानां क्षयेण या काचिन्निर्मलता, तदुभयं च प्रणिधानादिलक्षणेन भावेनानुबन्धवद्भवति, तदनुबन्धाच्च शुद्धिप्रकर्षः संभवति । निरनुबन्धं च तदशुद्धिफलमेवेति न तद्धर्मलक्षणम् । | ।।यो.विं. १टी।। |
| | ✻ केवलिप्ररुपितः श्रुतादिरुपो धर्मः । | ।।पंच सू.- प्र.सू.टी।। |
| | ✻ पततो दुर्गतौ यस्मात्सम्यगाचरितो भवात् ।<br>प्राणिनो धारयत्येष तस्माद्धर्म इति स्मृतः ।। १ ।। | ।।ध.र. १टी।। |
| | ✻ दुर्गतौ पततः प्राणिणो धारयतीति धर्मः । | ।।ध.र. १टी।। |
| | ✻ यथावस्थितमुक्तिमार्गः । | ।।ध.र. ११टी।। |
| | ✻ हिताहितावबोधप्रधानः । | ।।ध.र. २०टी।। |
| | ✻ श्रुतचारित्ररुपः । | ।।ध.र. ९०टी।। |
| | ✻ अहिंसालक्षणः । | ।।हित. ४५टी।। |
| | ✻ ऐहिकामुष्मिकसकलसुखनिबन्धनः । | ।।हित. १३९टी।। |
| | ✻ दुर्गदुर्गतिनिपतत्प्राणिगणधारणक्षमोऽहिंसादिः । | ।।हित. २९०टी।। |
| | ✻ धरइ पडंतं जो दुग्गईइ दक्खत्तसत्तसंघायं ।<br>सो इह वुच्चइ धम्मो तस्स विरुद्धं तु पुण ण इणमो ।। ३५१ ।। | ।।हित.।। |
| | ✻ सकलैहिकामुष्मिकसुखशाखिसन्दोहदोहदप्रतिमः । | ।।हित. ५०७टी।। |
| | ✻ दुर्गतिपतदात्मधारणाद् धर्मः श्रुतचारित्ररुपः । | ।।उप.मा.(सि.) १६टी।। |
| | ✻ गुणाधिकविषयप्रमोदसाध्यम् । | ।।उप.मा.(सि.) ६७टी।। |
| | ✻ अहिंसादिलक्षणः । | ।।उप.मा.(सि.) २३१टी।। |
| | ✻ सर्वज्ञोक्तोऽशेषजन्तुसूक्ष्मरक्षणाभिधायकः । | ।।उप.मा.(सि.) २३२टी।। |
| | ✻ दुःखप्रचुरसंसारोच्छेदकः सर्वज्ञोक्तः । | ।।उप.मा.(सि.) २८८टी।। |
| | ✻ सद्भावसाध्यः । | ।।उप.मा.(सि.) ३९३टी।। |
| | ✻ सर्वजीवानामहिंसनरुप आत्मपरिणामः । निवृत्तिरुपात्मस्वभावः षड्जीवनिकायवधनिषेधाच्चारित्रधर्मो वा आत्मघातदुःखतुल्यपरघातदुःखबोधात्सामा- | |

| शब्दाः | उपनिषद् | ग्रन्थाः |
|---|---|---|
| | यिकधर्मो वा । | ।।अ.सा.च. ७टी।। |
| | ※ क्षमादिपरिणामरुपः । | ।।अ.सा.पं. ११४टी।। |
| | ※ कर्तव्यतास्वभावः । | ।।अ.सा.ष. ३७टी।। |
| | ※ श्रुतचारित्ररुपः । | ।।ल.वि. नमुत्थुणं व्या.।। |
| | ※ चेतःस्वाल्थ्यसाध्यः । | ।।ल.वि. अभयदयाणं व्या.।। |
| | ※ दुर्गतौ प्रपन्तमात्मानं धारयतीति धर्मः । उक्तं च,<br>दुर्गतिप्रसृताञ्जीवान् यस्माद् धारयते ततः ।<br>धत्ते चैतान् शुभे स्थाने तस्माद् धर्म इति स्मृत ।।१।। | ।।ल.वि. चतुर्विंशति व्या.।। |
| **धर्मजागरा** | ※ तत्त्वालोचनरुपा । | ।।पंच सू.-द्वि.टी।। |
| **धर्मध्यानकाले लेश्या** | ※ हुंति कमविसुद्धाओ, लेसाओ पम्हपीयसुक्काओ ।<br>धम्मज्झाणोवगयस्स तिव्वमंदाइभेयाओ ।।७०।। | ।।संबोध.प्र.ध्यान अधि.।। |
| **धर्मध्यानफलम्** | ※ हुंति सुभासवसंवर-विणिज्जरामरसुहाइ विउलाइं ।<br>झाणवरस्स फलाइं, सुहाणुबंधीणि धम्मस्स ।।९७।। | ।।संबोध.प्र.ध्यान अधि.।। |
| **धर्मध्यानयोग्यकालः** | ※ कालो वि सुच्चिय जहिं, जोगसमाहाणमुत्तमं लहइ ।<br>न उ दिवसनिसावेलाइनियमणं झाइणो भणियं ।।३८।। | ।।संबोध.प्र.ध्यान अधि.।। |
| **धर्मध्यानयोग्यक्रमः** | ※ झाणपडिवत्तिकमो, होइ मणोजोगनिग्गहाईओ ।<br>भवकाले केवलिणो, सेसाण जहासमाहीए ।।४४।। | ।।संबोध.प्र.ध्यान अधि.।। |
| **धर्मध्यानयोग्यदेशः** | ※ तो जत्थ समाहाणं, होइ मणोवयणकायजोगाणं ।<br>भूओवरोहरहिओ, सो देसो झायमाणस्स ।।३७।। | ।।संबोध.प्र.ध्यान अधि.।। |
| **धर्मध्यानयोग्यध्यातारः** | ※ सव्वप्पमायरहिया मुणओ खीणोवसंतमोहा य ।<br>झायारो नाणधणा, धम्मज्झाणस्स निद्दिट्ठा ।।६७।। | ।।संबोध.प्र.ध्यान अधि.।। |
| **धर्मध्यानयोग्यालंबनानि** | ※ आलंबणाइ वायण-पुच्छणपरियट्टणाणुचिंताओ ।<br>सामाइयाइयाइं, सद्धम्ममावस्सयाइं च ।।४२।। | ।।संबोध.प्र.ध्यान अधि.।। |
| **धर्मध्यानयोग्यासनः** | ※ जच्चिय देहावत्था, जिया ण झाणोवरोहिणी होइ ।<br>झाइज्जा तयवत्थो, ठिओ निस्सण्णो निविन्नो वा ।।३९।। | ।।संबोध.प्र.ध्यान अधि.।। |
| **धर्मध्यानलिङ्गम्** | ※ आगमउवएसाणा-निसग्गओ जं जिणप्पणीयाणं ।<br>भावाणं सद्दहणं, धम्मज्झाणस्स तं लिगं ।।७१।।<br>जिणसाहूगुणकित्तण-पसंसणादाणविणयसंपत्तो ।<br>सुयसीलसंजमरओ, धम्मज्झाणी मुणेयव्वो ।।७२।। | ।।संबोध.प्र.ध्यान अधि.।। |
| **धर्मध्यानविरहेऽनुप्रेक्षा** | ※ झाणोवरमे वि मुणी, निच्चमनिच्चाइचिंतणापरमो ।<br>होइ सुभावियचित्तो, धम्मज्झाणेण जो पुव्विं ।।६९।। | ।।संबोध.प्र.ध्यान अधि.।। |
| **धर्मबहुमानी** | ※ त्रिवर्गरुपपुरुषार्थचिंतायां धर्म्ममेव बहु मन्यते । | ।।ल.वि. प्रस्तावना।। |
| **धर्मबीजम्** | ※ धर्मकारणम् , तच्च प्रधानं मानुषत्वम् । | ।।यो. दृ. ८३टी।। |
| **धर्मबीज-सत्प्रशंसादि** | ※ वर्णवाद- कुशलचित्त-उचितकृत्यकरणलक्षणम् । | ।।ल.वि. नमुत्थुणं व्या.।। |
| **धर्मभ्रंशः** | ※ श्रुतचारित्रलक्षणधर्माच्चयवनम् सदाचारविलोपो वा । | ।।उप.मा.(सि.) ५० टी।। |

| शब्दाः | उपनिषद् | ग्रन्थाः |
|---|---|---|
| धर्मयोगः | ✻ वन्दनादिविषयो धर्मव्यापारो धर्मयोगः । | ।।यो. दृ. ३टी।। |
| धर्मरत्नम् | ✻ जिणप्रणितो देशविरतिसर्वविरतिरुपःसमाचारः । | ।।ध.र. ५टी।। |
| धर्मरागः | ✻ धर्माभिष्वङ्गः, सामग्रीवैकल्यात् तदकरणेऽपि चेतसोऽनुबन्धः, दरिद्रब्राह्मण-विशेषहविःपूर्णरागसमधिकः । | ।।यो.श. १४टी।। |
| | ✻ परमार्थचिन्तारुपा । | ।।यो.बिं. ३०८टी।। |
| धर्मवरचतुरन्तचक्रवर्तिनः | ✻ चत्वारो गतिविशेषा नारकतिर्यग्नरामरलक्षणाः । तदुच्छेदेन तदन्तहेतुत्वाच्चतुरन्तम् ,चतुर्भि-र्वाऽन्तो यस्मिंस्त-च्चतुरन्तं, कैः? दान-शील-तपो-भावनाख्यैर्धर्मैः, अन्तः प्रक्रमाद् भवान्तोऽभिगृह्यते, चक्रमिव चक्रमतिरौद्रमहामिथ्यात्वादिलक्षणभावशत्रुलवनात् । दानाद्यभ्यासादाग्रह-निवृत्त्यादिसिद्धेः। एतेन च वर्तन्ते भगवन्तः, तथाभव्यत्वनियोगतो वरबोधि-लाभादारभ्य तथा तथौचित्येन आसिद्धिप्राप्तेः एवमेव वर्तनादिति । तदेवमेतेन वर्तितुं शीला धर्म्मवरचतुरन्तचक्रवर्तिनः । | ।।ल.वि. धम्मवर. व्या.।। |
| धर्मसंयुक्तम् | ✻ निरवद्यम् । | ।।उप.मा.(सि.) ८० टी।। |
| धर्मकथा | ✻ स्वपरयोरनुग्रहाय यथावस्थितस्यार्हद्देशितस्यार्थस्यैहिकपूजासत्कार-श्लोकाद्यनभिषेणैकान्ततो निर्जरार्थं प्रथनम् । | ।।हित. ४८५टी।। |
| धर्मतीर्थम् | ✻ धर्म एव धर्मप्रधानं वा तीर्थं धर्मतीर्थम् । | ।।ल.वि. चतुर्विंशति व्या.।। |
| धर्माचार्याः | ✻ धर्मोपदेशसम्यक्त्वादिदायका गुरवः । | ।।हित. २९८टी।। |
| धर्माः | ✻ विशेषाः । | ।।यो.बिं. ४६४टी।। |
| धर्मी | ✻ द्रव्यरुपः । | ।।यो.बिं. ४६४टी।। |
| धर्मोचितः | ✻ यः पापकर्मचिकीर्षाभावे युक्तायुक्तमालोचयति, स धर्मोचित इति । | ।।ध.र. १३टी।। |
| धान्यम् | ✻ व्रीह्यादिसप्तदशविधम् । | ।।हित. ४२३टी।। |
| धारणम् | ✻ अविस्मरणम् । | ।।ल.वि. सरणदयाणं व्या.।। |
| धारणा | ✻ चित्तस्य देशबन्धलक्षणा । | ।।यो.दृ. १६२टी।। |
| | ✻ प्रतिप्रत्तिर्यथास्वमत्यवस्थानमवधारणं च । | ।।हित. ८०टी।। |
| | ✻ पूर्वापरगुणानां निरन्तरस्मृत्युपयोगः, तया च परार्थसाधनसमर्थत्वात् सिद्धियोगे साफल्यं भवति । | ।।अ.सा.तृ. ९१टी।। |
| | ✻ अधिकृतवस्त्वविस्मृतिः । इयं चेह ज्ञानावरणीयकर्म्मक्षयोपशमसमुत्था अविच्युत्यादिभेदवती प्रज्ञातवस्त्वानुपूर्वीगोचरा चित्तपरिणतिः, एतद्बलात् स्थानादियोगप्रवृत्तस्य यथोक्तनीत्यैव निष्पद्यते योगगुणमालापुष्टिनिबन्ध-नत्वादिति । | ।।ल.वि. अरिहंत चेइ. व्या.।। |
| धारणाव्यवहारः | ✻ गीयत्थेणं दिण्णं, सुद्धिं अवहारिऊण तह चेव । दिंतस्स धारणा तह, उद्धियपय धरणरुवा वा ।।७०।। | ।।संबोध.प्र.आलो.अधि.।। |
| धार्म्मिकाः | ✻ कामार्थयोर्गुणीभावेन केवलधर्म्मनिर्मितिरतयः । | ।।हित. ३५४टी।। |
| धीमान् | ✻ ज्ञानी सुविचारयोगी । | ।।अ.सा.पं. ७२टी।। |
| | ✻ कार्यपरिणामपर्यालोचकबुद्धिधनः । | ।।यो.बिं. ३९२टी।। |

| शब्दाः | उपनिषद् | ग्रन्थाः |
|---|---|---|
| | ✻ अनुपहतबुद्धिः । | ।।यो. दृ. १०६टी।। |
| धीरः | ✻ अक्षोभ्या बुद्धि-र्यस्य स । | ।।अ.सा.प्र. ४१टी।। |
| धीराः | ✻ सत्त्वशालिनः । | ।।हित. ४७६टी।। |
| | ✻ सत्त्ववन्तः । | ।।उप.मा.(सि.) २३९ टी।। |
| धृतिः | ✻ मनःप्रणिधानम्, विशिष्टा प्रीतिः । इयमप्यत्र मोहनीयकर्मक्षयोपशमा-दिसंभूता रहिता दैन्यौत्सुक्याभ्यां, धीरगम्भीराशयरुपा, अवन्ध्यकल्याण-निबन्धवस्त्ववाप्त्युपमया, जिनधर्म्मचिन्तारत्नप्राप्तावपि विदित-तन्माहात्म्यस्य ''क इदानीं संसार'' इति तद्दुःखचिन्तारहिता सञ्जायत एवेयम्, उत्तमालम्बनत्वादिति । | ।।ल.वि. अरिहंत चेइ. व्या.।। |
| | ✻ मनोवीर्यम् । | ।।उप.मा.(सि.) ३८४ टी।। |
| | ✻ येनकेनचिद् व्यसन-भोजनादिना निर्वाहमात्रनिमित्तेन संतोषः । | ।।यो.बिं. ५४टी।। |
| | ✻ धर्मयोनिरुपा । | ।।यो. दृ. ३७टी।। |
| | ✻ संतुष्टचित्तता व्रतस्थैर्यं वा । | ।।अ.सा.द्वि. ९४टी।। |
| | ✻ चेतसः स्वास्थ्यम्, तया चातिचाराद्यनुत्थानहेतुत्वात् स्थिरयोगे साफल्यम् । | ।।अ.सा.तृ. ९१टी।। |
| धृतिमान् | ✻ निष्प्रकम्पचित्तः । | ।।उप.मा.(सि.)१० टी।। |
| धैर्यः | ✻ परैरक्षोभ्यभावलक्षणः । | ।।यो.बिं. २४६टी।। |
| धैर्यम् | ✻ व्यसनोपनिपातेऽपि प्रतिज्ञातोऽविचलनम् । | ।।यो.बिं. ४१०टी।। |
| ध्यान-चित्तम् | ✻ जं थिरमज्झवसाणं, तं झाणं जं चलं तयं चित्तं ।<br>तं हुज्ज भावणा वा, अणुपेहा वा अहव चिंता ।।२।। | ।।संबोध.प्र.लेश्या अधि.।। |
| ध्यानम् | ✻ शुभालम्बनं चित्तं ध्यानमाहुर्मनीषिणः ।<br>स्थिरप्रदीपसदृशं सूक्ष्माभोगसमन्वितम् ।। ३६१ ।। | ।।यो.बिं. ।। |
| | ✻ स्थिरमध्यवसानं यत्तद्ध्यानं चित्तमस्थिरम् ।<br>भावना चाप्यनुप्रेक्षा चिन्ता वा तत्त्रिधा मतम् ।।८४।। | ।।अ.सा.पं.।। |
| | ✻ एकाग्रप्रणिधानं ज्ञेयम् । | ।।अ.सा.ष. १२३टी।। |

## न

| | | |
|---|---|---|
| नमस्करणम् | ✻ आन्तरा प्रीतिः । | ।।उप.मा.(सि.) १५ टी।। |
| नयस्थानावतारी | ✻ नया नैगमादयस्तान् स्थाने स्याद्वादमर्यादया यथास्थितवस्तुस्वरुपे मोक्षाराध्यत्वे च अवतारयति योजयतीत्येवं शीलं यस्य स तथा । | ।।अ.सा.तृ. ५१टी।। |
| नागराः | ✻ जत्थ सयं निवसिज्जइ नयरे तत्थेव जे किर वसंति ।<br>ससमाणवित्तिणो ते नायरया नाम वुच्चंति ।। ३०५ ।। | ।।हित.।। |
| नास्तिकः | ✻ नास्त्यात्मेति वावदूकः । | ।।अ.सा.पं. १७५टी।। |
| निकाचिताः | ✻ बन्धस्य प्रकर्षावस्थामाऽऽपन्नाः । | ।।हित. १९३टी।। |
| नित्यः | ✻ अप्रच्युतानुत्पन्नस्थिरैकस्वभावः । | ।।अ.सा.च. २४टी।। |
| | ✻ जिनागमे आत्मा पारिणामिकत्वेन कथञ्चिन्नित्योऽसंख्यातप्रदेशित्वेन चैतन्याकारत्वेन चावस्थितस्वरुपत्वादनुत्पन्नाविनष्टत्वाद्द्रव्यतो नित्यः । | ।।अ.सा.च. ३८टी।। |

| शब्दाः | उपनिषद् | ग्रन्थाः |
|---|---|---|
| | ❋ अविनष्टानुत्पन्नस्वरुपतयाऽवस्थितः । | ।।अ.सा.च. ३९टी।। |
| नित्यमुनिवृषभाः | ❋ स्थिरमुनिवृषभाः सुसाधवः । | ।।उप.मा.(सि.) १५२ टी।। |
| नित्यम् | ❋ अप्रतिपाति । | ।।यो. दृ. १५४टी।। |
| | ❋ शाश्वतं स्थिरमविनाशीति यावत् । | ।।अ.सा.च. १०२टी।। |
| निदानम् | ❋ क्लिष्टकर्मबन्धहेतो- र्भवानुबन्धिनः संवेगशून्यस्यमहर्द्धिभोगगृद्धावऽध्यवसानस्य निदानत्वात् । | ।।पंच सू.-प्र.सू.टी।। |
| | ❋ नितरां दायते-लूयते सम्यग्दर्शनप्रपञ्चबहलमूलजालो ज्ञानादिविषयविशुद्धविनयविधिसमुद्धुरस्कन्धबन्धो विहितावदातदानादिभेदप्रभेदशाखोपशाखाखचितो निरतिशयसुरनरभवप्रभवसुखसंपत्तिप्रसूनकीर्णोऽनभ्यर्णीकृतनिखिलव्यसनव्याकुलशिवालयशर्मफलोल्लसद् धर्म्मकल्पतरुरनेन सुरर्द्धयाद्याशंसापरिणामपरशुनेति निदानम् । द्वेषाभिष्वङ्गमोहगर्भं हि तत्, तत्र, द्वेषो= मत्सरः, अभिष्वङ्गः = विष्यानुरागो, मोहः= अज्ञानं ततस्ते द्वेषाभिष्वङ्गमोहाः, गर्भाः= अन्तरङ्गकारणं यस्य तत् तथा हिः यस्मात् तत् = निदानम् । | ।।ल.वि.चतुर्विंशति. व्या.।। |
| निन्दा | ❋ सदसद्दूषणोद्घोषणरुपा । | ।।हित. ३४६टी।। |
| निभृतस्वभावाः | ❋ शान्ततया संयमव्यापारवन्तोऽपि निर्व्यापारधर्माणः साधव इत्यर्थः । | ।।उप.मा.(सि.) ७९टी।। |
| निभृतानाहतनादसादरम् | ❋ निभृत एकाग्रसमाधौ निश्चलोऽनाहतो निरंतरं ब्रह्मद्वारे श्रूयमाणो यो नाद ओँकाराद्यल्लेखात्मको ध्वनिस्तस्मिन् सादरं सबहुमानप्रेमपरम् । | ।।अ.सा.द्वि. ८३टी।। |
| निमित्तम् | ❋ होराज्ञानादि । | ।।उप.मा.(सि.) ११५टी।। |
| निमित्तानि | ❋ इष्टानिष्टसूचकानि शकुनादीनि सहकारिकारणानि वा । | ।।ल.वि.धम्मदेसयाणं व्या.।। |
| नियमः | ❋ नियम्यते वशीक्रियते आत्मा तपसंयमाभ्यामिति नियमः । | ।।उप.मा.(सि.) १८०टी।। |
| | ❋ नियम्यते कृतकालावधिं यावत्सेव्यते यः स तथा । | ।।अ.सा.च. १७टी।। |
| | ❋ सदसदाचारप्रवृत्तिनिवृत्तिलक्षणः । | ।।ल.वि. सयं संबुद्धाणं व्या.।। |
| नियमिताः | ❋ धर्मवन्तः । | ।।उप.मा.(सि.) २८१टी।। |
| निरञ्जनम् | ❋ निर्गतमञ्जनं समग्रकर्मलेपो यस्मात् स । | ।।अ.सा.पं. ६२टी।। |
| निरवनामः | ❋ गुरुष्वप्यप्रणतिप्रवणः । | ।।उप.मा.(सि.) २७टी।। |
| निरारम्भजनम् | ❋ साधुलोकम् । | ।।ध.र. ६५टी।। |
| निरालंबं ध्यानम् | ❋ स्वात्मन्येव व्याप्तं बहिर्विषयवर्जितम् । | ।।अ.सा.स. १६टी।। |
| निरावरणम् | ❋ निर्गतान्येकान्ततः प्रलीनान्यावरणानि घातिकर्म्मचतुष्टयलक्षणानि यस्य तन्निरावरणम् । | ।।हित. ९८टी।। |
| निराशंसः | ❋ परित्यक्तास्थाबुद्धिः । | ।।ध.र. ७६टी।। |
| | ❋ ऐहिकपारत्रिकाशंसाविप्रमुक्तः । | ।।ध.र. ११७टी।। |
| निरुद्धं चित्तम् | ❋ त्यक्तबहिर्विषयमात्मन्येवागतम् । | ।।अ.सा.स. ३टी।। |
| | ❋ उपरतविकल्पवृत्तिकमवग्रहादिक्रमच्युतं शुद्धम् । आत्मारामामुनीनां भवति निरुद्धं सदा चेतः ।।८।। | ।।अ.सा.स.।। |

| शब्दाः | उपनिषद् | ग्रन्थाः |
|---|---|---|
| निरुपकारी | ❋ कृतघ्नः । | ।।उप.मा.(सि.) २७ टी।। |
| निरुपसर्ग्गः | ❋ मोक्षः, जन्माद्युपसर्गाभावेन । | ।।ल.वि. अरिहंत चे. व्या.।। |
| निर्ग्रंथ-निर्ग्रंथः | ❋ गंथो मिच्छत्तधणाइओ मोहाओ निग्गओ जो सो ।<br>उवसामओ य खवगो, दुहा नियंठो वि पंचविहो ।।२४८।। | ।।संबोध.प्र.गुरु अधि.।। |
| निर्ग्रन्थाः | ❋ सबाह्याभ्यन्तरग्रन्थरहिताः । | ।।हित. १२०टी।। |
| निर्जरा | ❋ भवभूरुहबीजभूतकर्म्मणां जरणात् सकामाकामभेदाद् द्विधा निर्जरा । | ।।हित. १५टी।। |
| | ❋ कर्मपरिशाटना । | ।।अ.सा.प्र. ३५टी।। |
| निर्दयत्वम् | ❋ अनार्द्रत्वम् । | ।।हित. ३५५टी।। |
| निर्दोषम् | ❋ रागादिदोषविकारै-र्वर्जितं निर्विकारमिति यावत् । | ।।अ.सा.पं. ४४टी।। |
| निर्ममाः | ❋ निर्गता ममेति बुद्धि-र्येभ्यस्ते निर्ममाः । | ।।उप.मा.(सि.) ३८९टी।। |
| निर्वृत्तिः | ❋ आकारः, सा च बाह्या अभयन्तरा च । तत्र बाह्या अनेकप्रकारा, अभ्यन्तरा पुनः क्रमेण श्रोत्रादीनां कदम्बपुष्प-धान्यमसूरअतिमुक्तकपुष्पचन्द्रिकाक्षुरप्र नानाकारसंस्थाना । | ।।ल.वि. चक्खुदयाणं व्या.।। |
| निर्वेदः | ❋ नैर्गुण्यपरिज्ञानेन भवचारकाद्विरक्तता । | ।।यो.विं ८टी।। |
| | ❋ भवादावौदासिन्यम् । | ।।अ.सा.तृ. ९०टी।। |
| | ❋ संसारौदासीन्यं वैराग्यमिति यावत् । | ।।अ.सा.च. ५८टी।। |
| निर्वेदनी कथा | ❋ निर्वेदं नीयते यया कथया कामभोगेषु सा निर्वेदनी । यस्याः स्त्रीशरीराद्य-शुचित्वकामभोगादिबीभत्सत्वपरिणामदारुणत्वादिश्रवणेन निर्विण्णः परित्यज्य विषयान् निस्सङ्गः सिद्धिवध्वाराधनसज्ञः प्रवर्त्तत इत्येवंरुपा कथा । | ।।हित. ४७२टी।। |
| निवृत्ताधिकारा प्रकृतिः | ❋ व्यावृत्तपुरुषाभिभवलक्षणव्यापारा सत्त्वरजस्तमोलक्षणा ज्ञानावरणादिकर्म्माणि । | ।।ल.वि. बोहिदयाणं व्या.।। |
| | ❋ व्यावृत्तपुरुषाभिभवप्रकृतिः । | ।।यो.बिं. २०१टी।। |
| निवृत्ति | ❋ मोक्षसुखं परभाववर्जनरुपा सुस्थिति वा । | ।।अ.सा.द्वि. ९५टी।। |
| निश्चयः | ❋ जीवस्य परमनिरञ्जनभावमयशुद्धसत्तावलंबनं द्रव्यत्वमात्राश्रयणम् । | ।।अ.सा.द्वि. ७१टी।। |
| निश्चयः | ❋ उपचारपरिहारः । | ।।यो.बिं. ३६८टी।। |
| | ❋ कर्तव्यैकाग्रपरिणामः । | ।।यो.बिं. ४१०टी।। |
| निश्चयनयः | ❋ अन्तस्तत्त्वनिरुपणाभिप्रायः । | ।।उप.मा.(सि.) ५१२ टी।। |
| निश्चयनयम् | ❋ भावरुपम् । | ।।हित. ४०४टी।। |
| निश्चियनयमतम् | ❋ परमार्थनयाभिप्रायः। - | ।।ल.वि. लोगुत्तमाणं व्या.।। |
| निश्रा | ❋ नितरां तदाज्ञाप्रधानत्वेन आश्रयणं निश्रा । | ।।अ.सा.द्वि. ७५टी।। |
| निष्फलारंभसंगतः | ❋ निष्फलो निष्प्रयोजन आरंभोऽनुचितादररुपो जीवहिंसादिकरणरुपो वा तस्मिन् संगतो निःशूकतया प्रवृत्तो यः स तथा । | ।।अ.सा.प्र. ३०टी।। |
| निसर्गजं (सम्यक्त्वम्) | ❋ निसर्गजं निसर्गः स्वभावोऽनुपदेशस्तस्माज्जातं सम्यक्त्वम् । | ।।अ.सा.प्र. ४४टी।। |
| निसर्गमिथ्यात्वम् | ❋ दीनो निसर्गमिथ्यात्व-स्तत्त्वातत्त्वं न बुध्यते । | |

| शब्दाः | उपनिषद् | ग्रन्थाः |
| --- | --- | --- |
| | सुन्दरासुन्दरं रुपं, जात्यन्ध इव सर्वथा ।।११।। | ।।संबोध.प्र.मिथ्या.अधि.।। |
| निसर्गरुचिः | ✻ कश्चिल्लघुकर्मा क्षयोपशमपाटवात्स्वयमेवोक्ततत्त्वाभिलाषी भवति, स निसर्गरुचिः । | ।।अ.सा.च. ४टी।। |
| निह्नवाः | ✻ निह्नुवते जिनवचनमन्यथा भाषन्ते ये ते निह्नवाः । | ।।अ.सा.च. ५०टी।। |
| नीतिः | ✻ उत्सर्गापवादरुपः शुद्धसंयमोपायः । | ।।ध.र. ८०टी।। |
| | ✻ परमार्थचिन्तारुपा । | ।।यो. बि. ३०८टी।। |
| नीत्युपार्जितम् | ✻ स्वामीमित्रद्रोहविश्वस्तवञ्चनचौर्यदुरोदरादिपरिहारेण स्वकुलोचितवृत्त्या न्यायोपात्तम् । | ।।हित. १५४टी।। |
| नीललेश्या | ✻ मायादंभे कुसलो, उक्कोडालुद्धचवलचलचित्तो ।<br>मेहुणतिव्वाभिरओ, अलियपलावी य नीलाए ।।१५।। | ।।संबोध.प्र.लेश्या अधि.।। |
| नैःश्रेयसधर्म्माः | ✻ निःश्रेयसफलानां सम्यदर्शनादिधर्म्माः । | ।।ल.वि. अभयदयाणं व्या.।। |
| नैमित्तिकः | ✻ त्रिकालविषयलाभालाभादिप्रतिपादकं शास्त्रम्, तद् वेत्ति अधीते वा नैमित्तिकः । | ।।हित. २५टी।। |
| नैर्गुण्यलब्धिः | ✻ जरामरणादिव्यसनबहुलतयाऽसारतापरिज्ञानम् । | ।।यो.बिं. ३४१टी।। |
| नौबोद्रः | ✻ यो हि जलधौ नावं भित्त्वा लोहकीलकं गृहणाति मूर्खतया तद्वद् द्रष्टव्यः, संयमनौभङ्गे गृहीततपोऽयःकीलकस्याऽपि भवजलधौ निमज्जनाद् व्यर्थं तद्ग्रहणमिति । | ।।उप.मा.(सि.) ५०९टी।। |
| न्यायः | ✻ शास्त्रसिद्धदृष्टान्तः । | ।।ल.वि. आइगराणं व्या.।। |
| | ✻ युक्तियुक्तः । | ।।ल.वि. सयंसंबुद्धाणं व्या.।। |
| न्यायतन्त्रसिद्धाः | ✻ न्यायो = युक्ति, स एव तन्त्रम्= आगमः, तेन सिद्धाः= प्रतिष्ठिताः । | ।।ल.वि. नमुत्थुणं व्या.।। |

## प

| शब्दाः | उपनिषद् | ग्रन्थाः |
| --- | --- | --- |
| पक्षः | ✻ परिग्रहः परिकरः । | ।।ध.र. २१टी।। |
| पक्षपातम् | ✻ भावप्रतिबन्धम् । | ।।ध.र. ९१टी।। |
| पञ्चाङ्गप्रणिपातः | ✻ दो जाणू दोण्णि करा, पंचमंगं होइ उत्तमंगं तु ।<br>संमं संपणिवाओ, णेओ पंचंगपणिवाओ ।।१।। | ।।ल.वि. प्रणिधान सूत्रम्।। |
| पटुप्रज्ञाः | ✻ विपुलशास्त्रार्थरहस्यनिस्यन्दकन्दलितचेतसः । | ।।हित. ४९४टी।। |
| पठनम् | ✻ शोभनमऽध्ययनं स्वेनाऽऽत्मना वाऽध्यायः स्वध्यायः स्वाध्यायो वा । | ।।ध.र. ४३टी।। |
| पठितम् | ✻ सूत्रस्य ग्रहणम् । | ।।उप.मा.(सि.) ६४ टी।। |
| पत्नी | ✻ पतति यया वशीकृतः प्राणी दुःसहे दुर्गतिकष्टे सा पत्नी कान्ता । | ।।अ.सा.तृ. ४टी।। |
| पत्रं-पुष्पम् | ✻ प्रवृत्तिस्तेषु चित्रा च पत्रादिसदृशी मता ।<br>पुष्पं च गुरुयोगादिहेतुसंपत्तिलक्षणम् । ।।७९।। | ।।अ.सा.तृ.।। |
| पदज्ञानम् | ✻ चैत्यवन्दनदण्डकविषयं श्रद्धायुक्तस्य क्रियास्तिक्यवतस्तेन प्रकारेणोच्चार्य-माणस्वरसम्पन्मात्रादिशुद्धस्फुटवर्णानुपूर्वीलक्षणेन अभ्रान्तं पदज्ञानं भवति । | ।।यो.विं. ११टी।। |
| पदम् | ✻ पदनात् पदमाऽऽशयस्थानम् । | ।।यो. दृ. ७४टी।। |
| पद्मलेश्या | ✻ सत्तणुकंपो य थिरो, दाणं खलु देई सव्वजीवीणं ।<br>अइकुसलबुद्धिमंतो, धिइमंतो पम्हलेसाए ।। १८।। | ।।संबोध.प्र.लेश्या अधि.।। |
| परतत्त्वम् | ✻ संसारातीततत्त्वं निर्वाणसंज्ञितम् । | ।।यो. दृ. १२९टी।। |

| शब्दाः | उपनिषद् | ग्रन्थाः |
| --- | --- | --- |
| परतीर्थिकाः | * शाक्यादयः । | ।।उप.मा.(सि.) २३७ टी।। |
| परतीर्थिप्रशंसा | * साङ्ख्य-शाक्य-कापिलादयस्तीर्थिनो दर्शनिनः, तेषां प्रशंसा तीव्रतपोध्यानमौनकायक्लेशादिगुणगणानां प्रीत्युत्कर्षेण वा सर्वत्र माध्यस्थ्यं मे प्रथतामिति धिया वा उपवर्णनं परतीर्थिप्रशंसा । | ।।हित. २३टी।। |
| परपरिवादम् | * आत्मव्यतिरिक्तावर्णवादम् । | ।।उप.मा.(सि.) ६९ टी।। |
| परममुनिशासनम् | * वीतरागवचनम् । | ।।पंच सू.- तृ.सू.टी।। |
| परमसंविग्नः | * लब्धिपूजाख्यात्याद्याशयरहितः । | ।।यो.श. ७८टी।। |
| परमात्मा | * शुद्धब्रह्मचैतन्यमूर्तिः । | ।।अ.सा.स. २०टी।। |
| | * ज्ञानं केवलसंज्ञं योगनिरोधः समग्रकर्महतिः ।<br>सिद्धिनिवासश्च यदा परमात्मा स्यात्तदा व्यक्तः ।।२४।। | ।।अ.सा.स.।। |
| परमानन्दसुखालसाः | * परमः सर्वोत्कृष्टः, सर्वैः स्वांशैः परिपूर्णत्वात् स्वाभाविकत्वाच्च, स चासावानन्दः स्वब्रह्मस्वरुपानुभवजनित आह्लादस्तदात्मको यो रसः परमनिवृत्तिरुपसंतुष्टिस्तेन आलसा आ समन्ताल्लसन्ते विराजन्ते ये ते । | ।।अ.सा.द्वि. ९७टी।। |
| परमार्गदर्शनानि | * कुदर्शनमार्गकथनानि । | ।।उप.मा.(सि.) ३२० टी।। |
| परम्परानुग्रहकराः | * परम्परया= व्यवधानेनाऽनुग्रहकरा = उपकारकराः कल्याणयोग्यतालक्षणो हि जीवानां स्वपरिणाम एव क्षायोपशमिकादिरनन्तरमनुग्रहहेतुः, तद्धेतुतया भगवन्तः परम्परानुग्रहकराः, अथवा परम्परया= अनुबन्धेन स्वतीर्थानुवृत्तिकालं यावत् सुदेवत्वसुमानुषत्वादिकल्याणलाभलक्षणया वाऽनुग्रहकरा तीर्थकरा इति । | ।।ल.वि. तित्थयराणं व्या.।। |
| परलोकप्रस्थिताः | * संयमोनमुखतया परत्र हिताभ्युद्यताः । | ।।उप.मा.(सि.) ५३९ टी।। |
| परलोकभयम् | * विजातीयात्तिर्यग्देवादेः सकाशान्मनुष्यादीनां यद्भयं तत् परलोकभयम् | ।।ल.वि. अभयदयाणं व्या.।। |
| परलोकमार्गः | * परः प्रधानो लोको मोक्षस्तस्य मार्गो ज्ञानादिरुपः परलोकमार्गः । | ।।ध.र. ६९टी।। |
| परहितनिरतः | * परहियनिरओ धन्नो सम्मं विन्नायधम्मसब्भावो ।<br>अन्नेवि ठवइ मग्गे निरीहचित्तो महासत्तो ।। २७ ।। | ।।ध.र.।। |
| परहितार्थकारी | * अन्येषां हितानऽर्थान् प्रयोज़नानि कर्तुं शीलं यस्य स परहितार्थकारी । | ।।ध.र. ७टी।। |
| परा जिज्ञासा | * विशेषवती ज्ञातुमिच्छा । | ।।ल.वि. प्रस्तावना।। |
| पराक्रमः | * वीर्यविशेषवृद्ध्या अपूर्वकरणम् । | ।।ल.वि. मग्गदयाणं व्या.।। |
| परा दृष्टिः | * समाधिनिष्ठा तु परा , तदासङ्गविवर्जिता ।<br>सात्मीकृतप्रवृत्तिश्च, तदुत्तीर्णाशयेति च ।। १७८ ।। | ।।यो. दृ.।। |
| परावर्तनम् | * पूर्वाधीतस्यैव सूत्रादेरविस्मरणं निर्जरानिमित्तमभ्यासकरणम् । | ।।हित. ४८५टी।। |
| परावृत्तिः | * पूर्वाधीतस्य पुनः पुनरुद्वर्तनम् । | ।।अ.सा.पं. ११४टी।। |
| परिणतबुद्धिः | * परिपक्वमतिः परिणामसुंदरमतिः । | ।।ध.र. २४टी।। |
| परिणामः | * अवस्थितस्यैवाऽवस्थान्तरप्राप्तिः । | ।।यो.बिं. ४८२टी।। |
| परिछिन्नम् | * मिन्नं चुप्पडलोणाइ रयणवत्थाइ परिछिन्नं । | ।।हित. ४२३टी।। |

| शब्दाः | उपनिषद् | ग्रन्थाः |
|---|---|---|
| परिशुद्धः | * प्रणिधानाद्याशयविशुद्धिमान्, अनीदृशस्य द्रव्यक्रियारुपत्वेन तुच्छत्वात् । | ।।यो.विं १टी।। |
| परिशुद्धाज्ञायोगः | * त्रिकोटिपरिशुद्धाज्ञानुसारि । | ।।यो.श. २७टी।। |
| परिठापना | * अतिरिक्ताऽशुद्धभक्तपानोपकरणादीनां विधिना त्यागः । | ।।उप.मा.(सि.) ३७९ टी।। |
| परिहारिकसंयत-चारित्रम् | * परिहरइ जो विसुद्धं, पंचजामं अणुत्तरं धम्मं ।<br>तिविहेण फासयंतो, परिहारियसंजओ स खलु ।।२५९।। | ।।संबोध.प्र.गुरु अधि.।। |
| परोपकारः | * यद् धनधान्यादिप्रदानविपदुद्धरणप्रभृतिभिः परेषामुपकरणं स परोपकारः । | ।।हित. २४०टी।। |
| परोपकारिणः | * अनुपकृता अपि प्रकृतिपरोपकृतिवत्सलमनसः । | ।।हित. ३७५टी।। |
| पर्यायाः | * परिणामा उत्पादव्ययस्वरुपा भावाः । | ।।अ.सा.ष. ५५टी।। |
| | * उदात्तादयोऽनुवृत्तिरुपाः पररुपाभवनस्वभावाश्च व्यावृत्तिरुपाः । | ।।ल.वि. प्रस्तावना।। |
| पश्चात्कृतविषयम् | * आरुढपतितगोचरम्, पश्चात्कृतो व्यस्तपातितः स्वकर्म्मभिरेव ज्ञानदर्शन-चारित्रेभ्य इति पश्चात्कृतः, तद्विषयं तदुद्देशभणितम् । पश्चात्कृतो हि गीतार्थगुर्वाद्यसद्भावे गुरुमुखान्मयेदमिदमाकर्णितमिति धर्मार्थिने जनाय किञ्चिदुपदिशति । | ।।हित. ११५टी।। |
| पश्चात्कृत् | * पच्छाकडिति जेण य चरणं पच्छाकडं कयं रम्मं ।<br>उक्खित्ता गिही जाओ ससिहो भिक्खइ अभज्जो य ।।३३२।। | ।।संबोध.प्र.गुरु अधि.।। |
| पांडित्यम् | * पंडा तत्त्वानुगा बुद्धिः संजाताऽस्येति पंडितो बुद्धिमान् तस्य भावः कर्म वा पांडित्यं नैपुण्यम् । | ।।अ.सा.प्र. १टी।। |
| पात्रम् | * दायकलोकरक्षाकरम् । | ।।यो.बिं १२१टी।। |
| | * उचितग्राहकम् । | ।।ध.र. ९७टी।। |
| पापम् | * द्रोहाभिसन्धिलक्षणम् । | ।।उप.मा.(सि.) १७५ टी।। |
| | * पायइ सोयइ पुण्णं, पांसइ गुंडेइ जीववत्थं वा ।<br>पावसद्दस्स अत्थो, णिज्जुत्तिपएहि विण्णेओ ।।१७।। | ।।संबोध.प्र.आलो.अधि.।। |
| पापश्रमणः | * कुत्सितयतिः । | ।।ध.र. १३७टी।। |
| पामरः | * धर्मधूर्तः खल इति यावत् । | ।।अ.सा.च. १५८टी।। |
| पारगताः | * पारं= पर्यन्तं संसारस्य प्रयोजनव्रातस्य वा गताः पारगताः । | ।।ल.वि. सिद्धाणं व्या.।। |
| पाराञ्चितकम् | * पारमन्तं प्रायश्चित्तानां, तत उत्कृष्टतरप्रायश्चित्ताभावात् । अपराधानां वा पारमञ्चति गच्छतीत्येवंशीलं पाराञ्चितं, तदेवपाराञ्चितकम् । तच्च महत्यपराधे लिङ्गकुलगणसङ्घेभ्यो बहिःकरणम् । | ।।हित. १९०टी।। |
| पाराञ्चितप्रायश्चित्तम् | * पारंचियमावज्जइ, सलिंगनिवभारियाइसेवाहिं ।<br>अव्वत्तलिंगधरणे, बारस वरिसाइं सूरीणं ।।५४।। | ।।संबोध.प्र.आलो.अधि.।। |
| पारिठापनिका समितिः | * उच्चारं पासवणं, खेलं सिंघाणजल्लियं ।<br>आहारं उवहिं देहं , अन्नं वा वि तहाविहं ।।१६।। | ।।संबोध.प्र.गुरु अधि.।। |
| | * उच्चार-पासवण-खेल-जल्ल-सिंघाणाए य पाणिविही ।<br>सुविवेइए पएसे, निसिरंतो होइ तस्समिओ ।।२९९।। | ।।उप.मा.(सि.)।। |

| शब्दाः | उपनिषद् | ग्रन्थाः |
|---|---|---|
| | * मलजलखेलाईयं सुप्पडिलेहियपमज्जियपएसे ।<br>जयणाइ वोसिरावणपुव्वं, निसिरंति तस्समिया ।। ४८३ ।। | ।।हित.।। |
| पार्श्वस्थः | * पार्श्वे ज्ञानादीनां तिष्ठतीति पार्श्वस्थः । | ।।उप.मा.(सि.) ३५३ टी।। |
| | * ज्ञानादिपार्श्ववर्ती । | ।।उप.मा.(सि.) ३८७ टी।। |
| पार्श्वस्थः | * सो पासत्थो दुविहो, सव्वे देसे य होइ नायव्वो ।<br>सव्वंमि नाणदंसणचरणाणं जो उ पासम्मी ।।९।।<br>देसम्मि य पासत्थो, सिज्जायरभिहडरायपिंडं च ।<br>नीयं च अग्गपिंडं, भुंजइ निक्कारणे चेव ।।१०।।<br>कुलनिस्साए विहरइ, ठवणकुलाणि य अकारणे विसइ ।<br>संखडिपलोयणाए, गच्छइ तह संथवं कुणइ ।।११।। | ।।संबोध.प्र.गुरु अधि.।। |
| पुण्यम् | * सातवेद्यादि शुभप्रकृतिबंधरुपम् । | ।।अ.सा.पं. ३टी।। |
| | * सुकृतराशेः फलं कार्यम् । | ।।अ.सा.ष. ६३टी।। |
| पुद्गलपरावर्तः | * औदारिकादिवर्गणाग्रहणमोक्षात्मकः । | ।।यो.बिं. ७४टी।। |
| पुमर्थः | * पुरुषस्यात्मनोऽर्थः कार्यं मोक्ष इत्यर्थः । | ।।अ.सा.तृ. १०७टी।। |
| पुरुषः | * पुरुषार्थसार्थसाधनपटुः पुमान् । | ।।हित. २३२टी।। |
| | * आत्मा । | ।।यो.बिं. ४५४टी।। |
| पुरुषकारः | * जीववीर्यशुद्धिः । | ।।यो.बिं. ३३७टी।। |
| पुरुषवरगन्धहस्तिनः | * पुरुषा वरगन्धहस्तिन इव गजेन्द्रा इव क्षुद्रगजनिराकरणादिना धर्म्मसाम्येन पुरुषवरगन्धहस्तिनः । यथा गन्धहस्तिनां गन्धेनैवतद्देशविहारिणः क्षुद्रगजा भज्यन्ते, तद्वदेतेऽपरचक्रदुर्भिक्षमारिप्रभृतयः सर्व एवोपद्रवगजा अचिन्त्यपुण्यानुभावतो भगवद्विहारपवनगन्धादेव भज्यन्त इति । | ।।ल.वि.पुरिस.गंध. व्या.।। |
| पुरुषवरपुण्डरीकाणि | * पुरुषा वरपुण्डरीकाणीव संसारजलासङ्गादिना धर्म्मकलापेन पुरुषवरपुण्डरीकाणि । यथा पुण्डरीकाणि पङ्के जातानि, जले वर्धितानि तदुभयं विहाय वर्तन्ते, प्रकृतिसुन्दराणि च भवन्ति, निवासो भुवनलक्ष्म्याः, आयतनं चक्षुराद्यानन्दस्य, प्रवरगुणयोगतो विशिष्टतिर्यङ्नरामरैः सेव्यन्ते, सुखहेतूनि च भवन्ति । तथैतेऽपि भगवन्तः कर्म्मपङ्के जाताः, दिव्यभोगजलेन वर्द्धिताः, तदुभयं विहाय वर्तन्ते, सुन्दराश्चातिशययोगेन, निवासो गुणसंपदां, हेतवो दर्शनाद्यानन्दस्य, केवलादिगुणभावेन भव्यसत्त्वैः सेव्यते, निर्वाण-बन्धनं च जायन्ते इति । | ।।ल.वि.पुरिस.पुण्ड. व्या.।। |
| पुरुषवस्तु | * पुरुषा एव ज्ञानादिगुणवसनयोगाद् वस्तु पुरुषवस्तु आयव्ययतुलनया गोचरो भवतीति गम्यते । | ।।उप.मा.(सि.) ३९५ टी।। |
| पुरुषसिहाः | * पुरुषाः सिंहा इव प्रधानशौर्यादिगुणभावेन ख्याताः पुरुषसिंहाः । ख्याताश्च ( परमात्मनः ) कर्म्मशत्रून् प्रति शूरतया, तदुच्छेदनं प्रति क्रौर्येण, क्रोधादीन् प्रति त्वसहनतया, रागादीन् प्रति वीर्ययोगेन, तपःकर्म्म प्रति वीरतया । अवज्ञैषां परीषहेषु, न भयमुपसर्गेषु, न चिन्तापीन्द्रियवर्ग्गे, न खेदः संयमाध्वनि, निष्प्रकम्पता सद्ध्यान इति । | ।।ल.वि पुरिससीहाणं व्या.।। |

| शब्दाः | उपनिषद् | ग्रन्थाः |
|---|---|---|
| पुरुषाः | ❋ पुरि शयनात् पुरुषा आत्मान एव । | ।।हित. १४टी।। |
| पुरुषोत्तमाः | ❋ पुरिशयनात् पुरुषाः = सत्त्वा एव, तेषां उत्तमाः = सहजतथाभव्यत्त्वादि-भावतः प्रधानाः पुरुषोत्तमाः । | ।।ल.वि. पुरिसुत्तमाणं व्या.।। |
| पुलाकनिर्ग्रंथः | ❋ धन्नमसारं भन्नइ, पुलायसद्देण तेण जस्स समं ।<br>चरणं सो उ पुलाओ, लद्धीसेवाहि सो य दुहा ।।२४२। | ।।संबोध.प्र.गुरु अधि.।। |
| पुलाकलब्धिः | ❋ यया चक्रवर्तिसैन्यमपि चूर्णीकर्तुं सामर्थ्यं भवति । | ।।अ.सा.द्वि. १०३टी।। |
| पुस्तकाः | ❋ अक्षराधाराः । | ।।हित. १४७टी।। |
| पूजनम् | ❋ गन्धमाल्यादिभिः समभ्यर्चनम् । | ।।ल.वि. अरिहंत चेइ. व्या.।। |
| पूर्वव्युद्ग्रहमिथ्यात्वम् | ❋ पूर्णः कुहेतुदृष्टान्तैर्न तत्त्वं प्रतिपद्यते ।<br>मण्डलश्चर्मकारस्य, भोज्यं चर्मलवैरिव ।।९।। | ।।संबोध.प्र.मिथ्या.अधि.।। |
| पूर्वसेवा | ❋ योगप्रासादप्रथमभूमिकारुपा । | ।।यो.बिं. १०९टी।। |
| पृच्छा | ❋ संशयनिवृत्तये विनिश्चित्यर्थं च सूत्रार्थयोः शंकितस्थानस्य गुर्वादिः सकाशात् पृच्छनम् । | ।।अ.सा.पं. ११४टी।। |
| पृथक्त्ववितर्कसविचार-शुक्लध्यानम् | ❋ उपायट्ठिइभंगाइ-पज्जवाणं जमेगदव्वंमी ।<br>नाणानयाणुसरणं, पुव्वगयसुयाणुसारेणं ।।८१।।<br>सुवियारमत्थवंजण-जोगंतरओ तयं पढमसुक्कं ।<br>होइ पहुत्तवियक्कं, सवियारमरागभावस्स ।।८२।। | ।।संबोध.प्र.ध्यान अधि.।। |
| पृष्टमांसादनम् | ❋ परोक्षे दोषोत्कीर्त्तनम् । | ।।हित. २९६टी।। |
| पौषधः | ❋ आहार-ब्रह्मचर्यादिः । | ।।उप.मा.(सि.) २३४ टी।। |
| | ❋ पोसं पुट्ठिं धम्मस्स धारिज्जइ तेण पोसहो भणिओ ।<br>पव्वंमि जो भत्तट्ठं सो पोसहोववासवयाणं ।।१२४।। | ।।संबोध.प्र.श्राव.प्र.अधि.।। |
| पौषधप्रतिमा | ❋ पोसह चउव्विहं पि य, पडिपुन्नं सम्मं सो य अणुपाले ।<br>बंधाई अइयारे, पयत्तओ वज्जईमासु ।।९६।।<br>पोसहकिरियाकरणं, पव्वेसु चउसु तहा सुपरिसुध्दं ।<br>जह भवभावपसाहगमणहं तह पोसहप्पडिमा ।।९७।। | ।।संबोध.प्र.श्राव.प्र.अधि.।। |
| पौषधव्रतम् | ❋ आहारदेहसक्काराबंभवावारचागनिप्फन्नं ।<br>इह पोसहं ति वुच्चइ तइयं सिक्खावयं पवरं ।। ४३९ ।। | ।।हित.।। |
| प्रकल्पयतिः | ❋ प्रकल्पो निषीथाध्ययनम् तदुपलक्षितेन परिशीलितनिशीथादिग्रन्थेन तदभिज्ञगुरुजनाऽभिगृहीतेन वा यः । | ।।हित. ११४टी।। |
| प्रकृतिः | ❋ अविद्या । | ।।अ.सा.च. १०४टी।। |
| प्रज्ञा | ❋ श्रुतमेधाऽसंमोहसारा । | ।।यो. दृ. १०९टी।। |
| | ❋ बहुबहुविधादिगहनविषयावबोधशक्तिः । | ।।ल.वि. प्रणिधान सूत्रम्।। |
| प्रज्ञापनीयः | ❋ असद्ग्राहग्रहविकलः । | ।।ध.र. १०५टी।। |
| प्रज्ञापनीयत्वम् | ❋ सद्बोधलम्पटत्वम् । | ।।ध.र. ७८टी।। |
| प्रणिधानम् | ❋ वैराग्यादिधर्मकृत्येषु सोपयोगमनस्त्वेनैकाग्र्यम् । | ।।अ.सा.द्वि. ५०टी।। |

| शब्दाः | उपनिषद् | ग्रन्थाः |
|---|---|---|
| | * हीनगुणद्वेषाभावपरोपकारवासनाविशिष्टोऽधिकृत धर्मस्थानस्य कर्तव्यतोपयोगः । | ।।यो.विं १टी।। |
| | * जिनानामेव भगवतां छद्मस्थकेवलिसिद्धत्वाद्यवस्थाऽनुस्मरणम् । | ।।हित. १६५टी।। |
| | * क्रियमाणायां क्रियायामेकाग्रत्वेन सोपयोग्यता । | ।।अ.सा.तृ. ६४टी।। |
| | * एकाग्रमनस्त्वम् । | ।।अ.सा.तृ.।। |
| | * विशुद्धभावनासारं तदर्थार्प्पितमानसम् ।<br>यथाशक्तिक्रियालिङ्गं, प्रणिधानं मुनि-र्जगौ ।।१।। | ।।ल.वि. प्रणिधान सूत्रम्।। |
| प्रणिधानादयः | * प्रणिधान-प्रवृत्ति-विघ्नजय-सिद्धि-विनियोगाः,<br>एते सर्वेऽपि कथञ्चित्क्रियारुपत्वेऽपि तदुपलक्ष्या आशयभेदाः । | ।।यो.विं १टी।। |
| प्रणिपातः | * पञ्चाङ्गनमनादिः । | ।।हित. २९८टी।। |
| प्रतिक्रमणम् | * स्वस्थानाद्यत्परं स्थानं प्रमादस्य वशाद्गतः ।<br>भूयोऽप्यागमनं तत्र प्रतिक्रमणमुच्यते ।। १ ।। | ।।यो.बिं. ३९७टी।। |
| | * अतिचाराभिमुख्यपरिहारेण प्रतीपं क्रमणमपसरणं प्रतिक्रमणम्, तच्च मिथ्या-<br>दुष्कृतसम्प्रयुक्तेन पश्चात्तापेन पुनरेवं न करिष्यामीति प्रत्याख्यानम् । | ।।हित. १९०टी।। |
| प्रतिपत्तिः | * अवकिलाप्तोपदेशपालना । | ।।ल.वि. नमुत्थुणं व्या.।। |
| प्रतिप्रच्छनम् | * मुग्धबुद्धितया प्रश्नः । | ।।उप.मा.(सि.) १५७ टी।। |
| प्रातिभज्ञानसंगतः | * मार्ग्गानुसारिप्रकृष्टोहज्ञानयुक्तः । | ।।ल.वि. नमुत्थुणं व्या.।। |
| प्रतिमाप्रतिमा | * चउदिसि काउसग्ग-प्पडिमाकरणं तु इह भवे पडिमा ।<br>पुव्वुत्तसयलकिरियाजुत्तो वा जाव पणमासा ।।९८।। | ।।संबोध.प्र.श्राव.प्र.अधि.।।<br>।।संबोध.प्र.श्राव.प्र.अधि.।।- |
| प्रतिरुपः | * प्रतिनियतं विशिष्टावयवरचनया रुपं यस्य स प्रतिरुपः प्रतिविभक्ताङ्गः,<br>अनेन शरीरसम्पदमाह । प्रधानगुणयोगितया वा तद्गोचरबुद्धिजनकत्वात्<br>-तीर्थकरादीनां प्रतिरुपः प्रतिबिम्बाकारः । | ।।उप.मा.(सि.)१० टी।। |
| प्रतिवादः | * परोपन्यस्तपक्षप्रतिवचनरुपः । | ।।यो.बिं. ६७टी।। |
| प्रतिसेवना | * निषिद्धाचरणा । | ।।उप.मा.(सि.) ४०४ टी।। |
| प्रतिसेवा | * [1]आउट्टिया उ तिव्वा [2]दप्पो पुण होइ वग्गणाईओ ।<br>विगहाइओ [3]पमाओ [4]कप्पो पुण कारणे करणं ।। १ ।। | ।।ध.र. १०४टी।। |
| प्रत्यक्षम् | * चक्षुरादीन्द्रियम् । | ।।अ.सा.च. ६८टी।। |
| प्रत्ययः | * प्रतियते भाव्यर्थोऽस्मादिति । | ।।यो.बिं. २३१टी।। |
| प्रत्यात्मप्रधानवादिनः | * सत्त्वरजस्तमसां साम्यावस्था प्रकृतिः, सैव प्रधानं, ततः आत्मानमात्मानं<br>प्रति प्रधानं वदितुं शीलं येषां ते प्रत्यात्मप्रधानवादिनो मौलिकसाङ्ख्याः । | ।।ल.वि. आइगराणं व्या.।। |
| प्रत्याहारः | * स्वविषयाऽसम्प्रयोगे स्वचित्तस्वरुपानुकारी चेन्द्रियाणां प्रत्याहारः ।<br>(योगसूत्र २-५४) | ।।यो. दृ. १५४टी।। |
| प्रत्येकबुद्धलाभाः | * एकं वस्तु प्रति प्रत्येकम्, बोधो बुद्धम्, तस्य लाभो बुद्धलाभः, प्रत्येकं<br>बुद्धलाभो येषां ते करकण्ड्वादयः । | ।।उप.मा.(सि.) १८० टी।। |
| प्रथमधर्म्मस्थानप्राप्तिः | * धर्म्मप्रशंसादिरुपा । | ।।ल.वि. धम्मसारहीणं व्या.।। |
| प्रधानम् | * मुख्यता । | ।।अ.सा.पं. २४टी।। |

| शब्दाः | उपनिषद् | ग्रन्थाः |
|---|---|---|
| प्रबलाशीविषा | ✻ प्रबलाऽत्युग्रा आशी दंष्ट्रा तस्यां विषमिव विषं विद्यते यस्यां सा, तथा शापमात्रप्रदानतो व्यापादनसमर्थेति यावत् । | ।।अ.सा.द्वि. १०३टी।। |
| प्रभा दृष्टिः | ✻ ध्यानप्रिया प्रभा प्रायो नास्यां रुगत एव हि । तत्त्वप्रतिपत्तियुता, विशेषेण शमान्विता ।। १७० ।। | ।।यो. दृ.।। |
| प्रभावना | ✻ उत्सर्पणा । | ।।ध.र. ६७टी।। |
| | ✻ प्रावचनिकप्रभृतयोऽष्टावपि स्वप्रभावेणैव प्रभवतो भगवच्छासनस्य देशकालौचित्येन यथायथं साहाय्यकरणात् प्रभावकाः, तेषां कर्म्म प्रभावना । | ।।हित. २५टी।। |
| प्रभावनाहेतुः | ✻ तीर्थोन्नतिकारणम् । | ।।ध.र. ९टी।। |
| प्रमत्तम् | ✻ विषयादिवाञ्छा । | ।।उप.मा.(सि.) ४७६ टी।। |
| प्रमदम् | ✻ आन्तरं प्रीतिप्रकर्षम् । | ।।हित. २२८टी।। |
| प्रमाणम् | ✻ प्रत्ययहेतुः । | ।।ध.र. ६९टी।। |
| | ✻ प्रत्यक्षानुमानशाब्दादिकम् । | ।।अ.सा.च. २२टी।। |
| प्रमाता | ✻ प्रकर्षेण मिनोति इयत्तामवधारयति यःस तथा । | ।।अ.सा.प्र. ८९टी।। |
| प्रमादः | ✻ अनाभोगादिः । | ।।हित. ५१टी।। |
| | ✻ विकथादि । | ।।ल.वि. नमुत्थुणं व्या.।। |
| प्रवचनकुशलः | ✻ सुत्ते अत्थे य तहा उस्सग्गववायभाववववहारे । जो कुसलत्तं पत्तो पवयणकुसलो तओ छद्धा ।। ५२ ।। | ।।ध.र.।। |
| प्रवचनम् | ✻ प्रकृष्टं वचनं प्रवचनमाऽऽगमः । | ।।ध.र. ५२टी।। |
| | ✻ द्वादशाङ्गं गणिपिटकम् । | ।।हित. २५टी।। |
| | ✻ तीर्थं चातुर्वर्णसङ्घरुपमागमरुपं च । | ।।उप.मा.(सि.) १२ टी।। |
| | ✻ सर्वज्ञागमः । | ।।उप.मा.(सि.) ३९२ टी।। |
| | ✻ प्रकृष्टं सकलदोषवर्जितं यथावस्थितवस्तुस्वरुपाभिधायि यद् वचनमागमः । | ।।अ.सा.च. ३८टी।। |
| प्रवरः | ✻ प्रधानो निर्मिथ्य इति भावः । | ।।ध.र. १२०टी।। |
| प्रवर्तकः | ✻ तवसंजमजोगेसु, जो जोगो तत्थ तं पवत्तेइ । असुहं च निवत्तेइ, गणतत्तिल्लो पवित्तीओ ।। १९१ ।। | ।।संबोध.प्र.गुरु अधि.।। |
| प्रवृत्तचक्रयोगिनः | ✻ प्रवृत्तचक्रास्तु पुन–र्यमद्वयसमाश्रयाः । शेषद्वयार्थिनोऽत्यन्तं, शुश्रूषादिगुणान्विताः ।। २१२ ।। | |
| | ✻ आद्यावश्चकयोगाप्त्या, तदन्यद्वयलाभिनः । एतेऽधिकारिणो योग–प्रयोगस्येति तद्विदः ।। २१३ ।। | ।।यो. दृ.।। |
| प्रवृत्तिः | ✻ चरमयथाप्रवृत्तकरणशुद्धिलक्षणा । | ।।ल.वि. मग्गदयाणं व्या.।। |
| प्रवृत्तियोगः | ✻ अधिकृतधर्मस्थानोद्देशेन तदुपायविषय इतिकर्तव्यताशुद्धः शीघ्रक्रियासमाप्तीच्छादिलक्षणौत्सुक्यविरहितः प्रयत्नातिशयः प्रवृत्तिः । | ।।यो.विं. १टी।। |
| | ✻ प्रवृत्तिस्तु सर्वावस्थायां उपशमप्रधानं यथा स्यात्तथा यथाविहितस्थानादियोगपालनं वीर्यातिशयाद् यथाशास्त्रमङ्गसाकल्येन विधीमानं स्थानादि प्रवृत्तिरुपमित्यर्थः । प्रवृत्तिरुपं स्थानादियोगविधानं सातिचारत्वाद्बाधकचिन्तासहितं भवति । | ।।यो.विं. ६टी।। |

| शब्दाः | उपनिषद् | ग्रन्थाः |
|---|---|---|
| | ※ सर्वत्र शमसारं तु, यमपालनमेव यत् ।<br>प्रवृत्तिरिह विज्ञेया, द्वितीयो यम एव तत् ।। २१६ ।। | ।।यो. दृ.।। |
| **प्रव्रज्या** | ※ जिनदीक्षा । | ।।ध.र. १११टी।। |
| | ※ प्रवृत्तिलक्षणधर्मसन्यासरुपा, तस्याः ज्ञानयोगप्रतिपत्तिरुपत्वात् । | ।।यो. दृ. १०टी।। |
| | ※ सद्विवेकात् सर्वसङ्गपरित्यागरुपा भागवती दीक्षा । | ।।उप.मा.(सि.) ४६६ टी।। |
| **प्रशंसा** | ※ स्तुतिः । | ।।अ.सा.तृ. ७७टी।। |
| **प्रशमः** | ※ क्रोधकण्डूविषयतृष्णोपशमः । | ।।यो.विं ८टी।। |
| | ※ सामर्थ्ये सत्यपि कृतापराधेष्वपि क्षमा । | ।।अ.सा.तृ. ९०टी।। |
| **प्रशस्तरागः** | ※ अरिहंतेसु य रागो, रागो साहुसु बंभयारीसु ।<br>एस पसत्थो रागो, अज्ञ सरागाण साहूणं ।।३३।। | ।।संबोध.प्र. सम्य. अधि.।। |
| **प्रशान्तः** | ※ रागादिक्षयक्षयोपशमोपशमवान् । | ।।ल.वि. प्रणिधान सूत्रम्।। |
| **प्रशान्तवृत्तिः** | ※ कषायादिविकारनिरोधरुपा । | ।।यो.बिं. २१४टी।। |
| **प्रशान्तहृदयः** | ※ क्रोधाद्यस्पृष्टचित्तः । | ।।उप.मा.(सि.)११ टी।। |
| **प्रश्नः** | ※ शङ्किते सूत्रादौ संशयापनोदाय गुरुप्रच्छनं प्रश्नः । | ।।हित. ४८५टी।। |
| **प्रश्रवणम्** | ※ मूत्रम् । | ।।उप.मा.(सि.) १५९ टी।। |
| **प्राण-भूत-जीव-सत्त्वाः** | ※ दुतिचउरिंदिय पाणा, भूया पत्तेय तरुगणा नेया ।<br>सव्वे पणिंदि जीवा, सेसा सत्ता थिराइआ ।।३।। | ।।संबोध.प्र.श्राव.प्र.अधि.।। |
| | ※ प्राणाः द्वित्रिचतुः प्रोक्ता, भूतानि तरवः स्मृताः ।<br>जीवाः पञ्चेन्द्रियाः प्रोक्ताः, शेषाः सत्त्वाः इतिरिताः ।। १ ।। | ।।ध.र. ३टी।। |
| **प्राणिवधः** | ※ सत्त्वोन्मथनः । | ।।हित. ६१टी।। |
| **प्रातिभज्ञानम्** | ※ मार्गानुसारिप्रकृष्टोहाख्यज्ञानं प्रातिभज्ञानम् । नैतच्छ्रुतं न केवलं, न ज्ञानान्तरमिति, रात्रिंदिवारुणोदयवत् । तत्काल एव तथोत्कृष्टक्षयोपशमवतो भावात् श्रुतत्वेन तत्त्वतोऽसंव्यवहार्यत्वान्न श्रुतं, क्षायोपशमिकत्वादशेषद्रव्य-पर्यायाविषयत्वान्न केवलमिति । | ।।यो. दृ. ८टी।। |
| | ※ केवलज्ञानादधोवर्ति सहजं शुद्धिप्रकर्षप्राप्तिरुपं मतिज्ञानम् । | ।।अ.सा.पं. १७९टी।। |
| **प्रामाण्यम्** | ※ आप्तोपदिष्टत्वेनाभिधेयार्थाव्यभिचारिभावः । | ।।ल.वि. पुरिसुत्तमाणं व्या.।। |
| **प्रायश्चित्तम्** | ※ प्रायो बाहुल्येन चित्तविशोधना प्रायश्चित्तम् । | ।।हित. १९०टी।। |
| **प्रावचनी** | ※ प्रवचनं द्वादशाङ्गं गणिपिटकं, तदन्यापेक्षया अतिशयवदस्यास्तीति प्रावचनी, युगप्रधानागम इत्यर्थः । | ।।हित. २५टी।। |
| **प्रियंवदाः** | ※ कृतविप्रियेऽपि परे क्षीरमध्वाश्रविणः । | ।।हित. ३७५टी।। |
| **प्रियवचनम्** | ※ श्रवणसुखदम् अमर्म्मोद्घट्टनं धर्म्मानुगतं च वचनम् । | ।।हित. १३टी।। |
| **प्रीति-अनुष्ठानम्** | ※ जं कुणओ पीइरसो, वड्ढइ जीवस्स ऊजुसहावस्स ।<br>बालाईण व रयणे, पीइअणुट्ठाणमाहंसु ।।२३६।। | ।।संबोध.प्र.देव अधि.।। |
| | ※ यत्रानुष्ठाने प्रयत्नातिशयोऽस्ति परमा च प्रीतिरुपद्यते शेषत्यागेन च यत्क्रियते तत्प्रीत्यनुष्ठानम् । | ।।यो.विं. १८टी।। |

| शब्दाः | उपनिषद् | ग्रन्थाः |
|---|---|---|
| प्रीतिः | ✻ योगानुष्ठानं करणादौ हर्षः,आदिना धृतिधारणादिपरिग्रहः । | ।।यो.विं ७टी।। |
| | ✻ देवगुरुधर्मविषये रुचिः । | ।।अ.सा.तृ. ८९टी।। |
| प्रेक्षा | ✻ तत्त्वातत्त्वविचारवती बुद्धिः । | ।।अ.सा.प्र. ९२टी।। |
| प्रेक्षावन्तः | ✻ अतिनिपुणबुद्धिभाजः । | ।।यो.बिं. २४४टी।। |
| | ✻ यथालोचितकारिणः । | ।।यो. दृ. ९८टी।। |
| | ✻ परहियनिरओ धन्नो सम्मं विन्नायधम्मसब्भावो ।<br>अन्नेवि ठवइ मग्गे निरीहचित्तो महासत्तो ।। २७ ।। | ।।ध.र.।। |
| प्रेष्यत्यागप्रतिमा | ✻ नवमी नवमासे पुण, पेसारंभं विवज्जए सव्वं ।<br>पुव्वकिरियासमेओ, पूया कप्पूरवासेहिं ।।१०७।। | ।।संबोध.प्र.श्राव.प्र.अधि.।। |
| | **फ** | |
| फलम् | ✻ भावधर्मस्य संपत्तिर्या च सद्देशनादिना ।<br>फलं तदत्र विज्ञेयं नियमान्मोक्षसाधकम् ।।८०।। | ।।अ.सा.तृ.।। |
| फलावञ्चकयोगः | ✻ फलावञ्चकयोगस्तु, सद्भ्य एव नियोगतः ।<br>सानुबन्धफलावाप्ति-र्धर्मसिद्धौ सतां मता ।। २२० ।। | ।।यो. दृ. ।। |
| | **ब** | |
| बकुशचारित्रम् | ✻ उवगरणदेहचोक्खा रिद्धिजसगारवा सिया निच्चं ।<br>बहुसबलछेयजुत्ता निग्गंथा बाउसा भणिया ।। १ ।। | ।।ध.र. १३५टी।। |
| बकुशनिर्ग्रंथः | ✻ उवगरणसरीरेहिं, बउसो दुविहो य सोवि पंचविहो ।<br>आभोगाणाभोगसंवुडासंवुडसुहुमेहिं ।।२४५।। | ।।संबोध.प्र.गुरु अधि.।। |
| बकुशाः | ✻ शरीरोपकरणविभूषाकारिणः । | ।।ध.र. १३५टी।। |
| बन्धः | ✻ जीवस्य कर्मणः संयोगः । | ।।यो.बिं. १६५टी।। |
| | ✻ कर्मसंचयरुपः । | ।।यो.बिं. ४८६टी।। |
| | ✻ प्रकृति-स्थिति-प्रदेश-रसभेदाच्चतुर्द्धा बन्धः । | ।।हित. १५टी।। |
| बन्धत्वम् | ✻ जीवेन गृह्यमाणकार्मणवर्गणापुद्गलरुपया कृतकत्वम् । | ।।यो.बिं. १६५टी।। |
| बन्धयोग्यता | ✻ कषाययोगप्रवृत्तिरुपा । | ।।ल.वि. वियट्ट. व्या.।। |
| बहिर्मुखम् | ✻ आत्मधर्माद्विमुखम् । | ।।अ.सा.स. ४टी।। |
| बला दृष्टिः | ✻ सुखासनसमायुक्तं , बलायां दर्शनं दृढम् ।<br>परा च तत्त्वशुश्रूषा, न क्षेपो योगगोचरः ।। ४९ ।। | ।।यो.दृ.।। |
| बहिरात्मा | ✻ आत्मबुद्ध्या गृहीतदेहादिः । | ।।अ.सा.स. २१टी।। |
| बहुजनाः | ✻ स्वजनपरिजनाः शिष्टाः । | ।।ध.र. २२टी।। |
| बहुज्ञापना | ✻ ज्ञाप्यते परप्रतीतं क्रियतेऽमूभिरिति ज्ञापना रञ्जना बहवश्च ता ज्ञापनाश्च<br>बहुज्ञापनाः । | ।।उप.मा.(सि.) २० टी।। |
| बहुमानः | ✻ आन्तरप्रीतिः । | ।।उप.मा.(सि.) ७५ टी।। |
| बहुमानः | ✻ भवर्निर्वेदः । | ।।ल.वि. धम्मदयाणं व्या.।। |
| | ✻ आन्तरप्रीतिं धर्मप्रतिपत्तिहेतुं बोधिबीज़भूतं वा । | ।।ध.र. ११टी।। |

| शब्दाः | उपनिषद् | ग्रन्थाः |
|---|---|---|
| | ✻ भावेण अणुदिनं चिय एस गुरु पंडिओ महप्पा य ।<br>इय माणसपरिणामो बहुमाणो माणणिज्जेसु ।। २ ।। | ।।ध.र. ३५टी।। |
| | ✻ मानसः प्रीतिविशेषः । | ।।ध.र. ३५टी।। |
| | ✻ विशेषगौरवम् । | ।।हित. १०९टी।। |
| | ✻ आन्तरप्रीतिप्रकर्षम् | ।।हित. २२२टी।। |
| | ✻ आन्तरप्रीतिः । | ।।अ.सा.तृ. ७७टी।। |
| **बालः** | ✻ हिताहितविवेकशून्यः । | ।।यो. दृ. ३०टी।। |
| **बालक्रीडा** | ✻ बालिशजनविनोदव्यापारा । | ।।ध.र. ३८टी।। |
| **बालश्रावकः** | ✻ सारं मण्णइ सव्वं, पच्चक्खाणं खु भवदुहपमट्टं ।<br>सुभसंसासंजणिया, बाला रुइमत्तसम्मत्ता ।।८।। | ।।संबोध.प्र.श्राव.प्र.अधि.।। |
| **बाह्यात्मा** | ✻ विषयकषायावेशस्तत्त्वाश्रद्धा गुणेषु च द्वेषः ।<br>आत्माज्ञानं च यदा बाह्यात्मा स्यात्तदा व्यक्तः ।।२२।। | ।।अ.सा.स.।। |
| **बिभीषिका** | ✻ वेतालादिभि-र्वित्रासनम् । | ।।उप.मा.(सि.) ३२० टी।। |
| **बीजं बीजबीजम्** | ✻ बीजं सम्यक्त्वम् , बीजबीजं तदाक्षेपकशासनप्रशंसादि । | ।।पंच सू.- च.सू.टी।। |
| **बीजम्** | ✻ बीजं चेह जनान् दृष्ट्वा शुद्धानुष्ठानकारिणः ।<br>बहुमानप्रशंसाभ्यां चिकीर्षा शुद्धगोचरा ।।७७।। | ।।अ.सा.तृ.।। |
| | ✻ उत्पत्तिकारणम् । | ।।अ.सा.च. ४५टी।। |
| | ✻ हेतुः । | ।।ल.वि. नमो. जिअ. व्या.।। |
| **बीजरुचिः** | ✻ यस्यैकदेशेऽपि प्राप्ते वटबीजवदनेकप्रकारेण तत्त्वावगाहिनी मतिर्भवति,<br>स बीजरुचिः । | ।।अ.सा.च. ७टी।। |
| **बीजाधानादिसंविभक्तो** | ✻ धर्म्मबीजवपनचिन्तासच्छ्रुत्यादिना कुशलाशयविशेषेण सर्व्वथा<br>स्वायत्तीकृतेन संविभक्तः समयापेक्षया संगतविभागवान् कृतो यः । | ।।ल.वि. लोगनाहाणं व्या.।। |
| **बुद्धाः** | ✻ अज्ञाननिद्राप्रसुप्ते जगत्यपरोपदेशेन जीवाजीवादिरुपं तत्त्वं बुद्धवन्तो बुद्धाः,<br>स्वसंविदितेन ज्ञानेन । | ।।ल.वि. बुद्धा.बोह. व्या.।। |
| | ✻ अज्ञाननिद्राप्रसुप्ते जगत्ययपरोपदेशेन जीवादिरूपं तत्त्वं बुद्धवन्तो बुद्धाः<br>सर्वज्ञसर्वदर्शिस्वभावबोधरुपा इत्यर्थः । | ।।ल.वि. सिद्धाणं व्या.।। |
| **बुद्धिगुणाः** | ✻ शुश्रूषादयः सकललौकिकलोकोत्तरव्यवहारगोचराः । | ।।हित. २७४टी।। |
| **बुद्धिधर्मभूतज्ञानवादिन** | ✻ बुद्धियोगज्ञानवादिनः कपिलाः सांख्याः, तेषां प्रक्रियाः सत्त्वरजस्तमोलक्षणस्त्रयो गुणाः, तत्साम्यावस्था प्रकृतिः, सैव च प्रधानमित्युच्यते । प्रकृते-र्महान् महदिति बुद्धेराख्या । महतोऽहङ्कारः, आत्माभिमानः । ततः पञ्च बुद्धीन्द्रियाणि, श्रोत्रादीनि, वाक्पाणिपादपायूपस्थलक्षणानि पञ्चैव कर्मेन्द्रियाणि, एकादशरुपं मनः, तथा पञ्च तन्मात्राणि गन्धरसरुपस्पर्शशब्दस्वभावानि । तन्मात्रेभ्यश्च यथाक्रमं भूप्रभृतीनि पञ्च महाभूतानि प्रवर्तन्ते इति । अत्र च प्रकृतिविकारत्वेनाचेतनापि बुद्धिश्चैतन्यस्वतत्त्वपुरुषोपरागात् सचेतनेवावभासते । तदुक्तम् , | |

| शब्दाः | | उपनिषद् | ग्रन्थाः |
|---|---|---|---|
| | | पुरुषोऽविकृतात्मैव स्वनिर्भासमचेतनम् ।<br>मनः करोति सान्निध्यादुपाधिः स्फटिकं यथा ॥१॥<br>बुद्धयध्यवसितमर्थं पुरुषश्चेतयते इति वचनात् । बुद्ध्या अनन्तरोक्तया अध्यवसितं प्रतिपन्नं अर्थं शब्दादिविषयं पुरुष आत्मा चेतयते जानाति, अर्थचेतने बुद्धेरन्तरङ्गकरणत्वात् । | ॥ल.वि. सव्वन्नूणं. व्या.॥ |
| बुद्धिभेदः | * | यथाकथाञ्चित् क्रियमाणायामधिकृतक्रियायामनास्थया क्षुद्रसत्त्वतया च शुद्धकरणासामर्थ्यात् करणपरिणामविघटनम् । | ॥ल.वि. प्रस्तावना॥ |
| बुधः | * | स्वपरभावविवेचने पंडितः तत्त्वविदित्यर्थः । | ॥अ.सा.पं. ८१टी॥ |
| बोधः | * | विशेषग्राहिज्ञानम् । | ॥अ.सा.तृ. ११४टी॥ |
| | * | ज्ञानविकाशः । | ॥अ.सा.च. १५४टी॥ |
| | * | विषयादिवस्तुस्वरुपविज्ञप्तिः । | ॥अ.सा.ष. ४५टी॥ |
| | * | सदसत्प्रवृत्तिनिवृत्तिहेतु-र्ज्ञानविशेषः । | ॥ल.वि. सयं संबुद्धाणं व्या.॥ |
| बोधपरिणतिः | * | सम्यग्ज्ञानस्थिरता, रहिता कुतर्कयोगेन, संवृतरत्नाधारावाप्तिकल्पा, युक्ता मार्गानुसारितया, तन्त्रयुक्तिप्रधाना । | ॥ल.वि. नमुत्थुणं व्या.॥ |
| बोधस्य सूक्ष्मत्वम् | * | भवसमुद्रसमुत्तारणाल्लोकोत्तरप्रवृत्तिहेतुतया तथा कर्मवज्रविभेदेन कात्स्न्येना-ऽनन्तधर्मात्मकतत्त्वप्रतिपत्त्या च निपुणत्वम् । | ॥यो. दृ. ६६टी॥ |
| बोधिः | * | तत्त्वार्थश्रद्धानरुपा शिवशाखिबीजकल्पा । | ॥हित. ४७६टी॥ |
| बोधिदाः | * | बोधिः = जिनप्रणितधर्मप्राप्तिः । इयं पुन-र्यथाप्रवृत्तापूर्वाऽनिवृत्तिकरण-त्रयव्यापाराभिव्यङ्ग्यमभिन्नपूर्वग्रन्थिभेदतः पश्चानुपूर्व्या प्रशम-संवेग-निर्वेदाऽनुकम्पाऽऽस्तिक्याभिव्यक्तिलक्षणं तत्त्वार्थश्रद्धानं सम्यग्दर्शनम् विज्ञप्तिरित्यथः। तं ददाताति बोधिदाः । | ॥ल.वि.बोहिदयाणं व्या.॥ |
| बोधिलाभः | * | प्रेत्य जिनप्रणीतधर्मप्राप्तिलक्षणः । | ॥उप.मा.(सि.) ४९३ टी॥ |
| | * | जिनप्रणीतधर्मप्राप्तिः । | ॥ल.वि.अरिहंत चेइ. व्या.॥ |
| बोधिविघातः | * | प्रेत्य जिनधर्मप्राप्त्यऽभावः । | ॥ध.र. १३४टी॥ |
| बौद्धाः | * | सुगतशिष्याः । | ॥अ.सा.ष. २०२टी॥ |
| ब्रह्म | * | सकलोपाधिरहितमात्मस्वरुपम् । | ॥अ.सा.पं. ४४टी॥ |
| ब्रह्मज्ञः | * | ब्रह्म निर्विकारशुद्धचैतन्यं जानाति वेत्ति यः सः । | ॥अ.सा.स. २६टी॥ |
| ब्रह्मविलासः | * | चिदानन्दसमुल्लासः । | ॥अ.सा.स. २६टी॥ |
| ब्रह्मस्थः | * | ब्रह्माणि परमात्मनि तिष्ठति ज्ञानोपयोगेन निवसतीति ब्रह्मस्थः । | ॥अ.सा.स. २६टी॥ |
| ब्रह्मा | * | परमपुरुषः, अद्वैतरुपः, पुरुष एवेदमित्यादि वेदवाक्यनिरुपितः । | ॥ल.वि.नमो.जिअ. व्या.॥ |

## भ

| | | | |
|---|---|---|---|
| भंगाः | * | सर्वेषां द्रव्यानामर्थविकल्पाः अर्थान्तरगमनप्रकारा वा । | ॥अ.सा.पं. १२२टी॥ |
| भक्तप्रत्याख्यान-मनशनम् | * | गच्छे स्थितस्यैव तीव्रवेदनीयोदयादुद्भूत-दुस्सहवेदनस्याहारपरिहारेण भवति,यदि वा वयःपरिणामे कृतकृत्यस्य । | ॥हित. १८९टी॥ |
| भक्ति-अनुष्ठानम् | * | बहुमाणविसेसाओ, मंदविवेगस्स भव्वजीवस्स ।<br>पुव्विल्लसमं करणं, भत्तिअणुट्ठाणमाहंसु ॥२३७॥ | ॥संबोध.प्र.देव.अधि.॥ |

| शब्दाः | उपनिषद् | ग्रन्थाः |
|---|---|---|
| भक्तिः | ※ एतत् ( प्रीतिः ) तुल्यमऽप्याऽऽलम्बनीयस्य पूज्यत्वविशेषबुद्धया विशुद्धतरव्यापारं भक्त्यनुष्ठानम् । | ।।यो.विं १८टी।। |
| | ※ निर्व्याजमानसप्रीतिः । | ।।हित. ३०३टी।। |
| | ※ बाह्यसेवा । | ।।उप.मा.(सि.) ७५ टी।। |
| | ※ जिने पूज्यबुद्धिगुणोपकारस्मरणप्रीतिबहुमानरुपा । | ।।अ.सा.च. ४८टी।। |
| भक्तिबहुमानपूर्वम् | ※ भक्तिरान्तरा प्रीतिः, बहुमानस्तु वाचिकः कायिकश्च । तत्पूर्वं तत्पुरस्सरम् । | ।।हित. २९८टी।। |
| भक्तिरागः | ※ मानसप्रीतिप्रकर्षः । | ।।हित. २६टी।। |
| | ※ चेतसोऽनुबन्धः । | ।।उप.मा.(सि.) २३७ टी।। |
| भगः | ※ समग्रैश्वर्यादिलक्षणः । उक्तं च,<br>ऐश्वर्यस्य समग्रस्य रुपस्य यशसः श्रियः ।<br>धर्म्मस्याथ प्रयत्नस्य षण्णां भग इतीङ्गना ।।१।। | ।।ल.वि. भगवंताणं व्या.।। |
| भगवद्बहुमानम् | ※ अर्हत्पक्षपातः, भवनिर्वेदस्यैव भगवद्बहुमानत्वात् । | ।।ल.वि. अभयदयाणं व्या.।। |
| | ※ अचिन्त्यचिन्तामणिकल्पतीर्थंकरप्रतिबन्धः । | ।।पंच सू.- च.सू.टी।। |
| भगवन्तः | ※ भगः समग्रैश्वर्यादिलक्षणः, स विद्यते येषां ते भगवन्तः । | ।।पंच सू.- प्र.सू.टी।।<br>।।उप.मा.(सि.) ४४८ टी।। |
| | ※ कुरीचर-बहूदक-हंस-परमहंसभेदाश्चतुष्प्रकाराः । | ।।हित. ३१३टी।। |
| भगवान् | ※ सर्वातिशयनिलयः । | ।।हित. १४६टी।। |
| | ※ सर्वातिशयकोशः । | ।।हित. ४०३टी।। |
| | ※ क्षीणरागद्वेषमोहः। | ।।हित. ४८४टी।। |
| | ※ परमगुरुः । | ।।ल.वि. धम्मदयाणं व्या.।। |
| भद्रः | ※ कल्याणः सुखश्च तत्स्वरुपत्वात्तद्धेतुत्वाद्वा । | ।।उप.मा.(सि.) ६ टी।। |
| भद्रिकश्रावकः | ※ जं जं भणियं समए, तं तं वि तह गुरुविणिद्दिट्ठं ।<br>इइ मुणिऊण समग्गं, कुव्वंति हु भद्दिया ते य ।।९।। | ।।संबोध.प्र.श्राव.प्र.अधि.।। |
| भयम् | ※ हीनसत्त्वतयाऽऽकस्मिकम् । | ।।उप.मा.(सि.) ३२० टी।। |
| भयविनयः-अर्थविनयः | ※ चोराभिमराईसुं अंजलिबंधाइओ उ भयविणओ ।<br>अत्थविणओ य पत्थिवपभिइसु पडिवत्तिकरणं जं ।। २१७ ।। | ।।हित.।। |
| भयसूत्र-दृष्टांतम् | ※ नरएसु मंसरुहिराइवन्नाणं जं पसिद्धिमेत्तेण ।<br>भयहेउ इहर तेसिं वेउव्वियभावओ न तयं ।। ४ ।। | ।।ध.र. १०६टी।। |
| भवः | ※ भवन्त्यऽस्मिन्नारकतिर्यङ्नरामररुपेण प्राणिन इति भवः संसारः । | ।।ध.र. २टी।। |
| | ※ भवन्त्यऽस्मिन् कर्म परिणामवशवर्तिनः प्राणिन इति भवः संसारः । | ।।यो.श. १३टी।। |
| | ※ दुरन्तदुःखलक्षाक्षीणखनिः । | ।।हित. २५९टी।। |
| | ※ कर्म्माष्टकोदयलक्षणः । | ।।ल.वि.तिन्ना.तार. व्या.।। |
| भवनिर्वेदः | ※ संसारोद्वेगः ।<br>"कायः संनिहितापायः सम्पदः पदमापदाम् ।<br>समागमाः सापगमाः, सर्व्वमुत्पादि भङ्गुरम् ।।१।।" एवं चिंतालक्षणः । | ।।ल.वि. अभयदयाणं व्या.।। |

| शब्दाः | उपनिषद् | ग्रन्थाः |
|---|---|---|
| भवनैर्गुण्यम् | ✻ जरामरणादिव्यसनबहुलतया संसारनिर्गुणभावम् । | ।।यो.बि.२८४टी।। |
| भवबालदशा | ✻ प्रवर्धमानमोहमतिकतया संसारस्य कुमारावस्था । | ।।अ.सा.तृ. ७३टी।। |
| भवबीजपरित्यागः | ✻ मनाक् स्वगतसंसारयोग्यतापरिहाणिः । | ।।यो.बिं. १४०टी।। |
| भवभावः | ✻ संसारपर्यायः । | ।।ल.वि. नमो. जिअ. व्या.।। |
| भवभीरुः | ✻ संसारवासचलितमनाः । | ।।ध.र. ६४टी।। |
| भवसंसारानुबन्धि | ✻ भवन्त्यस्मिन्नानारुपाः प्राणिन इति भवो नारकादिः, तस्मिन् संसरणं पर्यटनं भवसंसारस्तमनुबद्धुं शीलं यस्य तद् भुवसंसारानुबन्धि । | ।।उप.मा.(सि.) ३० टी।। |
| भवातीतार्थयायिनः | ✻ प्राकृतेष्विह भावेषु, येषां चेतो निरुत्सुकम् ।<br>भवभोगविरक्तास्ते, भवातीतार्थयायिनः ।। १२७ ।। | ।।यो. दृ.।। |
| भवान्ध्यम् | ✻ रागद्वेषमोहलक्षणसंसारान्धभावम् । | ।।यो.बिं. ५२६टी।। |
| भवाभिनंदी | ✻ भवं सांसारिकविषयजन्यसुखमभिनन्दति प्रशंसतीति भवाभिनन्दी भवप्रियः । | ।।अ.सा.प्र. २९टी।। |
| | ✻ अत्यन्तासारमपि संसारं प्रति बहुमानवन्तः । | ।।यो.बिं. १३६टी।। |
| | ✻ क्षुद्रो लाभरतिर्दीनो मत्सरी भयवान् शठः ।<br>अज्ञो भवाभिनन्दी स्यान्निष्फलारम्भसंगतः ।। ८७ ।। | ।।यो.बिं. ।। |
| | ✻ संसारबहुमानी । | ।।यो. दृ. ७६टी।। |
| भवाभिष्वङ्गः | ✻ इहामुत्रफलापेक्षा भवाभिष्वङ्ग उच्यते ।<br>तथानध्यवसायस्तु स्यादनाभोग इत्यपि ।। १५१ ।। | ।।यो.बिं. ।। |
| भविः | ✻ भवनं भवो मोक्षः सोऽस्ति प्राप्तव्यतया यस्य स भविः । | ।।अ.सा. प्र.२टी।। |
| भव्यत्वम् | ✻ योग्यतामात्रमेव सिद्धिं प्रति केषाञ्चित्प्राणिनां येन कदाचिदऽपि सेत्स्यन्ति । | ।।पंच सू.- पंच.सू.टी।। |
| | ✻ सिद्धिगमनयोग्यत्वम् अनादिपरिणामिको भावः । भविष्यति विवक्षितपर्यायेणेति भव्यः, तद्भावो भव्यत्वम् । भव्यत्वनामको जीवपर्यायः । | ।।ल.वि. लोगुत्तमाणं व्या.।। |
| भव्यसत्त्वाः | ✻ मुक्तिगमनयोग्याङ्गिनः । | ।।हित. २५८टी।। |
| | ✻ मोक्षगमनयोग्याऽपुनर्बन्धकादिजन्तवः । | ।।यो.विं ७टी।। |
| भव्याः | ✻ मुक्तिगमनयोग्याः । | ।।ध.र. १२५टी।। |
| | ✻ समासन्नमुक्तयः । | ।।हित. १६४टी।। |
| | ✻ निर्वाणार्हजीवाः । | ।।यो.बिं. २६५टी।। |
| | ✻ भव्यत्वं मुक्तिगमनयोग्यत्वमनादिपारिणामिकभाववत्त्वं, तदस्ति यस्य स भव्यः । | ।।अ.सा.च. १२६टी।। |
| भागवताः | ✻ भक्तिमार्गिणः पौराणिकाः । | ।।अ.सा.च. १३टी।। |
| भावः | ✻ चेतोभावः । | ।।ध.र. ४९टी।। |
| | ✻ निश्चयनयाभिप्रायः । | ।।ध.र. ५२टी।। |
| | ✻ नैश्चयिकः परिणामः । | ।।ध.र. ५४टी।। |
| | ✻ शुभाध्यवसायः । | ।।हित. ४०टी।। |
| | ✻ मनःशुद्धिप्रकर्षः। | ।।हित. २११टी।। |
| | ✻ विशुद्धवासना । | ।।हित. २०१टी।। |

| शब्दाः | उपनिषद् | ग्रन्थाः |
|---|---|---|
| | * श्रद्धा । | ।।हित. २०२टी।। |
| | * शुभपरिणामपूर्वकोपयोगविशेषः । | ।।अ.सा.तृ. ६८टी।। |
| | * धर्मपरिणामः । | ।।अ.सा.तृ. ९२टी।। |
| **भाव-द्रव्यलेश्ये** | * अणुभागहेऊरुवा, भावा पुण कम्मझरणओ दव्वा ।<br>करणपवित्तिनिमित्ता, जोगाणं सरुवमेयासिं ।।३३।। | ।।संबोध.प्र.लेश्या अधि.।। |
| **भावधर्म्मप्राप्तिः** | * क्षायोपशमिकादिधर्म्मलाभः । | ।।ल.वि. धम्मसारहीणं व्या.।। |
| **भावना** | * अध्यात्मस्यैव प्रतिदिनं प्रवर्धमानश्चित्तवृत्तिनिरोधयुक्तोऽभ्यासः । | ।।यो.विं. ३टी।। |
| | * अभ्यासोऽस्यैव ( अध्यात्मस्यैव )विज्ञेयः प्रत्यहं वृद्धिसंगतः ।<br>मनःसमाधिसंयुक्तः पौनः पुन्येन भावना ।।३५९।। | ।।यो.बिं. ।। |
| | * वचनगर्भा चित्तवृत्तिः । | ।।यो.श. ८६टी।। |
| **भावनाश्रुतपाठः** | * रागादिप्रतिपक्षभावनं भावना, तत्प्रतिबद्धं श्रुतं भावनाश्रुतम् , रागादिनिमित्त-<br>स्वरुप - फलप्रतिपादक मित्यर्थस्तस्य पाठः, विधिनाऽ-<br>ध्ययनम्, अन्यथा त्वन्यायोपात्तार्थवत् ततः कल्याणाभावात् । | ।।यो.श. ५२टी।। |
| **भावप्राणाः** | * स्वरुपसिद्धजीवविशेषा निरावरणज्ञानादयः । | ।।अ.सा.ष. ५४टी।। |
| **भावमलम्** | * तत्तत्पुद्गलादिसम्बन्धयोग्यतालक्षणम् । | ।।यो. दृ. ३०टी।। |
| **भावमलाल्पता** | * कर्मसम्बन्धयोग्यताल्पता । | ।।यो. दृ. ३५टी।। |
| **भावतीर्थम्** | * चतुर्विधः श्रीश्रमणसङ्घः प्रथमगणधरो वा । | ।।हित. २५टी।। |
| **भावलिंगरतः** | * भावतोऽन्तर्वृत्तितो लिंगं सम्यग्वस्तुधर्मश्रद्धानज्ञानादिधर्मिलक्षणं तस्मिन् रतः प्रीतः । | ।।अ.सा.ष. १८२टी।। |
| **भावलेश्या** | * परिणामो सव्वत्थ, वि जायइ समत्तकज्जसंपत्ती ।<br>सा णेया भावलेसा, कम्मनिस्संदरुवा य ।।२१।। | ।।संबोध.प्र.लेश्या अधि.।। |
| **भावश्रावकः** | * कयवयकम्मो तह सीलवं गुणवं च उज्जुववहारी ।<br>गुरुसुस्सूसो पवयणकुसलो खलु सावगो भावे ।।७३।। | ।।संबोध.प्र.श्राव.प्र.अधि.।। |
| **भावसाधुः** | * क्षान्त्यादिगुणसंपन्नो मैत्र्यादिगुणभूषितः ।<br>अप्रमादि सदाचारे भावसाधुः प्रकीर्त्तितः ।। २ ।। | ।।ध.र. ७७टी।। |
| **भावसाम-सम-सम्यगेकाः** | * आओवमाइ परदुक्खमकरणं(साम) रागदोसमज्झत्थं(समः) ।<br>नाणाइतिय(सम्यग्) तस्साइ पोयणं (एकः) भावसामाई ।।१०८।। | ।।संबोध.प्र.श्राव.प्र.अधि.।। |
| **भावसारः** | * स्वतो वासितेनान्तःकरणेन संवेगसारः । | ।।यो.श. २९टी।। |
| | * शुद्धश्रद्धाप्रधानम् । | ।।यो.बिं. १६०टी।। |
| | * तत्त्वपरिणतिप्रधानाः । | ।।यो.बिं. १७७टी।। |
| **भावस्तवः** | * यथाभूताऽन्याऽसाधारणगुणोत्कीर्तनरुपत्वाद् भावस्तवस्य । | ।।यो. दृ. १टी।। |
| **भावस्तवाङ्गम्** | * शुद्धसाधुभावनिबंधनम् । | ।।ल.वि. अरिहंत चेइ. व्या.।। |
| **भावस्तैमित्यम्** | * भावोऽन्तःकरणं, तस्य स्तैमित्यं क्षुद्रतादिभवाभिनन्दिचित्तदोषैरऽक्षोभणीयता । | ।।यो.बिं. २०८टी।। |
| **भावाभिग्रहः** | * विशिष्टक्षयोपशमभावरुपः । | ।।यो. दृ. २७टी।। |
| **भावितपरमार्थाः** | * मनसि परिणामितः परमार्थो यथावस्थितपक्षो यैस्ते भावितपरमार्थाः । | ।।ध.र. १३६टी।। |
| **भावेन्द्रियम्** | * क्षयोपशम उपयोगश्च, लब्ध्युपयोगौ भावेन्द्रियमिति वचनात् । | ।।ल.वि. चक्खुदयाणं व्या.।। |

| शब्दाः | उपनिषद् | ग्रन्थाः |
|---|---|---|
| भाषासमिति: | ✻ कज्जे भासइ भासं, अणवज्जमकारणे न भासइ य ।<br>विगहविसोत्तियपरिवज्जिओ य जइ भासणासमिओ ।।२९६।। | ।।उप.मा.(सि.)।। |
| | ✻ भयहासकोहलोहेहिं विरहियं निउणबुद्धिसंठवियं ।<br>सियवायमणुपविट्ठं भासं भासंति तस्समिया ।। ४७१ ।। | ।।हित.।। |
| भिन्नग्रन्थि: | ✻ अपूर्वकरणवज्रप्रहारविदारितघनरागद्वेषमोहपरिणामः । | ।।यो.बिं. ७२टी।। |
| | ✻ विदारितातितीव्ररागद्वेषपरिणामः । | ।।यो.बिं. २०३टी।। |
| भीरु: | ✻ इहपरलोगावाए संभावेंतो न वट्टई पावे ।<br>बीहइ अयसकलंका तो खलु धम्मारिहो भीरु ।। १३ ।। | ।।ध.र.।। |
| भूतानुकम्पा | ✻ भूताःस्वाभाविकौपाधिकशारीरवाचनिकमानसिकाद्यनेकव्याधितापसन्तप्ताः<br>प्राणिनः, तेषु तद्दुःखदर्शनादपक्षपातेन प्रतीकारेच्छाऽनुकम्पा । | ।।हित. २४टी।। |
| भूतार्थदर्शी | ✻ तत्त्वार्थदर्शी । | ।।पंच सू.- च.सू.टी।। |
| भूतिकर्म | ✻ अभिमन्त्रितभूतपरिवेषादिकम् । | ।।उप.मा.(सि.) ३६५ टी।। |
| भोग-आशातना | ✻ भोगो तंबोलाइ कीरंतो, जिणगिहे कुणइ वस्सं ।<br>नाणाइयाण आयस्स सायणं तो तमिहि वज्जे ।।८३।। | ।।संबोध.प्र.देव.अधि.।। |
| भ्रम: | ✻ विषयादिषु सुखत्वज्ञानरुपा भ्रान्ति । | ।।अ.सा.तृ. ३४टी।। |
| भ्रातृसम-श्राद्ध: | ✻ सुत्थावत्थे न नमइ मुणीण मंदायरो विणयकम्मे ।<br>भायसमाणो साहूण परिभवे होइ सुसहाओ ।। २ ।। | ।।हित ३०१ टी ।। |

## म

| शब्दाः | उपनिषद् | ग्रन्थाः |
|---|---|---|
| मतिज्ञानम् | ✻ मिज्जइ नज्जइ जेणं सद्दो अत्थो य उग्गहाइहिं ।<br>तं वट्टमाणविसयं मइनाणं भन्नए तेसु ।। ८० ।। | ।।हित.।। |
| मतिमान् | ✻ मार्गानुसारी प्राज्ञः । | ।।यो.बिं. २२१टी।। |
| मत्सर: | ✻ परकल्याणदुःस्थितः । | ।।यो. दृ. ७६टी।। |
| मत्सरित्वम् | ✻ असहनत्वम् । | ।।हित. ३५४टी।। |
| मत्सरी | ✻ मत्सरः परसंपदसहनं विद्यते यस्य स तथा । | ।।अ.सा.प्र. ३०टी।। |
| | ✻ परकल्याणदुःस्थितः । | ।।यो.बिं. ८७टी।। |
| मधुरम् | ✻ श्रोतुराहलादकम् । | ।।उप.मा.(सि.) ८० टी।। |
| मधुरवाक्य: | ✻ पेशलवचनः । | ।।उप.मा.(सि.)१० टी।। |
| मधुरोपक्रम: | ✻ सुखदोपायः । | ।।ध.र. १३१टी।। |
| मध्यस्थ: | ✻ सर्वत्र तुल्यचित्तः । | ।।ध.र. ७३टी।। |
| | ✻ स्वपक्षपरपक्षयो रागद्वेषरहितः सद्भूतवादी । | ।।ध.र. ९५टी।। |
| | ✻ मज्झत्थसोमदिट्ठी धम्मवियारं जहट्ठियं मुणइ ।<br>कुणइ गुणसंपओगं दोसे दूरं परिच्चयइ ।। १८ ।। | ।।ध. र.।। |
| | ✻ क्वचिद्दर्शने पक्षपातविकलाः । | ।।ध.र. १८टी।। |
| | ✻ स्वदर्शनराग-परदर्शनद्वेषयोर्मध्यभागवर्तिनः । | ।।यो.बिं. १टी।। |
| | ✻ रागद्वेषविकलाः । | ।।ध.र. ६टी।। |

| शब्दाः | उपनिषद् | ग्रन्थाः |
|---|---|---|
| | ※ कुग्रहाद्यदूषिताः । | ।।ध.र. १३६टी।। |
| **मनः** | ※ मनस उत्पादनभूता मनस्त्वेन परिणता वा पुद्गला मनः प्रोच्यते । | ।।अ.सा.ष. ४७टी।। |
| **मनःपर्यवज्ञानम्** | ※ आमाणुसुत्तराओ नगाओ पंचिंदियाण सन्नीणं । | |
| | मुणइ मणोगयभावे जं तं मणपज्जवं बिंति ।। ९४ ।। | ।।हित. ।। |
| **मनःशुद्धिः** | ※ मनसः शुद्धिःसद्भावग्राहिणी विमलता । | ।।अ.सा.च. १टी।। |
| | ※ मण वाया कायाणं, सुध्दी सम्मत्तसोहणी जत्थ । | |
| | मणसुध्दी जिणजिणमयवज्जमसारं मुणइ लोयं ।।६५।। | ।।संबोध.प्र. सम्य. अधि.।। |
| **मनःसमाधिसंयुक्तः** | ※ चित्तनिरोधयुक्तः । | ।।यो.बिं. ३५९टी।। |
| **मनोगुप्तिः** | ※ परिचत्तअट्टरुद्दे मणंमि समभावभाविए सम्मं । | |
| | वरधम्मसुक्कझाणाण संकमो होइ मणगुत्ती ।। ४८४ ।। | ।।हित.।। |
| **मन्त्रम्** | ※ देवाधिष्ठितम् । | ।।उप.मा.(सि.) ३६५ टी।। |
| **मन्मथः** | ※ सत्पथप्रमथनः । | ।।हित. १७९टी।। |
| **मन्युः** | ※ शोकातिरेकात् श्रोतसां निरोधः । | ।।उप.मा.(सि.) ३१९ टी।। |
| **मरणम्** | ※ भवान्तरसङ्क्रान्तिः । | ।।हित. ६टी।। |
| **मलना** | ※ जीवस्वभावविष्कम्भणा । | ।।यो.बिं. १६८टी।। |
| **मलिनितः कर्म** | ※ बहिर्जातमलः शुष्करेणुगुण्डितशरीरवत्, अनेन स्पृष्टदशां दर्शयति । | ।।उप.मा.(सि.) २४९ टी।। |
| **महाजनः** | ※ एकोऽपि शास्त्रनीत्या यो , वर्तते स महाजनः । | |
| | किमज्ञसार्थैः? शतमप्यन्धानां नैव पश्यति ।। १ ।। | ।।यो.विं. १६टी।। |
| **महात्मनः** | ※ प्रशस्तस्वभावाः । | ।।यो.बिं. ६३टी।। |
| | ※ परलोकप्रधानतया प्रशस्तात्मनः । | ।।यो.बिं. ११७टी।। |
| | ※ शुद्धप्रकृतिवान् उत्तमपुरुषः । | ।।अ.सा.च. ४७टी।। |
| **महादुःखबीजनाशः** | ※ तत्त्वं प्रति विपर्यासरुपमहादुःखं तस्य यद्बीजं हेतु र्मिथ्यात्वमोहादि तस्य नाशाद् विरहात् । | ।।यो.बिं. ३४२टी।। |
| **महापायनिवृत्तिः** | ※ महापायस्य संसारनामकस्याऽपारस्य पारकरणं निवृत्तिः । | ।।यो.बिं. १४९टी।। |
| **महाभागः** | ※ प्रशस्याऽचिन्त्यशक्तिः । | ।।यो.बिं. २२७टी।। |
| **महाभीषणकषाय-पातालानि** | ※ पातालप्रतिष्ठितत्वात् तद्वद्गम्भीरत्वाच्च पातालानि, योजनलक्षणप्रमाणाश्चत्वा-रोमहाकलशा महाभीषणाः कषाया एव पातालानि । | ।।ल.वि. तित्थयराणं व्या.।। |
| **महामतिः** | ※ महती मोक्षरुपकार्यसाधिका मति-र्बुद्धिर्यस्य स तथा । | ।।अ.सा.तृ. १०७टी।। |
| | ※ शिवेच्छुः । | ।।अ.सा.पं. १७टी।। |
| **महामिथ्यादृष्टिः** | ※ पुद्गलपरावर्ताधिकसंसारः । | ।।ल.वि. पुक्खर. व्या.।। |
| **महामोहः** | ※ मिथ्यात्वमोहः । | ।।ल.वि. प्रस्तावना।। |
| **महावीरः** | ※ कषायादिशत्रुजयाद् महाविक्रान्तो विशेषेणेरयति कर्म याति वेह शिवमिति वीरः, महांश्चासौवीरश्च महावीरः । | ।।यो.श. १टी।। |
| | ※ विशेषेण ईरयति कर्म्म गमयति, याति चेह शिवमिति वीरः,महांश्चासौवीरश्च महावीरः । | ।।ल.वि. सिद्धाणं व्या.।। |

| शब्दाः | | उपनिषद् | ग्रन्थाः |
|---|---|---|---|
| महाशयः | * | प्रशस्तपरिणामः । | ।।यो.बिं. २६३,२८५टी,।। |
| | * | स्फीतचित्तः । | ।।यो.बिं. २७२टी।। |
| महोदयः | * | प्रशस्तमाहात्म्यलाभलक्षणः । | ।।यो.बिं. २४२टी।। |
| | * | प्रशस्तगुणोद्गमः । | ।।यो.बिं. २७३टी।। |
| | * | निर्वाणपरमफला । | ।।यो. दृ. १५३टी।। |
| मातृस्थानम् | * | दोषाच्छादकत्वात् संसारिजन्महेतुत्वाद् वा मातेव माता माया, तस्याः स्थानम् । | ।।ल.वि. प्रस्तावना।। |
| मात्राधिकः | * | असाधारणगुणोपचितः । | ।।हित. २११टी।। |
| मात्राहीनः | * | जघन्यगुणः । | ।।हित. २११टी।। |
| माध्यस्थ्यम् | * | मध्यस्थोऽपक्षपाती तत्त्वपरीक्षाकृदिति यावत् तस्य भाव कर्म वा माध्यस्थ्यम् । | ।।अ.सा.द्वि. ७२टी।। |
| | | मध्ये तत्त्वपरिक्षायामपक्षपातित्वेन रागद्वेषयोरन्तराले तिष्ठतीति माध्यस्थ-स्तद्भावो माध्यस्थ्यम् । | ।।अ.सा.द्वि. ७६टी।। |
| | * | स्वपक्षानुरागपरपक्षद्वेषयोरऽन्तरालस्थायित्वम् । | ।।यो.बिं. ३००टी।। |
| मानसिकमिथ्यात्वत्यागः | * | एयं अणंतरुत्तं मिच्छं, मणसा न चिंतइ करेमि । सयमेसो व करेउ, अन्नेण कए व सुट्ठ कयं ।।४६।। | ।।संबोध.प्र. सम्य. अधि.।। |
| मायामरिचयः | * | मृगतृष्णिकाः । | ।।यो. दृ. १५६टी।। |
| मार्गः | * | सम्यग्दर्शनादिलक्षणः । | ।।यो.श. १५६टी।। |
| | * | चित्तविशुद्धिलक्षणः । | ।।यो. दृ. १२८टी।। |
| - | * | शुद्धधर्मः । | ।।ध.र. २७टी।। |
| | * | मृग्यतेऽन्विष्यतेऽभिमतस्थानावाप्तये पुरुषै-र्यः स मार्गः । | ।।ध.र. ८०टी।। |
| मार्गगामी | * | कल्याणप्रापकपथयाथी । | ।।यो.बिं. २७२टी।। |
| मार्गदाः | * | मार्गः चेतसोऽवक्रगमनं, भुजङ्गमगमननलिकायामतुल्यो विशिष्टगुणस्था-नावाप्तिप्रगुणः स्वरसवाही क्षयोपशमविशेषो दुःखहेतुर्दर्शनमोहादिक्षयविशेषः। हेतु-स्वरुप-फलशुद्धा धृतिश्रद्धालक्षणेन हेतुना स्वगतेन स्वरुपेण विविदिषादिना फलेन शुद्धा उपशमसुखरुपा सुखासिकेत्यर्थः, एष मार्गस्व-रुपनिश्चयः । तं ददातीति मार्गदाः । | ।।ल.वि. चक्खुदयाणं व्या.।। |
| मार्गविभेदः | * | पथि गच्छतः सिंहादिभयादुद्वर्तनम् । | ।।उप.मा.(सि.) ३२० टी।। |
| मार्गानुसारिक्रिया | * | मग्गो आगमनीई अहवा संविग्गबहुजणाइन्नं । उभयाणुसारिणी जा सा मग्गणुसारिणी किरिया ।। ८० ।। | ।।ध.र. ।। |
| मार्गानुसारिणी | * | मोक्षाध्वानुपातिनी । | ।।ध.र. ७८टी।। |
| मार्ग्गानुसारिबुद्धिः | * | सम्यग्दर्शनादिमोक्षमार्गानुयायिप्रज्ञा । | ।।ल.वि. पुक्खर. व्या.।। |
| मालिन्यातिशयः | * | भव्यत्वाऽपरिपाकः । | ।।यो.बिं. ७३टी।। |
| मितम् | * | अर्थवत् प्रयोजनसापेक्षम् । | ।।हित. १३टी।। |
| मित्रसम-श्राद्धः | * | मित्तसमाणो माणा ईसिं रुसइ अपुच्छिओ कज्जे । मन्नइ जो अप्पाणं मुणीण सयणाउ अब्भहियं ।। ३ ।। | ।।हित. ३०१ टी ।। |
| मित्रा दृष्टिः | * | मित्रायां दर्शनं मन्दं , यम इच्छादिकस्तथा । अखेदो देवकार्यादा-वद्वेषश्चापरत्र तु ।। २१ ।। | ।।यो. दृ.।। |

| शब्दाः | उपनिषद् | ग्रन्थाः |
|---|---|---|
| **मिथ्याचारः** | ✻ अन्तरऽनिरुद्धेन्द्रियादिविकारः । | ।।यो.बिं. ३८३टी।। |
| **मिथ्यात्वम्** | ✻ जीवाजीवादीनामस्तित्वानुपलब्धिर्वितथोपलब्धि-र्वा मिथ्यात्वम् । | ।।हित. १०टी।। |
| | ✻ जीवाजीवादीनामयथावस्थिता प्रतीति-र्मिथ्या, तद् भावो मिथ्यात्वम् । | ।।हित. १५टी।। |
| | ✻ विपरीताभिनिवेशम् । | ।।उप.मा.(सि.) ५०४ टी।। |
| | ✻ जिनोपदेशतो वैपरीत्येन वस्तुनः श्रद्धानम् तत्परिज्ञानं च। | ।।अ.सा.च. ५९टी।। |
| | ✻ मिथ्याऽसत्यं विपर्यस्तबुद्धित्वं च तद्भावस्तत्त्वम् । | ।।अ.सा.च. ९२टी।। |
| | ✻ सद्भूतभावापह्नुत्यसद्भूतभावोद्भाविनी दृष्टिः । | ।।अ.सा.पं. १टी।। |
| | ✻ विपरीतदृष्टिता । | ।।अ.सा.ष. १३२टी।। |
| **मिथ्यादुष्कृतम्** | ✻ मित्ति मिउमद्दवत्तेच्छत्ति य दोसाण छायणे होइ ।<br>मित्ति य मेराए ट्ठिओ दुत्ति दुगंच्छामि अप्पाणं ।। ६८६ ।।<br>कत्ति कडं मे पावं डत्ति य डेवेमि तं उवसमेणं ।<br>एसो मिच्छादुक्कड-पयक्खरत्थो समासेणं ।। ६८७ ।।(आवश्यक निर्युक्तिः) | ।।पंच -प्र.सू.टी।। |
| **मिथ्यादृशः** | ✻ मिथ्याऽर्हद्दृष्टिर्विसंवादिनी दृष्टिर्विचारो येषां ते । | ।।हित. ९३टी।। |
| **मिथ्यादृष्टयः** | ✻ विपर्यस्तबुद्धयः । | ।।उप.मा.(सि.) २१६ टी।। |
| | ✻ विपरीताभिनिवेशाद् भवानुयायिन इत्यर्थ । | ।।उप.मा.(सि.) ५२० टी।। |
| **मिथ्यादृष्टिः** | ✻ जाणिज्ज मिच्छदिट्ठी , जे पडणालंबणाइं घिप्पंति ।<br>जे पुण सम्मद्दिट्ठी, तेसिं पुण चढइ पयडीए ।।४३।। | ।।संबोध.प्र. सम्य. अधि.।। |
| | ✻ मिथ्या विपरीताऽन्यथावस्तुग्राहिणीति यावत् दृष्टिर्दर्शनं<br>वस्तुस्वरुपश्रद्धानं यस्य स तथा । | ।।अ.सा.च. ४टी।। |
| | ✻ जिनोक्ततत्त्वे विपरीतश्रद्धावान् । | ।।अ.सा.च. ४९टी।। |
| | ✻ धर्म्मबीजाधानाद्यनर्हः। | ।।ल.वि. पुक्खर. व्या.।। |
| | ✻ जो उस्सुत्तं भासइ, सद्दहइ कुणइ कारवे अण्णं ।<br>अणुमन्नइ कीरंतं, मणसा वाया वि काएणं ।।२९४।।<br>मिच्छद्दिट्ठी नियमा, सावएहिं पि सो वि मुणिरुवो ।<br>परिहरियव्वो जं दंसणे वि पच्छित्तं तस्स चउगुरुयं ।।२९५।। | ।।संबोध.प्र.गुरु अधि.।। |
| **मिथ्याभिनिवेशः** | ✻ मिथ्यात्वमोहनीयोदयवशादयथावस्थितार्थप्रतीतिर्मिथ्या, तद्रूपोऽभिनिवेश<br>आग्रहो मिथ्याभिनिवेशः । | ।।हित. २४टी।। |
| **मिश्रप्रायश्चित्तम्** | ✻ सद्दाइएसु रागाइविरयणं साहिउं गुरुण पुरो ।<br>दिज्जइ मिच्छादुक्कड-मेयं मीसं तु पच्छित्तं ।।५०।। | ।।संबोध.प्र.आलो.अधि.।। |
| | ✻ आलोचनप्रतिक्रमणरुपं प्रागालोचनं पश्चाद्<br>गुरुसन्दिष्टेन विधिना प्रतिक्रमणम् । | ।।हित. १९०टी।। |
| **मीमांसकः** | ✻ कर्म्ममीमांसक-ब्रह्ममीमांसकभेदाद् द्विधा । तत्र कर्म्ममीमांसका द्विजन्मानो<br>ब्रह्ममिमांसकाश्च भगवन्त एव । | ।।हित. ३१३टी।। |
| **मीमांसा** | ✻ तत्त्वविचारणा । | ।।अ.सा.द्वि. ५३टी।। |
| | ✻ सद्विचारात्मिका । | ।।यो. दृ.१६२टी।। |

| शब्दाः | उपनिषद् | ग्रन्था: |
|---|---|---|
| | * तीर्णः । | ।।ल.वि. तिन्ना.तार. व्या.।। |
| मुक्तः | * क्षीणभवः । | ।।ल.वि. नमो. जिअ. व्या.।। |
| मुक्तासुक्तिमुद्रा | * मुत्तासुत्ती मुद्दा, समा जहिं दोवि गब्भिया हत्था ।<br>ते पुण निडालदेसे, लग्गा अन्ने अलग्गत्ति ।।१।। | ।।ल.वि. प्रणिधान सूत्रम्।। |
| मुक्तिः | * कर्मक्षपणापर्यन्तप्राप्तः । | ।।यो.बिं. ४९५टी।। |
| | * अपुनरागमनेन एकान्तविशुद्धि-र्मुक्तिः । | ।।यो.श. ९२टी।। |
| | * भवाधिकारनिवृत्तिरेव । | ।।ल.वि. तिन्ना.तार. व्या.।। |
| मुक्तियोगः | * योगनिरोधेन शैलेश्यवस्थां गत्वा चरमासंगयोगः । | ।।अ.सा.पं. ८३टी।। |
| मुख्यम् | * अनुपचरितम् । | ।।यो. दृ. २००टी।। |
| मुणितम् | * अर्थज्ञानम् । | ।।उप.मा.(सि.) ६४ टी।। |
| मुणी | * वासीचन्दणकप्पो, समसुहदुक्ख मुणी समक्खाओ । | ।।यो.श. २०टी।। |
| मुण्डकेवली | * भवमोक्खापडिबद्धो । | ।।यो.बिं. २९०टी।। |
| मुदितम् | * ऋद्धिस्तिमितं निर्भयम् । | ।।उप.मा.(सि.) ४१ टी।। |
| मुनयः | * सर्वज्ञपुत्रत्वेन परिज्ञातविज्ञेयवस्तुतत्त्वाः । | ।।हित. ३४४टी।। |
| मुनिः | * योगी । | ।।यो.बिं. ४१०टी।। |
| | * मन्यते यथावस्थितं मोक्षकारणमिति मुनिः । | ।।उप.मा.(सि.) ३५ टी।। |
| मुनिजनाः | * भक्तिबहुमानार्हा अनुपकृतपरोपकृतिपराः । | ।।हित. ३५२टी।। |
| मुनितत्तत्त्वाः | * अवबुद्धसिद्धान्तसद्भावाः । | ।।ध.र. १४२टी।। |
| मूढदृष्टिमिथ्यात्वम् | * देवो रागी यतिः संगी,धर्मः प्राणिनिशुम्भनः ।<br>मूढदृष्टिरिति ब्रूते, युक्तायुक्ताविवेचकः ।।१२।। | ।।संबोध.प्र.मिथ्या.अधि.।। |
| मूढं चित्तम् | * उभयलोकविवेकहीनम् । | ।।अ.सा.स. ३टी।। |
| | * क्रोधादिभिर्नियमितं विरुद्धकृत्येषु यत्तमोभूम्ना ।<br>कृत्याकृत्यविभागासंगमेतन्मनो मूढम् ।।५।। | ।।अ.सा.स.।। |
| मूढाः | * मोहोपहतमतयः । | ।।हित. ४००टी।। |
| मूलगुणसंप्रयुक्तः | * मुलगुणा महाव्रतानि व्रतषट्ककायषट्कादयो वाऽष्टादश । उक्तं च,<br>वयछक्कं कायछक्कं अकप्पो गिहिभायणं ।<br>पलियंकनिसिज्जाय सिणाणं सोहवज्जणं ।।१।। इति,<br>तैः सम्यक् सद्बोधप्रधानं प्रकर्षेणातिशयेन युक्तोऽनुगतो मूलगुण-<br>संप्रयुक्तः गुरुः । | ।।ध. र. १३०टी।। |
| मूलं प्रायश्चित्तम् | * महाव्रतानां मूलत आरोपणम् । | ।।हित. १९०टी।। |
| मूला-ऽनवस्थाप्य-प्रायश्चितम् | * पाणाइवायपमुहे, पुणव्वयारोवणं विहेयव्वं ।<br>प्रायश्चित्तम् ठाविज्जइ न वएसु, कराइघायप्पदुट्ठमणो ।।५३।। | ।।संबोध.प्र.आलो.अधि.।। |
| मृदुकारुणिकी कथा | * श्रोतुर्हृदयमार्दवजननान्मृद्वी,सा चासौ कारुणिकी च कारुण्यवती मृदुकारु-<br>णिकी कथा । | ।।ध.र. २०टी।। |
| मेधा | * अर्थावधारणक्षमा प्रज्ञा । | ।।हित. ५०१टी।। |
| | * शास्त्रोक्तसूक्ष्मार्थग्राहिचित्तधर्मस्तया च सर्वव्रतप्रतिज्ञपालनार्थत्वात् | |

| शब्दाः | उपनिषद् | ग्रन्थाः |
|---|---|---|
| | प्रवृत्तियोगे साफल्यम् । | ।।अ.सा.तृ. ९१टी।। |
| | * ग्रन्थग्रहणपटुः परिणामः, ज्ञानावरणीयकर्म्मक्षयोपक्षमजः चित्तधर्म्म इति भावः । अयमपीह सद्ग्रन्थप्रवृत्तिसारः पापश्रुतावज्ञाकारी गुरुविनयादिविधिवल्लभ्यो महांश्तदुपादेयपरिणामः । | ।।ल.वि. अरिहंत चेइ. व्या.।। |
| | * सूक्ष्मभावग्रहणसमर्था ग्रन्थज्ञानवती बुद्धिः । | ।।अ.सा.पं. २०टी।। |
| मेधावी | * अर्थधारणक्षमया अतिसूक्ष्मरहस्यभेदिन्या प्रज्ञया समुपेतः । | ।।हित. १०३टी।। |
| मैत्री-करूणा-मुदिता -उपेक्षा भावना | * परहितचिन्ता मैत्री परदःखविनाशिनी तथा करुणा । परसुखतुष्टिर्मुदिता परदोषोपेक्षणमुपेक्षा ।।१ ।। | ।।ध.र. १२४टी।। |
| मोक्षः | * कृत्स्नकर्मक्षयो मोक्षः, अपुनर्बन्धकत्वेनात्मनाऽऽत्मन्येवावस्थानम् । | ।।यो.श. २टी।। |
| | * सकलकर्मक्लेशक्षयलक्षणो हि मोक्षः । | ।।यो.बिं. ३टी।। |
| | * सकलकर्म्मक्षयलक्षणो मोक्षः । | ।।हित. १५टी।। |
| | * अजरामरम् । | ।।हित. २०७टी।। |
| | * अनाशंसारुपः । | ।।ल.वि. पुक्खर. व्या.।। |
| मोक्षपथाः | * सुसाधु-श्रावक- संविग्नपाक्षिकलक्षणा निर्वाणमार्गाः । | ।।उप.मा.(सि.) ५२० टी।। |
| मोक्षमार्गक्रिया | * सम्यग्दर्शनाद्यवस्था । | ।।ल.वि. नमुत्थुणं व्या.।। |
| मोक्षमार्गप्रवृत्ताः | * सम्यग्दर्शनाद्याराधनाऽवहितात्मनः । | ।।यो.बिं. ३७३टी।। |
| मोहः | * असर्वज्ञप्रणीतविपरीतवस्तुस्वरुपाभिधायककुशास्त्रसंस्कारतः संभूतो मतिव्यामोहोऽज्ञानमिति यावत् । | ।।अ.सा.द्वि. ३७टी।। - |
| | * अज्ञानलक्षणो मोह इति । | ।।यो.श. ५३टी।। |
| | * मोहनं वा मोहो मोहवेदनीयकर्मापादितो भावोऽज्ञानपरिणाम एव । | ।।पंच सू.- प्र.सू.टी।। |
| | * मिथ्याज्ञानम् । | ।।हित. १८टी।। |
| | * मोहनीयकर्मोदयजो जीवपरिणामोऽज्ञता वा । | ।।अ.सा.ष. ७१टी।। |
| मोहगर्भितवैराग्यम् | * कुशास्त्राभ्याससंभूतं भवनैर्गुण्यदर्शनात् । मोहगर्भं तु वैराग्यं मतं बालतपस्विनाम् ।।४४।। | ।।अ.सा.द्वि.।। |
| | सिद्धान्तमुपजीव्यापि ये विरुद्धार्थभाषिणः । तेषामप्येतदेवेष्टं कुर्वतामपि दुष्करम् ।।४५।। | ।।अ.सा.द्वि.।। |
| मोहहतः | * अज्ञानग्लुपितः । | ।।हित. ४०७टी।। |
| मौनम् | * मुने-र्भाव आश्रवादिसर्वहेयेभ्यो निवृत्तिभावः । | ।।अ.सा.द्वि. ५५टी।। |
| मौनीन्द्रम् | * मन्यन्ते यथावस्थिततया त्रिकालावस्थासु जगदिति मुनयः मतिश्रुतावधिमनःपर्यायकेवलज्ञानिनस्तेषामिन्द्रः सकलातिशयसमन्वित-केवलज्ञानभास्करो जिनेन्द्रस्तेन प्रणीतं यत् तत् । | ।।अ.सा.च. ३८टी।। |

## य

| | | |
|---|---|---|
| यतना | * आगमोक्तगुण-दोषाश्रयण-परिहार-लक्षणा । | ।।उप.मा.(सि.) २९४ टी।। |
| | * कर्तव्या-ऽकर्तव्यकरणा-ऽकरणरुपा । | ।।उप.मा.(सि.) २९५ टी।। |
| | * संयमक्रियाव्रतपरिरक्षणमिति यावत् । | ।।अ.सा.प्र. ६९टी।। |

| शब्दाः | उपनिषद् | ग्रन्थाः |
|---|---|---|
| | ✼ जीवरक्षणकृते भूपुष्पशोधनजलगालनादिरुपा । | ।।अ.सा.च. ४८टी।। |
| यतिः | ✼ जीवादिपदार्थज्ञो यः समभावेन सर्वजीवानाम् । रक्षार्थमुद्यतमतिः स यतिः पात्रं भवति दातुः ।। १ ।। | ।।ध.र. ९७टी।। |
| यतिताऽलवसप्तमासुर-विमानवासिनः | ✼ मानं माः परिछेदः सम्पदादेराकृतिगणत्वात् क्विप् । सप्त च ते माश्च सप्तमाः, एकपदव्यभिचारेपि समासः, लवः कालविशेषः, लवानां सप्तमाःलवसप्तमाः अविद्यमाना लवसप्तमा येषां तेऽलवसप्तमाः, यति-र्मुनिः, यते-र्भावो यतिता मुनिता, पूर्वभवे यतितायामलवसप्तमा यतिताऽलवसप्तमाः, सुराः सुष्ठु शोभनो रा अर्थो यस्य स सुरस्ते सुराः, यतितालवसप्तमाश्च ते सुराश्च यतिताऽलवसप्तमासुराः, विशेषणान्यथानुपपत्त्याऽनुत्तराः, ते पूर्वभवे यतो यतयो मुक्तिप्राप्तियोग्याः सन्तो न्यूनसप्तायुर्लवत्वाद् भवन्ति, तेषां विमानानि आलयाः, तेषु वासोऽवस्थानं, स विद्यते येषां ते यतिताऽलवसप्तमासुरविमानवासिनः सुरा एव । | ।।उप.मा.(सि.) २९ टी।। |
| यतिधर्मः | ✼ साध्वाचारो मोक्षमार्गः । | ।।उप.मा.(सि.) ५१९ टी।। |
| यथाख्यात-चारित्रम् | ✼ उवसंते खीणंमि वि, जो खलु कम्मंमि मोहणिज्जंमी । छउम्मत्थो य जिणो, वा अहक्खायसंजओ स खलु ।।२६३।। | ।।संबोध.प्र.गुरु अधि.।। |
| यथाच्छन्दः | ✼ स्वाभिप्रायमागमनिरपेक्षतया वर्तत इति यथाच्छन्दः । | ।।उप.मा.(सि.) ३५३ टी।। |
| | ✼ उस्सुत्तमणुवइट्ठं, सच्छंदविगप्पियं अणणुवाई । परतत्तिं पवत्ते तिंतिणे य इणमो अहाछंदो ।।१९।। | ।।संबोध.प्र.गुरु अधि.।। |
| यथार्थभणनम् | ✼ अविसंवादिवचनं धर्मव्यवहारे क्रयविक्रयव्यवहारे साक्षिव्यवहारे राज-व्यवहारादौ वा । | ।।ध.र. ४७टी।। |
| यथासूत्रम् | ✼ सूत्रोक्तस्याऽनतिक्रमेण । | ।।ध.र. ११४टी।। |
| यथास्थितवस्तुवादिनः | ✼ यथास्थितमभिलाप्याऽनभिलाप्यत्वादिना प्रकारेण स्थितं वस्तु वदितुं शीलाः यथास्थितवस्तुवादिनः । | ।।पंच सू.- प्र.सू.टी।। |
| यथोक्तकारिणः | ✼ विहितानुष्ठानपराः । | ।।उप.मा.(सि.) २३९ टी।। |
| यमकः | ✼ काव्यालङ्कारविशेषः । | ।।उप.मा.(सि.) ३१६ टी।। |
| यमाः | ✼ अहिंसादिलक्षणः,यथोक्त अहिंसासत्यास्तेयब्रह्मचर्यापरि-ग्रहा यमाः। इच्छादिकः,एते च इच्छाप्रवृत्तिस्थैर्यसिद्धिभेदा इति। | ।।यो. दृ. २१टी।। |
| | ✼ उपरमाः । | ।।यो. दृ. २१४टी।। |
| | ✼ यम्यते निवर्त्यते आरंभादिभ्यो यावज्जीवमातमा येन स । | ।।अ.सा.प्र. ४७टी।। |
| यशः | ✼ सर्वदिग्व्यापकं जीवत्प्रसिद्धरुपं वा । | ।।हित. १९२टी।। |
| युक्तयः | ✼ साधकबाधकप्रमाणोपन्यासेनार्थावधारणप्रकाराः । | ।।अ.सा.च. ४०टी।। |
| युक्तस्वरता | ✼ परयोगानुपघातिशब्दता । | ।।ल.वि. प्रस्तावना।। |
| युक्तिः | ✼ शुद्धहेतुप्रयोगरुपा । | ।।यो.बिं. ४६३टी।। |
| | ✼ सुनिपुणन्याययुक्तशास्त्रघटितार्थे गुरुभिरुक्ता या युक्तिः सद्भूतार्थस्येय-त्तावधारणरुपा । | ।।अ.सा.च. १५९टी।। |

| शब्दाः | उपनिषद् | ग्रन्थाः |
|---|---|---|
| | ❋ अनुमानादिनाऽर्थावधारणप्रकारा । | ।।अ.सा.पं. ७१टी।। |
| | ❋ अन्वयव्यतिरेकविमर्शरुपा । | ।।ल.वि. अन्नत्थ सूत्र व्या.।। |
| युगप्रधानागमः | ❋ युगं वर्तमानकालस्तस्मिन् प्रधानः शेषजनापेक्षयोत्कृष्टो बहुत्वात्, आगमः श्रुतं यस्याऽसौ युगप्रधानागमः । | ।।उप.मा.(सि.)१० टी।। |
| योगः | ❋ निच्छयओ इह जोगो, सण्णाणाईण तिण्ह संबंधो ।<br>मोक्खेण जोयणाओ णिद्दिट्ठो जोगिणाहेहिं ।। २ ।। | ।।यो.श.।। |
| | ❋ धर्मविशेषः, सज्ज्ञानादीनां – सज्ज्ञानस्य सद्दर्शनस्य सच्चारित्रस्य च सद्ग्रहणं मिथ्याज्ञानादिव्यवच्छेदार्थम्, एतेषां त्रयाणां सम्बन्धः । त्रयाणामेव सम्बन्धो निश्चयतो योगः । | ।।यो.श. २टी।। |
| | ❋ चित्तवृत्तिनिरोधः । | ।।यो.श. २२टी।। |
| | ❋ प्रणिधानादिभावेन परिशुद्धः सर्वोऽपि धर्मव्यापारः सानुबन्धत्वाद् योगः । | ।।यो.विं १टी।। |
| | ❋ मोक्षेण महानन्देन योजनात् सर्वोऽपि धर्मव्यापारः साधोरालयविहारभाषा-विनयभिक्षाटनादिक्रियारुपो योगो विज्ञेयः । | ।।यो.विं. १टी।। |
| | ❋ स्थीयतेऽनेनेति स्थानं आसनविशेषरुपं कायोत्सर्गपर्यङ्कबन्धपद्मासनादि सकलशास्त्रप्रसिद्धम् । उर्णः शब्द स च क्रियादावुच्चार्यमाणसूत्रवर्णलक्षणः। अर्थः शब्दाभिधेयव्यवसायः । आलम्बनं बाह्यप्रतिमादिविषयध्यानम् । रहितः रुपिद्रव्यालम्बनरहितो निर्विकल्पचिन्मात्रसमाधिरुपः । इत्येवं एष योगः पञ्चविधः । | ।।यो.विं. २टी।। |
| | ❋ इच्छा तद्वत्कथाप्रीतिः, पालनं शमसंयुतम् ।<br>पालनं दोषभीहानिः, स्थैर्यं सिद्धिःपरार्थता ।। १ ।। | ।।यो.विं. ६टी।। |
| | ❋ द्विविधो हि योगः-सापायो निरपायश्च, तत्र निरुपक्रममोक्षपथप्रतिकूल-चित्तवृत्तिकारणं प्राक्कालार्जितं कर्म अपायस्तत्सहितो योगः सापायः, तद्रहितस्तु निरपाय इति । | ।।यो.विं. ११टी।। |
| | ❋ मोक्षहेतोरऽनुष्ठानम् । | ।।यो.बिं. १टी।। |
| | ❋ अध्यात्मं भावना ध्यानं समता वृत्तिसंक्षयः ।<br>मोक्षेण योजनाद्योग एष श्रेष्ठो यथोत्तरम् ।। ३१ ।।<br>तात्त्विको भूत एव स्यादन्यो लोकव्यपेक्षया ।<br>अच्छिन्नः सानुबन्धस्तु छेदवानपरो मतः ।। ३३ ।।<br>सास्रवो दीर्घसंसारस्ततोऽन्योऽनास्रवः परः ।<br>अवस्थाभेदविषयाः संज्ञा एता यथोदिताः ।। ३४ ।।<br>योजनाद्योग इत्युक्तो मोक्षेण मुनिसत्तमैः ।<br>स निवृत्ताधिकारायां, प्रकृतौ लेशतो ध्रुवः ।। २०१ ।। | ।।यो.बिं.।। |
| | ❋ ध्यानादिको मनःशुद्धिश्च । | ।।अ.सा.पं. २२टी।। |
| | ❋ ब्रह्यतानिष्पादनोपायः । | ।।अ.सा.स. ३टी।। |
| | ❋ मैत्र्यादि । | ।।ल.वि. नमुत्थुणं व्या.।। |

| शब्दाः | उपनिषद् | ग्रन्थाः |
|---|---|---|
| | ✻ स्वाध्यायादिसमाचारः । | ।।ल.वि. पुक्खर. व्या.।। |
| | ✻ समस्तमोक्षसाधकज्ञानक्रियाव्यापाराः । | ।।अ.सा.प्र. २७टी।। |
| | ✻ मित्रादयः ( दृष्टयः ) । | ।।यो. दृ. ११टी।। |
| योगत्वम् | ✻ मोक्षकारणीभूतात्मव्यापारत्वं योगत्वं इति योगलक्षणयोगाद् अनुपचरितमेव । स्थानादिषु योगाङ्गत्वेन योगरुपता हेतुफलभावेन उपचाराद् अभिधीयते । | ।।यो.विं. २टी।। |
| योगनिरोधः | ✻ मनोवाक्कायव्यापाराणां समग्रनिरोध आत्मनि सर्वथाऽसत्ता । | ।।अ.सा.स. २४टी।। |
| योगबीजम् | ✻ जिनेषु कुशलं चित्तं, तन्नमस्कार एव च ।<br>प्रणामादि च संशुद्धं, योगबीजमनुत्तमम् ।। २३ ।।<br>आचार्यादिष्वपि ह्येतद्विशुद्धं भावयोगिषु ।<br>वैयावृत्यं च विधिव-च्छुद्धाशयविशेषतः ।। २६ ।।<br>भवोद्वेगश्च सहजो, द्रव्याभिग्रहपालनम् ।<br>तथा सिद्धान्तमाश्रित्य, विधिना लेखनादि च ।। २७ ।।<br>लेखना पूजना दानं, श्रवणं वाचनोद्ग्रहः ।<br>प्रकाशनाथ स्वाध्याय-श्चिन्तना भावनेति च ।। २८ ।।<br>बीजश्रुतौ च संवेगात् प्रतिपत्तिः स्थिराशया ।<br>तदुपादेयभावश्च, परिशुद्धो महोदयः ।। २९ ।। | ।।यो. दृ.।। |
| - | ✻ योगबीजं मोक्षयोजकानुष्ठानकारणम् । | ।।यो. दृ. २३टी।। |
| | ✻ अवन्ध्यमोक्षहेतुः । | ।।यो. दृ. २२टी।। |
| योगमार्गः | ✻ योग एव निर्वाणपुरप्रापकतया मार्गो योगमार्गः । | ।।यो.बिं. ३०टी।। |
| योगमुद्रा | ✻ अण्णोण्णंतरियंगुलि-कोसागारेहिं दोहिं हत्थेहिं ।<br>पिट्टोवरिकोप्पर- संठिएहिं तहजोगमुद्दत्ति ।।१। | ।।ल.वि. प्रणिधान सूत्रम्।। |
| योगम् | ✻ विशिष्टद्रव्यात्मकम् । | ।।उप.मा.(सि.) ३६५ टी।। |
| योगलोचनः | ✻ यथावस्थितवस्तुपरिज्ञानाऽवन्ध्यकारणत्वाद्योग एव लोचनमऽक्षि यस्य स तथा । | ।।यो.बिं. ५२७टी।। |
| योगवशिता | ✻ योगाभ्याससामर्थ्यलक्षणा । | ।।यो.श. ७५टी।। |
| योगवृद्धिः | ✻ सम्यग्दर्शनादिमुक्तिबीजोत्कर्षरुपा । | ।।यो.बिं ५४टी।। |
| योगाचार्यः | ✻ नैयायिकमुख्यो गौतमः । | ।।अ.सा.ष. २०२टी।। |
| योगारुढः | ✻ यदा हि नेन्द्रियार्थेषु न कर्मस्वनुषज्यते ।<br>सर्वसंकल्पसंन्यासी योगारुढस्तदोच्यते ।। २३ ।। | ।।अ.सा.पं.।। |
| योगावश्चकः | ✻ सद्भिः कल्याणसम्पन्नै-र्दर्शनादपि पावनैः ।<br>तथादर्शनतो योग, आद्यावश्चक उच्यते ।। २१९ ।। | ।।यो. दृ.।। |
| योगिः | ✻ सद्दृष्टिः । | ।।यो. दृ. १५टी।। |
| योगिनः | ✻ दिव्यदृशः। | ।।यो.बिं. ४९,३१४टी।। |
| योगिनाथः | ✻ योगः सज्ज्ञानादिसम्बन्धरुपो निश्चयादिभेदभिन्नः, स विद्यते येषां ते यागिनो मुनयस्तेषां नाथो योगिनाथः । | ।।यो.श. १टी।। |

| शब्दाः | उपनिषद् | ग्रन्थाः |
|---|---|---|
| | * गणधरादिमहामुनिः । | ।।यो.बिं. १टी।। |
| योगी | * परब्रह्मोपायसेविः । | ।।अ.सा.पं. ६१टी।। |
| योग्यः | * उचितः । | ।।ध.र. ४टी।। |
| | * बीजं हेतुः । | ।।यो.बिं. ४०६टी।। |
| योग्यता | * योगकषायपरिणतिरुपा । | ।।यो.बिं. १६५टी।। |
| | * योग्यता चेह विज्ञेया बीजसिद्ध्याद्यपेक्षया ।<br>आत्मनः सहजा चित्रा तथाभव्यत्वमित्यतः ।। २७८ ।। | ।।यो.बिं.।। |

## र

| शब्दाः | उपनिषद् | ग्रन्थाः |
|---|---|---|
| रत्नम् | * जातौ जातौ यदुत्कृष्टं रत्नं निगद्यते हि तत्, इत्येवं सुधियः प्राहुर्निर्वि-<br>संवादमुत्तमाः । | ।।ध.र. १टी।। |
| रत्नाधिकाः | * ज्ञानादिप्रधानाः । | ।।उप.मा.(सि.) ३६४ टी।। |
| रसः | * सुखप्रीत्यादिना मनोविनोदः । | ।।अ.सा.प्र. २१टी।। |
| रसत्यागः | * रसाः क्षीरदधिघृततैलगुडावगाहिमप्रभृतयो विकारहेतवस्तेनैव विकृतिशब्द-<br>वाच्याः, तेषां त्यागो वर्जनं धर्म्मबुद्ध्या करणनिग्रहाय च रसत्यागः । | ।।हित. १८९टी।। |
| रागः | * रञ्जनं रागः क्वचिदात्मनोऽभिलाषपरिणामः । | ।।अ.सा.तृ. ३४टी।। |
| रागः | * रञ्जनाभिलाषादिरुपा प्रेमक्रिया । | ।।अ.सा.पं. १२०टी।। |
| रागः | * रञ्जनस्वभावो रक्तः । | ।।अ.सा.ष. ४५टी।। |
| रागः | * रागः – अभिष्वङ्गलक्षणो रागः । | ।।यो.श. ५३टी।। |
| | * रज्यतेऽनेनेति रागः, रागवेदनीयं कर्म । आत्मनः क्वचिद्ऽभिष्वङ्गपरिणामा-<br>पादनात् । रञ्जनं वा रागः, रागवेदनीयकर्मापादितो भावोऽभिष्वङ्गपरिणाम एव । | ।।पंच सू.– प्र.सू.टी।। |
| | * अभिष्वङ्गलक्षणो रागः । | ।।यो.श. ५३टी।। |
| | * प्रतिबन्धः । | ।।ध.र. १२०टी।। |
| | * चेतसोऽभिष्वङ्गः । | ।।उप.मा.(सि.) १६४ टी।। |
| रीढा | * अवज्ञा । | ।।हित. ३४६टी।। |
| रुदितभावः | * महता शब्देनाऽऽक्रन्दनम् । | ।।उप.मा.(सि.) ३१९ टी।। |
| रुपवान् | * प्रशस्तरुपोपेतः । | ।।ध.र. ५टी।। |
| | * संपुन्नंगोवंगो पंचिदियसुंदरो सुसंघयणो ।<br>होइ पभावणहेऊ खमो य तह रुववं धम्मे ।। ९ ।। | ।।ध.र.।। |

## ल

| शब्दाः | उपनिषद् | ग्रन्थाः |
|---|---|---|
| लक्षणम् | * लक्ष्यतेऽनेनेति लक्षणं पररुपव्यावर्तको धर्मः । | ।।उप.मा.(सि.) ५१४ टी।। |
| | * स्वभावः । | ।।ल.वि. वियट्ट. व्या.।। |
| लज्जालुः | * लज्जालुओ अकज्जं वज्जइ दूरेण जेण तणुयंपि ।<br>आयरइ सयायारं न मुयइ अंगीकयं कहवि ।। १६ ।। | ।।ध.र.।। |
| लब्धलक्ष्यः | * लक्खेइ लद्धलक्खो सुहेण सयलंपि धम्मकरणिज्जं ।<br>दक्खो सुसासणिज्जो तुरियं च सुसिक्खिओ होइ ।। २८ ।। | ।।ध.र.।। |

| शब्दाः | उपनिषद् | ग्रन्थाः |
|---|---|---|
| लब्धलक्ष्यत्वम् | * निर्णीतं सर्वत्रानुष्ठाने पर्यन्तसाध्यं येन स तद्भावस्तत्त्वम् । | ।।ल.वि. प्रस्तावना।। |
| लब्धिपुलाकः | * संघाइयाण कज्जे, चुण्णिज्जा चक्कवट्टिमवि जीए । तीए लद्धीइ जुओ, लद्धिपुलाओ मुणेयव्वो ।।२४३।। | ।।संबोध.प्र.गुरु अधि.।। |
| लब्धीन्द्रियम् | * तद् ( इन्द्रियम् ) आवरणक्षयोपशमः । | ।।ल.वि. चक्खुदयाणं व्या.।। |
| लवसप्तमासुरविमानवासिनः | * मानं माः सम्पदादेराकृतिगणत्वात् क्विप्, सप्तभिरपूर्यमाणै-र्माः परिच्छेदः प्राप्ततया मोक्षगमनयोग्यानामायुष्कस्य येषां तानि सप्तमानि, लवैः कालविशेषैः सप्तमानि लवसप्तमानि, कानि ? सुरविमानानि अनुत्तरविमाना-नीत्यर्थः तेषु वासः स्थानम्, स विद्यते येषां ते लवसप्तमासुरविमानवासिनः। | ।।उप.मा.(सि.) २९ टी।। |
| लिङ्गिन्यः | * पाखण्डिन्यः । | ।।हित. ३५३टी।। |
| लोकः | * पञ्चास्तिकाया उच्यन्ते । धर्म्मादीनां वृत्ति-र्द्रव्याणां भवति यत्र तत् क्षेत्रम् । तै-र्द्रव्यैः सह लोकस्तद्विपरीतं ह्यलोकाख्यम् ।।१।। इति | ।।ल.वि. लोगुत्तमाणं व्या.।। |
| | * लोक्यत इति लोकः, प्रमाणेन दृश्यत इति भावः । | ।।ल.वि. चतुर्विंशति व्या.।। |
| लोकग्रहणम् | * जनचित्तरञ्जनम् । | ।।उप.मा.(सि.) ३७१ टी।। |
| लोकदृष्टिः | * लोकः कुप्रवचनं परिव्राजकादिजनो वा तस्य या दृष्टिर्दर्शनं मतमिति यावत् तथा । | ।।अ.सा.प्र. ४७टी।। |
| | * स्थुलव्यवहारिणो लोकस्य मतः । | ।।यो.बिं. २१३टी।। |
| लोकनाथा | * विशिष्ट एव तथा तथा रागाद्युपद्रव्यरक्षणीयतया बीजाधानादिसंविभक्तो भव्यलोकः, तस्य नाथो योगक्षेमकृत् लोकनाथस्ते लोकनाथाः । येषामेव भव्यानां बीजाधानोद्भेदपोषणेन धर्मबीजस्य प्रशंसादिनाऽऽधानेन, चिन्ताङ्कुरकरणेनोद्भेदेन सत्श्रुत्यादिकाण्डनालादिसम्पादनेन पोषणेन योगः= अप्राप्तलाभलक्षणः क्षेमं च = लब्धपालनलक्षणं, तत्तदुपद्रवाद्यभावेन चित्ररुपनरकादिव्यसन-तन्निबधनभूतरागाद्यत्यनतोच्छेदेन भवति तेषामेव भव्यानां जिना नाथाः, लोकनाथाः । | ।।ल.वि. लोगनाहाणं व्या.।। |
| लोकपंक्तिः | * लोकाराधनहेतो-र्या मलिनेनान्तरात्मना । क्रियते सत्क्रिया सात्र लोकपक्तिरुदाहृता ।। ८८ ।। | ।।यो.बिं. ।। |
| | * लोकसदृशभावसम्पादनरुपा । | ।।यो.बिं. ८६टी।। |
| लोकप्रदीपाः | * अत्र लोकशब्देन विशिष्ट एव तद्देशनाद्यंशुभिर्मिथ्यात्वतमोऽपनयनेन यथार्हं प्रकाशितज्ञेयभावः संज्ञिलोकः परिगृह्यते, तदपेक्षयैव (भगवन्तः) लोकप्रदीपाः । | ।।ल.वि.लोगपईवाणं व्या.।। |
| लोकप्रद्योतकाः | * अत्र लोकध्वनिनोत्कृष्टमतिः औत्पत्तिक्यादिविशिष्टबुद्धिमान् गणधरपदप्रायोग्यो भव्यसत्त्वलोको यो हि प्रथमसमवसरण एव भगवदुपन्यस्तमातृकापदत्रयश्रवणात् प्रद्योतप्रवृतौ दृष्टसमस्ताभिलाप्यरुपप्रद्योत्यजीवादिसप्ततत्त्वो रचितसकल-श्रुतग्रन्थः सपदि सञ्जायते स इह गृह्यते इति तत्रैव तत्त्वतः प्रद्योतकरण-शीलत्वोपपत्तेः । ''उप्पन्नेइ वा, विगमेइ वा, धुवेइ वा'' इति पदत्रयोपन्यासेन प्रद्योतस्य प्रकृष्टप्रकाशरुपस्य तच्छीलतया विधानघटनात्। प्रद्योतकशक्तेस्तत्रैव भव्यलोके कात्स्न्र्येनोपयोग इतिकृत्वा । भगवत्प्रज्ञापना- | |

| शब्दाः | उपनिषद् | ग्रन्थाः |
|---|---|---|
| | प्रद्योतप्रतिपन्ननिखिलाभिलाप्यभावकलापा गणधरा एवोत्कृष्टचतुर्दश-पूर्वविदो भवन्ति, गणधराणामेव भगवतः प्रज्ञापनाया एव उत्कृष्टप्रकाश लक्षणप्रद्योतसम्पादनसामर्थ्यात् । | ।।ल.वि. लोगपज्जो. व्या.।। |
| **लोकप्रियः** | ❊ इहपरलोयविरुद्धं न सेवए दाणविणयसीलड्ढो ।<br>लोअप्पिओ जणाणं जणेइ धम्मंमि बहुमाणं ।। ११ ।। | ।।ध. र.।। |
| **लोकसंज्ञा** | ❊ भगवद्वचनप्रतिकूला प्रभूतसंसाराभिनन्दिसत्वक्रियाप्रीतिरुपा । | ।।पंच सू.- च.सू.टी।। |
| | ❊ अविचारितरमणीया लोकहेरिः । | ।।ध.र. ६८टी।। |
| | ❊ शुद्धस्यान्वेषणे तीर्थोच्छेदः स्यादिति वादिनाम् ।<br>लोकाचारादरश्रद्धा लोकसंज्ञेति गीयते ।।६७।। | ।।अ.सा.तृ.प्र.।। |
| | ❊ शास्त्रगुरुक्तिलोकव्यवहारसारज्ञाने निरपेक्षता । | ।।अ.सा.तृ. ९५टी।। |
| | ❊ शास्त्रनिरपेक्षलोकरुढिः । | ।।अ.सा.स. ३८टी।। |
| | ❊ गतानुगतिकलक्षणा लोकहेरिः । | ।।ल.वि. प्रस्तावना।। |
| **लोकहिताः** | ❊ इह लोकशब्देन सकलसांव्यावहारिकादिभेदभिन्नः प्राणिलोको गृह्यते, पञ्चास्तिकायात्मको वा सकल एव, तदेवंविधाय लोकाय हिताः । यथावस्थितदर्शनपूर्वकं सम्यक्प्ररुपणाचेष्टया तदायत्यबाधनेनेति च । | ।।ल.वि. लोगहिआणं व्या.।। |
| **लोकाचारानुवृत्तिः** | ❊ बहुजनरुढाविरोधिलोकव्यवहारानुपालनरुपा । | ।।यो. बि. १३०टी।। |
| **लोकोत्तमाः** | ❊ भव्यसत्त्वलोकस्य सकलकल्याणैकनिबन्धनतथाभव्यत्वभावेनोत्तमा लोकोत्तमाः । | ।।ल.वि. लोगुत्तमाणं व्या.।। |
| **लोकोपचार-विनयः** | ❊ तदुचियअब्भुट्ठाणं अंजलिबंधो य आसणपयाणं ।<br>देवातिहीण पूया इय एसो लोइओ विणओ ।। २१६ ।। | ।।हित.।। |

## व

| शब्दाः | उपनिषद् | ग्रन्थाः |
|---|---|---|
| **वंदनम्** | ❊ अभिवादनं प्रशस्तकायवाङ्मनप्रवृत्तिरित्यर्थः । | ।।ल.वि. अरिहंत चेइ. व्या.।। |
| **वक्राः** | ❊ मनो-वाग्भ्यां कुटिलाः, मनसा गुरुविषयेऽपि मायाविनः, वाचापि ये वचनं विबन्धन्ति । | ।।उप.मा.(सि.) ७४ टी।। |
| **वचनगुप्तिः** | ❊ विगहापरिहारेण सज्झायं पंचहा जहाजोगं ।<br>जुंजंता वयगुत्ता हुंति मुणी अहव कयमोणा ।। ४८५ ।। | ।।हित.।। |
| **वचनम्** | ❊ निरुपका ध्वनिः । | ।।ल.वि. पुरिसुत्तमाणं व्या.।। |
| | ❊ दृष्टेष्टाविरुद्धस्य, तत्र ''दृष्टम्''= अशेषप्रमाणोपलब्धम् ''इष्टम्''= वचनोक्तमेव, तयोरविरोधेन अविरुद्धस्य ''वचनस्य'= आगमस्य वचनत्वात् । | ।।ल.वि. नमो. जिअ. व्या.।। |
| | ❊ आगमः । | ।।ल.वि. नमो. जिअ. व्या.।। |
| **वचनशुध्दिः** | ❊ तित्थंकरचलणाराहणेणं जं मज्झ सिज्झइ न कज्जं ।<br>पत्थेमि तत्थ नन्ने, देवविसेसे हि वयसुध्दि ।।६६।। | ।।संबोध.प्र. सम्य. अधि.।। |
| **वचनानुष्ठानम्** | ❊ शास्त्रार्थप्रतिसंधानपूर्वं साधोः सर्वत्रोचितप्रवृत्तिर्वचनानुष्ठानम् । | ।।यो.विं १८टी।। |
| | ❊ जो पुण जिणगुणगणचेइसु, सुत्तविहाणेण वंदणं कुणइ ।<br>वयणाणुट्ठाणमिणं, चरित्तिणो होइ नियमेण ।।२३९।। | ।।संबोध.प्र.देव अधि.।। |
| **वञ्चनम्** | ❊ अतिसन्धानम् । | ।।हित. ३५४टी।। |

| शब्दाः | उपनिषद् | ग्रन्थाः |
|---|---|---|
| **वन्दनम्** | ✻ द्वादशावर्तादि । | ।।उप.(सि.) १५ टी।। |
| **वरज्ञानम्** | ✻ वरं क्षायिकत्वादऽप्रतिपाति, यदि वा लोकालोकप्रकाशकत्वेन मतिज्ञाना-द्यपेक्षया वरं प्रधानं यज् ज्ञानं केवललक्षणम् । | ।।हित. ३७टी।। |
| **वरबोधिसमेतः** | ✻ तीर्थंकरपदप्रायोग्यसम्यक्त्वसमेतः । | ।।यो.बिं. २७४टी।। |
| **वर्णकसूत्रदृष्टांतम्** | ✻ वर्णकसूत्राणि चरितानुवादरुपाणि । यथा , द्रौपद्या पूरुषपञ्चकस्य वरमालानिक्षेपः, ज्ञाताधर्मकथाद्यङ्गेषु नगरादिवर्णकरुपाणि च वर्णकसूत्राणि च । | ।।ध.र. १०६टी।। |
| **वर्णाः** | ✻ ब्राह्मणक्षत्रियवैश्यशुद्रलक्षणाः । | ।।ल.वि. नमो. जिअ. व्या.।। |
| **वर्तना** | ✻ नवपुराणादिकरणरुपेण पूर्वापरत्वरुपेण वा प्रवर्तमन् । | ।।अ.सा.ष. ५१टी।। |
| **वर्द्धमानगुणप्रायः** | ✻ शुक्लपक्षक्षपापतिमण्लमिव प्रतिकलमुल्लसन्तो गुणा औदार्यदाक्षिण्यादयः प्रायो बाहुल्येन यस्य स तथा । | ।।यो.बिं. १७८टी।। |
| **वर्धमानं अवधिज्ञानम्** | ✻ पुनर्यदङ्गुलस्यासङ्ख्येयभागादिषूत्पन्नं वर्द्धते आ सर्वलोकात् । | ।।हित. ९१टी।। |
| **वस्तु** | ✻ उत्पादव्ययध्रौव्यलक्षणम् । | ।।यो.बिं. ४७२टी।। |
| **वस्तुनः** | ✻ द्रव्याः सचेतनाचेतना धर्माधर्महेतवः । | ।।ध.र. २३टी।। |
| **वाचना** | ✻ विनेयाय निर्जरायै सूत्रार्थदानम् । | ।।हित. ४८४टी।। |
| | ✻ सूत्रार्थयोः पठनं पाठनं च । | ।।अ.सा.पं. ११४टी।। |
| **वाचिकमिथ्यात्वत्यागः** | ✻ एवं वाया न भणइ करेमि, अण्णं च न भणइ करेहि । अन्नकयं न पसंसइ, न कुणइ सयमेव काएणं ।।४७।। | ।।संबोध.प्र. सम्य. अधि.।। |
| **वात्सल्यम्** | ✻ आन्तरप्रीतिरुपम् । | ।।हित. १४०टी।। |
| **वादः** | ✻ पूर्वपक्षरुपः । | ।।यो.बिं. ६७टी।। |
| **वादग्रन्थाः** | ✻ परपक्षनिराकरणेन स्वपक्षप्रतिष्ठापनानि तर्कप्रकरणानि । | ।।यो.बिं. ६५टी।। |
| **वादी** | ✻ वादि-प्रतिवादि-सभ्य-सभापतिरुपायां चतुरङ्गायां संसदि प्रतिपक्षविक्षेपपुरस्सरं स्वपक्षव्यवस्थापनार्थं नियमेन वदतीति वादी । | ।।हित. २५टी।। |
| **वारणा** | ✻ अकर्तव्यानां निषेधो वारणा । | ।।उप.मा.(सि.) १५५ टी।। |
| **वासनासंक्रमः** | ✻ वासनाऽपरापरक्षणोद्भवस्य ज्ञानस्य पूर्वपूर्वानुभूतभावानामनुस्मृतिहेतुः संस्कारस्तस्याः संक्रम उत्तरोत्तरज्ञानक्षणेषु व्याप्तिः । | ।।अ.सा.च. ९३टी।। |
| **वासीचन्दनतुल्यता** | ✻ वासी कुठारिका तया शरीरस्य च्छेदनं तथा चन्दनेनार्चनं तयो-र्विषये तुल्यता शोकहर्षाभावात् सादृश्यः स्याद् रागद्वेषयोरवकाशाभावादित्यर्थः । | ।।अ.सा.तृ. ३७टी।। |
| **वास्तु** | ✻ गृहग्रामनगरादि । | ।।हित. ४२३टी।। |
| **विकटना** | ✻ आलोचना । | ।।ध.र. १०४टी।। |
| **विकथा** | ✻ विरुद्धकथा । | ।।ध.र. ११०टी।। |
| **विकल्पितम्** | ✻ स्थुलालोचितम् । | ।।उप.(सि.) २६ टी।। |
| **विकारी** | ✻ विकारं परिणतिविपर्यासं देहविपर्यासं च कुर्वति यः स । | ।।अ.सा..द्वि. ९२टी।। |
| **विक्षिप्तं चित्तम्** | ✻ किञ्चिद्रक्तं किञ्चिद्विरक्तं च । | ।।अ.सा.स. ३टी।। |
| | ✻ सत्त्वोद्रेकात्परिहृतं दुःखनिदानेषु सुखनिदानेषु । शब्दादिषु प्रवृत्तं सदैव चित्तं तु विक्षिप्तम् ।।६।। | ।।अ.सा.स.।। |

| शब्दाः | उपनिषद् | ग्रन्थाः |
|---|---|---|
| विक्षेपणी कथा | ✻ विक्षिपति भोगाभिलाषान् या कामभोगेषु वैमुख्यमाऽऽपादयति सा विक्षेपणी । | ।।हित. ४७२टी।। |
| विग्रहः | ✻ मुष्ट्यादियुद्धम् । | ।।उप.मा.(सि.) ७० टी।। |
| विघ्नजयः | ✻ विघ्नजयो नाम धर्मान्तरायनिवर्तकः परिणामः । | ।।यो.विं १टी।। |
| विचारः | ✻ युक्तिगर्भः । | ।।ल.वि. नमो. जिअ. व्या.।। |
| विचिकित्सा | ✻ चित्तविभ्रमः । | ।।हित. २३टी।। |
| विचिकित्सा-अन्य-तीर्थिकप्रशंसासेवना | ✻ वितिगिच्छा य फलं पइ, संदेहो मलिणयंमि वि दुगंछा । परतित्थीण पसंसा, परिचयकरणं पसंगो य ।।४०।। | ।।संबोध.प्र. सम्य. अधि.।। |
| विज्ञातः | ✻ वचानानुसारेणैव विनिश्चितविषयविभागः । | ।।ल.वि. नमुत्थुणं व्या.।। |
| विज्ञानम् | ✻ मोहसंदेहविपर्ययव्युदासेन ज्ञानम् । | ।।ल.वि. सरणदयाणं व्या.।। |
| विड्वरः | ✻ स्वचक्रपरचक्रसमुत्थः । | ।।हित. १२४टी।। |
| वितंडा | ✻ स्वपक्षव्यवस्थापनेन दूषणाभावेऽपि परपक्षनिवारणाय शब्दार्थाभ्याञ्छलवादः । | ।।अ.सा.च. १५१टी।। |
| विद्या | ✻ ससाधना स्त्रीस्वामिका वा विद्या । | ।।यो.बिं. ५७टी।। |
| | ✻ देव्याधिष्ठिता । | ।।उप.मा.(सि.) ३६५ टी।। |
| | ✻ शास्त्रेषु विद्वत्ता । | ।।अ.सा.पं. ४३टी।। |
| विद्यावान् | ✻ विद्या प्रज्ञप्तिप्रभृतयो जैनशासनाधिष्ठायिन्यः सान्निध्यमध्यासते यस्य स विद्यावान् । | ।।हित. २५टी।। |
| विद्वान् | ✻ कृत्याकृत्यविवेकपंडितः । | ।।अ.सा.प्र. ८३टी।। |
| | ✻ विदते यथार्थभावेन स्वस्वरुपं जानति यः स विद्वान् । | ।।अ.सा.द्वि. ८९टी।। |
| विधिः | ✻ लोकलोकोत्तरशास्त्रसंवादपूर्वम् । आगमोक्तप्रकारः । आप्तप्रणीतयुक्तिः । | ।।हित. १६५टी।। |
| | ✻ सर्वत्र समयोक्तयुक्तिवाची । | ।।हित. १६६टी।। |
| विधिरसिकाः | ✻ विधिबहुमानिनः । | ।।ध.र. १००टी।। |
| विधिसूत्र- दृष्टांतम् | ✻ संपत्ते भिक्खकालंमि असंभंतो अमुच्छिओ । इमेण कमजोएण भत्तपाणं गवेसए ।। १ ।। | ।।ध.र. १०६टी।। |
| विधूतरजोमलाः | ✻ अपनीते रजोमले यैस्ते तथाविधाः । तत्र बध्यमानं कर्म्म रजोऽभिधीयते, पूर्वबद्धं तु मलमिति अथवा बद्धं रज, निकाचितं मलम्, अथवैर्यापथं सांपरायिकं मलमिति । | ।।ल.वि. चतुर्विंशति व्या.।। |
| विनयः | ✻ उचितप्रतिपत्तिः । | ।।ध.र. ११टी।। |
| | ✻ विनीयते अपनीयते विलीयते वाऽष्टप्रकारं कर्म येन, स विनय इति सामायिकी निरुक्तिः । | ।।ध.र. २५टी।। |
| | ✻ अभ्युत्थानादिः । | ।।ध.र. ३५टी।। |
| | ✻ प्रतिपत्तिलक्षणः । | ।।हित. ४०टी।। |
| | ✻ जम्हा विणयइ कम्मं अट्ठविहं चाउरंतमोक्खाए । तम्हा उवयंति विऊ विणओत्ति विलीणसंसारा ।। २१४ ।। | ।।हित.।। |
| | ✻ आन्तरप्रीतिप्रकर्षः । | ।।हित. २७३टी।। |
| | ✻ दण्डकग्रहणादिः । | ।।उप.मा.(सि.) १५७ टी।। |

| शब्दाः | उपनिषद् | ग्रन्थाः |
|---|---|---|
| | ✻ अभ्युत्थानाऽऽसनदानादिः । | ।।उप.मा.(सि.) १६५ टी।। |
| | ✻ विनीयतेऽनेनाऽष्टप्रकारं कर्मेति विनयः । | ।।उप.मा.(सि.) ३४२ टी।। |
| | ✻ निवृत्तिपरिणामपूर्वकपूज्यपूजनस्वभावः । | ।।अ.सा.पं. ४३टी।। |
| | ✻ देवगुरुधर्मेषु प्रचुरप्रणत्यादिभक्तिः । | ।।अ.सा.पं. १५४टी।। |
| विनियोगः | ✻ स्वप्राप्तधर्मस्थानस्य यथोपायं परस्मिन्नपि संपादकत्वे विनियोगः । | ।।यो.विं. १टी।। |
| विनिवृत्ताग्रहत्वम् | ✻ निर्मुक्तानुचितार्थाभिनिवेशित्वम् । | ।।यो.बिं. ५३टी।। |
| | ✻ व्यावृत्ताऽत्यन्तवितथाभिनिवेशभावत्वम् । | ।।यो.बिं. १७१टी।। |
| विनिश्चयः | ✻ विविधनयाश्रितनिश्चयम् । | ।।अ.सा.ष. १९५टी।। |
| विनीतः | ✻ गुरुजने गौरवकृत् । | ।।ध.प्र. ७टी।। |
| | ✻ विणओ सव्वगुणाणं मूलं सन्नाणदंसणाईणं ।<br>मोक्खस्स य ते मूलं तेण विणीओ इह पसत्थो ।। २५ ।। | ।।ध.र.।। |
| | ✻ अभुट्ठाणंजलीकरणं तहेवासणदायणं ।<br>गुरुभत्तिभावसुस्सूसा विणओ सो वियाहिओ ।। १ ।। | ।।ध.र. ३५टी।। |
| | ✻ मनःशुद्ध्या सम्यग् विनयोपचारचतुरः । | ।।हित. १०३टी।। |
| विनीतविनयः | ✻ विशेषेण नीतः प्राप्तो विनयो येन स विनीतविनयः । | ।।उप.मा.(सि.) ६ टी।। |
| विपरितरुचिमिथ्यात्वम् | ✻ अतथ्यं मन्यते तथ्यं, विपरीतरुचिर्जनः ।<br>दोषातुरमनास्तिक्तं, ज्वरीव मधुरं रसं ।।१०।। | ।।संबोध.प्र.मिथ्या.अधि.।। |
| विपाकविचयधर्मध्यानम् | ✻ पयइठिइपएसाणुभावभिन्नं सुहासुहविहत्तं ।<br>जोगाणुभावजणियं, कम्मविवागं विचिंतिज्जा ।।५५।। | ।।संबोध.प्र.ध्यान अधि.।। |
| | ✻ विपाकः कर्मणामुदयस्तस्य यो विचयो गत्यादिरुपेणावश्यदुष्टफलदायित्वेन<br>निर्धारणं विपाकविचयम् । | ।।अ.सा.पं. ११८टी।। |
| | ✻ ध्यायेत्कर्मविपाकं च तं तं योगानुभावजम् ।<br>प्रकृत्यादिचतुर्भेदं शुभाशुभविभागतः ।।१२१।। | ।।अ.सा.पं.।। |
| विपुलर्द्धिः | ✻ विपुला विस्तीर्णा ऋद्धिः समस्तमनोभावविलोकनसमर्था शक्तिरुपा संपद्<br>विपुलर्द्धिः विपुलमतिमनःपर्यवः । | ।।अ.सा.द्वि. १०३टी।। |
| विभावः | ✻ विपरीत आत्मनो हिते विपक्षभूतो यो भावो जीवस्य रागादिपरिणामः स । | ।।अ.सा.द्वि. ९०टी।। |
| विभुः | ✻ सर्वाकाशव्यापी । | ।।ल.वि. सिव-मयल व्या.।। |
| विमलत्वम् | ✻ तपःसंयमशुभ्रभावनादिभि-र्विगतकर्ममलत्वम् । | ।।अ.सा.द्वि. ९५टी।। |
| विमलम् | ✻ अतितीव्रमिथ्यात्वादिमलविकलम् । | ।।यो.बिं. ९९टी।। |
| | ✻ ज्ञानावारककर्माणुसंपर्कविकलम् । | ।।ध.र. १टी।। |
| विमलश्रद्धा | ✻ निष्कलङ्कधर्माभिलाषा । | ।।ध.र. १०४टी।। |
| विरक्तचेतस् | ✻ विरक्तं यथास्थितविषयविपाकज्ञानादुदासीनतां गतं चेतो मनो यस्य स तथा । | ।।अ.सा.द्वि. ८२टी।। |
| विरतिः | ✻ विरई इह पन्नत्ता जिणेहिं दुक्कम्ममम्ममहणेहिं ।<br>आसवदारनिरोहो सो पुण देसे य सव्वे य ।। ४१० ।। | ।।हित.।। |
| विरतिमार्गम् | ✻ सर्वसंवराध्वानम् । | ।।हित. २५०टी।। |

| शब्दाः | उपनिषद् | ग्रन्थाः |
|---|---|---|
| **विरागम्** | * उद्वेगम् । | ।।हित. २५९टी।। |
| **विवादः** | * वाक्कलहः । | ।।उप.मा.(सि.) ७० टी।। |
| **विवित्तया** | * देहादिपार्थक्यभावना । | ।।उप.मा.(सि.) ३४३ टी।। |
| **विवेकः** | * कृत्याकृत्यादिपरिक्षाविचारः । | ।।अ.सा.प्र. ९२टी।। |
| | * तत्त्वातत्त्वादियथार्थविचारः । | ।।अ.सा.तृ. २७टी।। |
| | * सदसद्वस्तुविचाररुपः । | ।।अ.सा.च. १५२टी।। |
| | * कृत्याकृत्यादिविचारः । | ।।अ.सा.च. १६७टी।। |
| | * जीवपुद्गलस्वभावविभावादीनां भिन्नताज्ञानम् । | ।।अ.सा.स. ३८टी।। |
| | * सदसद्वस्तुपरिज्ञानम् । | ।।ध.र. २०टी।। |
| | * संसक्तान्नपानोपकरणशय्यादिविषयत्यागः । | ।।हित. १९०टी।। |
| | * तत्त्वसंवेदनम् । | ।।यो.बिं. २४९टी।। |
| | * सम्यगर्थविचारणम् । | ।।ल.वि. पुक्खर. व्या.।। |
| **विवेकः-कायोत्पर्ग प्रायश्चित्तम्** | * कज्जो अणेसणिज्जे, गहिए असणाईए परिच्चाओ ।<br>कीरइ काउसग्गो, दिट्ठे दुस्सुविणपमुहंमि ।।५१।। | ।।संबोध.प्र.आलो.अधि.।। |
| **विवेकी** | * विवेकस्तत्त्वातत्त्वविचारोऽस्ति यस्य स तथा । | ।।अ.सा.प्र. ८२टी।। |
| | * लब्धपरमार्थविमर्शः । | ।।यो.बिं. ४०३टी।। |
| **विवेचकत्वम्** | * विवेचयति वस्तुस्वरुपं यथास्थाने नियोजयतीति विवेचकः तद्भावस्तत्त्वम् । | ।।अ.सा.च. १६४टी।। |
| **विशठा** | * भावसारमकपटेन वेति । | ।।उप.मा.(सि.) ३९ टी।। |
| **विशिष्टता-निषेधः** | * विशिष्टता विशेषः, तेन निषेधः, यथा न सन्ति घटप्रमाणानि मुक्ताफलानि ।<br>अत्र घटप्रमाणताविशेषणवन्मुक्ताफलानि निषिध्यन्ते । | ।।अ.सा.च. ८६टी।। |
| **विशिष्टमतिसङ्गतः** | * मार्गानुसारिप्रौढप्रज्ञानुगतः । | ।।यो.बिं. १९३टी।। |
| **विशुद्धः** | * विशेषेण शुद्धःपापकर्ममलवर्जितः । | ।।अ.सा.प्र. ९२टी।। |
| **विशेषः** | * भावप्रभेदः । | ।।अ.सा.पं. ७१टी।। |
| **विशेषग्राहिणः** | * विशेषं वस्तुनः समस्वभावं धौव्यरुपं परित्यज्य उत्पादव्ययरुपविषमधर्मं<br>गृह्णन्ति वस्तुत्वं कथयन्ति येऽशुद्धनैगमव्यवहारर्जुसूत्रशब्दसमभिरुढैवंभूता<br>नयास्ते विशेषग्राहिणः । | ।।अ.सा.ष. ९४टी।। |
| **विशेषज्ञः** | * सारेतरवेदी । | ।।ध.र. २३टी।। |
| | * सारेतरादिवस्तुवेदी, न रागद्वेषमूढत्वपूर्वव्युद्ग्राहितत्ववशात् प्रतिपन्नकुग्रा-<br>हैकतानमानस इति । | ।।ध.र. ६टी।। |
| | * वत्थूणं गुणदोसे लक्खेइ अपक्खवायभावेण ।<br>पाएण विसेसन्नू उत्तमधम्मारिहो तेण ।। २३ ।। | ।।ध.र.।। |
| **विश्रोतसिका** | * दुष्टान्तर्जल्परुपा । | ।।उप.मा.(सि.) २९७ टी।। |
| **विश्वस्ताः** | * सर्वात्मनाप्यात्मनि धृताप्तत्वबुद्धयः । | ।।हित. ३५४टी।। |
| **विषम्** | * विष्णाति प्राणान् वियोजयतीति विषम् । | ।।अ.सा.प्र. १६टी।। |
| **विषयकर्म** | * विषयोऽग्निजलपर्वतादिस्तस्मिन्मोक्षार्थे पतनादिकरणं तद्विषयकर्म विषयक्रिया । | ।।अ.सा.प्र. ४६टी।। |

| शब्दाः | उपनिषद् | ग्रन्थाः |
|---|---|---|
| विषयाः | ✻ विषीदन्त्येतेषु सत्सु दुर्मेधसः संयमं प्रतीतीति विषयाः शब्दादयः । | ।।उप.मा.(सि.) ६० टी।। |
| विषयानुष्ठानम् | ✻ आद्यं यदेव मुक्त्यर्थं क्रियते पतनाद्यपि ।<br>तदेव मुक्त्युपादेयलेशभावाच्छुभं मतम् ।।२१२ ।। | ।।यो.बिं. ।। |
| विषादः | ✻ दैन्यम् । | ।।उप.मा.(सि.) ३२० टी।। |
| विषानुष्ठानम् | ✻ विषं लब्ध्याद्यपेक्षात इदं सच्चित्तमारणात् ।<br>महतोऽल्पार्थनाज्ज्ञेयं लघुत्वापादनात्तथा ।। १५६ ।। | ।।यो.बिं. ।। |
| | ✻ विषं सद्यः प्राणापहारी क्ष्वेडः तद्वद्धर्मप्राणापहारि यदनुष्ठानं तदपि विषयमुच्यते । | ।।अ.सा.तृ. ५८टी।। |
| | ✻ आहारोपधिपूजर्द्धिप्रभृत्याशंसया कृतम् । शीघ्रं सच्चित्तहन्तृत्वाद्विषानुष्ठान-<br>मुच्ययते ।।५९।। | ।।अ.सा.तृ.।। |
| विस्मितहृदयः | ✻ हृदयं चित्तं रोमाञ्चोत्फुल्ललोचनता-मुखप्रसादादीनां बहिस्तत्कार्याणां दर्शनाद्<br>यस्याऽसौ विस्मितहृदयः । | ।।उप.मा.(सि.) ६ टी।। |
| विस्रोतोगमनम् | ✻ विमार्गप्रवृत्तम् । | ।।यो.बिं. ३९५टी।। |
| वीतरागः | ✻ उपशान्तमोहादौ पूजाकारकः । | ।।ल.वि. नमुत्थुणं व्या.।। |
| वीरः | ✻ महावीर्यविराजनात्तपःकर्मविदारणेन कषायादिशत्रुजयात्केवलश्रीस्वयं-<br>ग्रहणेन विक्रान्तो वीरः । | ।।यो. दृ. १टी।। |
| | ✻ कर्मविदारणात् तपसा विराजनाद् वर्यवीर्ययुक्तत्वाच्च जगति यो वीरः । | ।।ध.र. १टी।। |
| | ✻ विदारयति यत्कर्म तपसा च विराजते ।<br>तपोवीर्येण युक्तश्च तस्माद्वीर इति स्मृतः ।। १ ।। | ।।ध.र. १टी।।<br>।।हित. १टी।। |
| वीर्यम् | ✻ चेतस उत्साहः । | ।।अ.सा.च. ५३टी।। |
| | ✻ वीर्यान्तरायकर्म्मक्षयक्षयोपशमप्रभवात्मशक्तिविशेषम् । | ।।ल.वि. अन्नत्थ सूत्रं व्या.।। |
| | ✻ अनुष्ठानशक्तिः । | ।।ल.वि. प्रणिधान सूत्रम्।। |
| वृत्तयुक्तम् | ✻ अणुव्रतमहाव्रतसमन्वितम् । | ।।यो.बिं. ३५८टी।। |
| वृत्तिबीजम् | ✻ शारीरमानसचेष्टानिमित्तं तत्तत्कर्मरुपम् । | ।।यो.बि.४२३टी।। |
| वृत्तिसंक्षयः | ✻ वृत्तिसंक्षयश्च मनोद्वारा विकल्परुपाणां शरीरद्वारा परिस्पन्दरुपानामऽन्य-<br>संयोगात्मकवृत्तानामऽपुनर्भावेन निरोधः । | ।।यो.विं ३टी।। |
| | ✻ अन्यसंयोगवृत्तीनां यो निरोधस्तथा तथा ।<br>अपुनर्भावरूपेण स तु तत्संक्षयो मतः ।। ३६५ ।। | |
| | ✻ भावनादित्रयाभ्यासाद् वर्णितो वृत्तिसंक्षयः ।<br>स चात्मकर्मसंयोगयोग्यतापगमोऽर्थतः ।। ४०५ ।। | ।।यो.बिं.।। |
| वृत्तिसंक्षेपणम् | ✻ वृत्तिवर्त्तनं भिक्षा, तस्याः सङ्क्षेपणं परिमितग्रहणम् , दत्तिभिर्भिक्षाभिश्च ।<br>अत्रैव द्रव्यक्षेत्रकालभावाभिग्रहा अन्तर्भावनीयाः । | ।।हित. १८९टी।। |
| वृद्धानुगः | ✻ परिणतमतिपुरुषच्छन्दोऽनुवर्ती । | ।।ध.र. ७टी।। |
| | ✻ वुड्ढो परिणयबुद्धी पावायारे पवत्तई नेय ।<br>वुड्ढाणुगोवि एवं संसग्गिकया गुणा जेण ।। २४ ।। | ।।ध.र.।। |

| शब्दाः | उपनिषद् | ग्रन्थाः |
|---|---|---|
| **वेदः** | * सद्भूतार्थागमः । | ।।यो.बिं. ५७टी।। |
| **वेदकसम्यक्त्वम्** | * वेयगसम्मत्तं पुण, एवं चिय पंचहा मुणेयव्वं ।<br>सम्मत्तचरिमपोग्गलवेयणकाले तयं होइ ।। ८७।। | ।।संबोध.प्र. सम्य. अधि.।। |
| **वेदान्ती** | * अद्वैतप्रतिपादकज्ञानकांडमात्रवेदप्रतिपादकः । | ।।अ.सा.ष. २०२टी।। |
| **वेद्यसंवेद्यपदम्** | * वेद्यं संवेद्यते यस्मिन्नपायादिनिबन्धनम् ।<br>तथाऽप्रवृत्तिबुद्ध्यापि, स्त्र्याद्यागमविशुद्धया ।। ७३ ।।<br>* तत्पदं साध्ववस्थाना-द्भिन्नग्रन्थ्यादिलक्षणं ।<br>अन्वर्थयोगतस्तन्त्रे वेद्यसंवेद्यमुच्यते ।। ७४ ।। | ।।यो. दृ.।। |
| **वेद्यपदलिंगयुक्तजीवः** | * अतुक्करिसं अत्तंमि, न धरइ लोगुत्तरंमि पक्खवहो ।<br>पच्छाणुतावनिरओ, साणुक्कोसो य लोयगुणो ।।२७।।<br>इच्चाइणेगपवयणगुणविहिनिरओ (प) नमणतल्लिच्छो ।<br>वेज्जपयलिंगजुत्तो, विवरीओऽवेज्जपयजुत्तो ।।२८।। | ।।संबोध.प्र.मिथ्या.अधि.।। |
| **वैकल्यम्** | * उक्तानुक्तश्लीलाश्लीलदत्तादत्तकृताकृतशुच्यशुचिविभागविरहितम् । | ।।हित. ३६९टी।। |
| **वैनयिकमिथ्यात्वम्** | * आगमा लिङ्गिनो देवा, धर्म्माः सर्वे सदा समाः ।<br>इत्येषा कथ्यते बुद्धिः, पुंसां वैनयिकी जिनैः ।।८।। | ।।संबोध.प्र.मिथ्या.अधि.।। |
| **वैमनस्यम्** | * आत्मघातादिचिन्तमन् । | ।।उप.मा.(सि.) ३१९ टी।। |
| **वैयावृत्यम्** | * व्यापृतो व्यापारप्रवृत्तः प्रवचनोदितक्रियानुष्ठानपरस्तस्य भावः कर्म्म वा वैयावृत्यम् ।<br>* औषधसम्पादनादि । | ।।हित. १९०टी।।<br>।।उप.मा.(सि.) १५७ टी।। |
| **वैराग्यभावना** | * वैराग्यात् सुविदितजगत्स्वभावो विषयसंगरहितः सप्तभयवर्जित इहलोका-शाविप्रमुक्तो भवतीति वैराग्यभावना ।<br>* सविइयजगस्सहावो, निस्संगो निब्भओ निरासो य ।<br>वेरग्गभावियमणो, झाणंमि सुनिच्चलो होइ ।।३४।। | ।।अ.सा.पं. १०२टी।।<br>।।संबोध.प्र.ध्यान अधि.।। |
| **वैराग्यम्** | * संसारौदासिन्यम् ।<br>* संसारवासत उद्विग्नत्वम् ।<br>* भवस्वरूपविज्ञानाद्द्वेषान्नैर्गुण्यदृष्टिजात् ।<br>तदिच्छोच्छेदरूपं द्राग् वैराग्यमुपजायते ।। ४२ ।। | ।।अ.सा.प्र. ७६टी।।<br>।।अ.सा.स. ४२टी।।<br>।।अ.सा.द्वि.।। |
| **वैशेषिकः** | * कणादः । | ।।अ.सा.ष. २०२टी।। |
| **व्यतिरेकम्** | * व्यावृत्तिमुखमसंबन्धत्वेन यज्ज्ञातम् । | ।।अ.सा.द्वि. ६०टी।। |
| **व्ययः** | * उत्पादवदतीतभवनसंबन्धेन सर्वेषां विनाशित्वम् । | ।।अ.सा.पं. १२२टी।। |
| **व्यवहारः** | * योगमार्गोपयोगी हेयोपादेययोर्हानोपादानरूपः ।<br>* कारणस्यापि कार्यत्वोपचाररूपः ।<br>* कारणे कार्यत्वोपचारः ।<br>* गीतार्थचरितरूपः ।<br>* ज्ञानदर्शनचारित्रविषये प्रवर्तनात्मको वस्तुन उत्पादादिरुपः ।<br>* जनप्रसिद्धधर्मकृत्यप्रवृत्तिः । | ।।यो.बिं. २३९टी।।<br>।।यो.बिं. ३६९टी।।<br>।।यो.विं. ३टी।।<br>।।ध.र. ५२टी।।<br>।।अ.सा.द्वि. ७१टी।।<br>।।अ.सा.पं. १९टी।। |

| शब्दाः | उपनिषद् | ग्रन्थाः |
|---|---|---|
| | * वर्तनाप्रकारः । | ।।अ.सा.ष. १८टी।। |
| | * बहिस्तत्वनिरुपकाभिप्रायः । | ।।उप.मा.(सि.) ५१२ टी।। |
| | * प्रवृत्तिरुपम् । | ।।हित. ४०४टी।। |
| व्यवहारविशारदः | * प्रवृत्तिनिवृत्तिरुपज्ञाने कुशलः । | ।।अ.सा.ष. १४१टी।। |
| व्यवहारस्तुतिः | * व्यवहार उपचारोऽन्यस्यान्यत्वेन कल्पना तद्रुपा या स्तुतिः प्रशंसा सा व्यवहारस्तुतिः स्यात् । | ।।अ.सा.ष. १२५टी।। |
| व्यसनानि | * विशेषेण अस्यन्ते क्षिप्यन्ते दुर्गतौ जन्तव एभिरिति व्यसनानि, मद्यमांस-मैथुनासेवनप्रभृतीनि । | ।।हित. ५६टी।। |
| व्याख्या-अङ्गानि | * (१) संहिता :- नमोऽस्त्वर्हद्भ्य इति शुद्धपदोच्चारः ।<br>(२) पदम् :- नमः, अस्तु, अर्हद्भ्यः ।<br>(३) पदार्थः :- नमः इति पूजार्थम्, पूजा च द्रव्यभावसङ्कोचः । तत्र करःशिरपादादिसंन्यासो द्रव्यसङ्कोचः, भावसङ्कोचस्तु विशुद्धस्य मनसो नियोग इति ।अस्तु इति भवतु, प्रार्थनार्थोऽस्येति । णं इति वाक्यालङ्कारे; प्राकृतशैल्या इति चेहोपन्यस्तः । अर्हद्भ्यः इति देवादिभ्योऽ-तिशयपूजामर्हन्ति अर्हन्तस्तेभ्यो, नमः शब्दयोगाच्चतुर्थी ।<br>(४) पदविग्रहः :- यानि समासभाञ्जि पदानि तेषामेव भवति ।<br>(५) चालना :- अधिकृतानुपपत्तिचोदना । यथा, अस्तु इति प्रार्थना न युज्यते तन्मात्रादिष्टासिद्धेः ।<br>(६) प्रत्यावस्थानम् :- नीतितस्तन्निरासः, यथा, युज्यते एव, इत्थमेवेष्टसिद्धेरिति । | ।।ल.वि. नमुत्थुणं व्या.।। |
| व्याख्यानम् | * सत्रार्थप्रपंचरुपत्वाद् व्याख्यानस्य । | ।।ल.वि. प्रस्तावना।। |
| व्यापकः | * सर्वानुयायी । | ।।ल.वि. पुरिससिहाणं व्या.।। |
| व्याप्तिः | * सर्वतन्त्रानुगमः । | ।।ल.वि. प्रस्तावना।। |
| व्यावृत्तच्छद्मानः | * छादयतीति छद्म घातिकर्म्माभिधीयते ज्ञानावरणादि, तद्बन्धयोग्य-तालक्षणश्च भवाधिकार इति,असत्यस्मिन् कर्म्मयोगाभावात् । व्यावृत्तं छद्म येषां ते व्यावृत्तच्छद्मानः । | ।।ल.वि. वियट्ट. व्या.।। |
| व्यासंगम् | * व्यामोहपरत्वमासक्तिमिति यावत् । | ।।अ.सा.तृ. २३टी।। |
| व्युच्छिन्नक्रियाप्रतिपा-तिशुक्लध्यानम् | * तस्सेव य सेलेसी-गयस्स सेलुव्व निप्पकंपस्स । वुच्छिन्नकिरियमप्पडि-वाई झाणं परमसुक्कं ।।८६।। | ।।संबोध.प्र.ध्यान अधि.।। |
| व्युत्सर्गः | * अनेषणीयादिषु त्यक्तेषु गमनागमन-सावद्यस्वप्नदर्शन नौसन्तरणो-च्चारप्रश्रवणेषु च विशिष्टप्रणिधानपूर्वकः कायावाङ्मनोव्यापारपरिहारः । | ।।हित. १९०टी।। |
| | * व्युत्सर्जनीयस्य परित्यागो व्युत्सर्गः, स बाह्यो आभ्यन्तरश्च । तत्र बाह्यो द्वादशादिभेदस्योपधेरतिरिक्तस्यानेषणीयस्य संसक्तस्य च अन्नपानादेस्त्यागः। आभ्यन्तरः कषायाणां मृत्युकाले शरीरस्य च परिहारः । | ।।हित. १९०टी।। |

| शब्दाः | उपनिषद् | ग्रन्थाः |
|---|---|---|
| व्रत-सामायिकप्रतिमा | * बीयाणुव्वयधारी, सामाइयकडो हविज्ज तइयाए ।<br>होइ चउत्थी चउद्दसीअट्ठमाईसु दियहेसु ।।९५।। | ।।संबोध.प्र.श्राव.प्र.अधि.।। |
| व्रतातिचाराः | * मूलोत्तरगुणखण्डनलक्षणाः । | ।।उप.मा.(सि.) ४१३ टी।। |
| | **श** | |
| शंका-काङ्क्षे | * सव्वे देसे धम्मे, अत्थि नत्थित्ति संसओ संका ।<br>कंखा कुमयभिलासो, दयाइगुणलेसदंसणओ ।।३९।। | ।।संबोध.प्र. सम्य. अधि.।। |
| शक्तिः | * चित्तोत्साहः । | ।।उप.मा.(सि.) २९५ टी।। |
| शक्यम् | * सामर्थ्योचितम् । | ।।ध.र. ११८टी।। |
| शङ्का | * सर्वज्ञोपज्ञेषु जीवाजीवादिपदार्थेषु निबिडनिजज्ञानावरणोदयदोषादनव-<br>बुध्यमानेषु संशयकरणं शङ्का । भगवदर्हत्प्रणीततत्त्वाऽप्रत्यरुपा शङ्का । | ।।हित. २३टी।। |
| शठः | * मायावी । | ।।ध.र. १४टी।। |
| | * मिथ्यालम्बनप्रधानाः । | ।।ध.र. ८६टी।। |
| शबलता | * लघुबह्वतिरचारता । (उत्तरगुणविषयतया लघवः प्रभूता अतिचारा यत्र<br>चारित्रे तत्तथा तस्य भावः तत्ता ) | ।।उप.मा.(सि.) २५४ टी।। |
| शब्दब्रह्मविदः | * शब्दो वेदवचनं स एव ब्रह्म धर्मप्रतिपादकं तद् वेत्ति जानन्ति ये ते जैमिनीयाः । | ।।अ.सा.ष. २०२टी।। |
| शमः | * अन्तरवृत्तिदमनम् । | ।।अ.सा.प्र. ३९टी।। |
| | * शान्तिः क्षमा च । | ।।अ.सा.च. ५८टी।। |
| शमसौख्यम् | * अतिमन्दीभूतकषायविषदोषतया प्रशमशर्म । | ।।यो.बिं. ५४टी।। |
| शरणदाः | * शरणं भयार्त्तत्राणम्, तच्च संसारकान्तारगतानां अतिप्रबलरागादि<br>पीडितानां दुःखपरम्परासंक्लेशविक्षोभतः समाश्वासनस्थानकल्पं,<br>तत्त्वचिन्तारुपमध्यवसानं, विविदिषेत्यर्थः । तं ददातीति शरणदाः । | ।।ल.वि. सरणदयाणं व्या.।। |
| शरणम् | * भयार्त्तत्राणलक्षणम् । | ।।उप.मा.(सि.) ५१८ टी।। |
| शान्तः | * तथाविधेन्द्रियकषायविकारविकलः । | ।।यो.बिं. १८६टी।। |
| | * अन्तर्वृत्त्या कषायोदयरोधनतः । | ।।अ.सा.प्र. ३१टी।। |
| | * निःकषायतया क्षमासमुद्रः । | ।।अ.सा.पं. १५१टी।। |
| शान्तविक्षेपः | * शान्तः शान्तिं प्राप्तो विक्षेपो रागादिसंस्कारप्रेरणा व्यामोहो वा यस्य सः । | ।।अ.सा.पं. ७८टी।। |
| शासनम् | * शिष्यन्तेऽनेन जीवा इति शासनं द्वादशाङ्गम् । | ।।उप.मा.(सि.) ३४१ टी।। |
| शास्त्रयोगः | * शास्त्रयोगस्त्विह ज्ञेयो, यथाशक्त्यप्रमादिनः ।<br>श्राद्धस्य तीव्रबोधेन, वचसाऽविकलस्तथा ।। ४ ।। | ।।यो.दृ.।।<br>।।ल.वि. नमुत्थुणं व्या.।। |
| शिक्षकः | * अभिनवदीक्षितः । | ।।उप.मा.(सि.) ३७८ टी।। |
| शिक्षकविधिः | * दीक्षाभिमुखस्याभिनवदीक्षितस्य वा सामाचारीग्रहणक्रमः । | ।।उप.मा.(सि.) ४१७ टी।। |
| शिवम् | * सकलोपप्लवकलाविकलं देवताविशेषम् । | ।।यो.बिं. १टी।। |
| | * सर्वोपद्रवरहितत्वात् शिवम् । | ।।ल.वि. सिव-मयल व्या.।। |
| शिवोपायस्पर्शी | * शिवो मोक्षस्तस्य ये उपायाः सम्यग्दर्शनज्ञानचारित्रगोचरा व्यवहारास्तान्<br>स्पृशति अङ्गीकारपूर्वकं परिपालयति यः स तथा । | ।।अ.सा.द्वि. ५२टी।। |

| शब्दाः | उपनिषद् | ग्रन्थाः |
|---|---|---|
| शिष्यः | ※ विनेयः । | ।।ध.र. १२३टी।। |
| शीलम् | ※ चित्तसमाधिः । | ।।यो.बिं. ३५९टी।। |
| | ※ परद्रोहविरतिलक्षणम् । | ।।यो. दृ. ८८टी।। |
| | ※ सदाचारपरता । | ।।ध.र. ११टी।। |
| | ※ अव्रतत्यागः । | ।।हित. ४०टी।। |
| | ※ अब्रह्मत्यागो मैथुनविवर्जनम् । | ।।हित. १७२टी।। |
| | ※ अब्रह्मपरिहारः । | ।।हित. १७५टी।। |
| | ※ इन्द्रियनिग्रहः सदाचारश्च । | ।।हित. ३७७टी।। |
| | ※ समाधानम् । | ।।उप.मा.(सि.) ७४ टी।। |
| | ※ मूलोत्तरगुणसमाधानम् । | ।।उप.मा.(सि.) १८८ टी।। |
| | ※ विशिष्टं चेतःप्रणिधानम् । | ।।उप.मा.(सि.) २३४ टी।। |
| | ※ शुद्धाचाराचरणरतशुद्धपरिणामो ब्रह्मचर्यं च । | ।।अ.सा.द्वि. ९०टी।। |
| शीलवान् | ※ आययणं खु निसेवइ वज्जइ परगेहपविसणमकज्जे ।<br>निच्चमणुब्भडवेसो न भणइ सवियारवयणाइं ।। ३७ ।।<br>परिहरइ बालकीलं साहइ कज्जाइँ महुरनीईए ।<br>इय छव्विहसीलजुओ विन्नेओ सीलवंतोत्थ ।। ३८ ।। | ।।ध.र.।। |
| शीलविकलाः | ※ पार्श्वस्थादयः । | ।।उप.मा.(सि.) २२७ टी।। |
| शुक्लः | ※ शुक्ल नामाऽभिन्नवृत्तोऽमत्सरी कृतज्ञः सदारम्भी हितानुबन्ध इति । | ।।पंच सू.-च.सू.टी।। |
| शुक्लध्यानफलम् | ※ ते अ विसेसेण सुहा-सुहासवओणुत्तरामरसुहं च ।<br>दुण्हं सुक्काण फलं, परिनिव्वाणं परिल्लाणं ।।९८।। | ।।संबोध.प्र.ध्यान अधि.।। |
| शुक्लपाक्षिकः | ※ अपार्धपुद्गलावर्तान्तर्गतसंसारः । | ।।यो.बिं. ७२टी।। |
| शुक्ललेश्या | ※ धम्मंमि होइ बुद्धी, पावं वज्जेइ सव्वकज्जेसु ।<br>आरंभेसु न रज्जइ, अपक्खवाई य सुक्काए ।।१९।। | ।।संबोध.प्र.लेश्या अधि.।। |
| शुक्लाभिजात्यः | ※ शुक्लप्रधानः प्रायश्छिन्नकर्मानुबन्धः । | ।।पंच सू.-च.सू.टी।। |
| शुक्लाहारः | ※ शुद्धानुष्ठानसाध्यः शुद्धानुष्ठानहेतुः स्वरुपशुद्धश्च शुक्ल इति । योगिन एवम्भूतः शुक्लो विज्ञेयः । शुक्लाहारः सर्वसम्पत्कारी भिक्षेति विज्ञेयः। सम्पत्करी सर्वसम्पत्करणशीला दातृ-ग्रहीतरुभयलोकहिता । | ।।यो.श. ८१टी।। |
| शुद्धं (ज्ञानम्) | ※ संशयविपर्यासानध्यवसायजिनवचनविरुद्धप्ररुपणादिदोषरहितम् । | ।।अ.सा.प्र. ३६टी।। |
| शुद्धः | ※ सकलदोषरहितः । | ।।ल.वि. नमो. जिअ. व्या.।। |
| शुद्धचरणरसिकः | ※ निष्कलङ्कसंयमपालनोत्साहवान् । | ।।ध.र. ९३टी।। |
| शुद्धचेतस् | ※ शुद्धं रागादिदोषमलाभावाद्विमलं चेतो मनो यस्य स । | ।।अ.सा.द्वि. ८५टी।। |
| शुद्धदेशना | ※ क्षुद्रसत्त्वमृगयूथसंत्रासनसिंहनादः । | ।।ल.वि. प्रस्तावना।। |
| शुद्धद्रव्यनयस्थितिः | ※ शुद्धस्योत्पादव्ययत्यागिनो द्रव्यार्थिकनयस्य स्थितिः स्वरुपस्थानमिति यावत् । | ।।अ.सा.ष. ५७टी।। |
| शुद्धधर्मः | ※ ज्ञानदर्शनचारित्ररुपः । | ।।पंच सू.- प्र.सू.टी।। |

| शब्दाः | उपनिषद् | ग्रन्थाः |
|---|---|---|
| | * प्रतिपन्नजिनपतिमतः । | ।।ध.र. ४१टी।। |
| **शुद्धप्ररुपकः** | * यथावस्थितमाऽऽगमं व्याचक्षाणः । | ।।उप.मा.(सि.) ३४८ टी।। |
| **शुद्धम्** | * निर्वाणावन्ध्यबीजकल्पम् । | ।।यो.बिं. १८८टी।। |
| | * रागादिकलंकविरेहण प्रसन्नम् । | ।।अ.सा.तृ. ९५टी।। |
| **शुद्धयोगमार्गः** | * आगमान् निरवद्ययोगमार्गः । | ।।यो.श. ९५टी।। |
| **शुद्धव्यवहारविलंघनं** | * शुद्धः सर्वजनसंमतो न्याययुक्तियुक्तो व्यवहारो मोक्षादिसमग्रसुखसंपादको दानशीलाद्यात्मको लोकोत्तरः उत्पादव्ययध्रौव्यरुपो वास्तविकः, कृषिवाणिज्यादिलौकिकप्रवर्तनरुपश्च तस्य त्रिविधस्यापि सर्वस्य विलंघनं विशेषेणातिक्रमणं विलोपनमिति यावत् । | ।।अ.सा.च. ६१टी।। |
| **शुद्धा क्रिया** | * निदानाशंसापरापकर्षनिन्दादिदोषरहिता साधुश्राद्धसमग्रसामाचारीव्यवहारः । | ।।अ.सा.प्र. ३६टी।। |
| **शुद्धिः** | * विशेषाभिव्यक्तिरिति । | ।।यो.श. ९०टी।। |
| | * स्व-परयोः प्रायश्चित्तेन क्षालनम् । | ।।उप.मा.(सि.) ४१३ टी।। |
| **शुद्धोञ्छम्** | * निर्दोषभैक्षम् । | ।।ध.र. १२८टी।। |
| **शुभः** | * प्रशस्तः । | ।।यो. दृ. ३३टी।। |
| **शुभभावप्रसरः** | * विशुद्धध्यानप्रकर्षः । | ।।हित. २०३टी।। |
| **शुभभावम्** | * विशुद्धाध्यवसायः । | ।।हित. २०९टी।। |
| **शुभभावांशयोगः** | * मुक्त्यऽद्वेषेण मनाग्मुक्त्यऽनुरागेण वा शुभभावलेशसङ्गमः । | ।।यो.बिं. १५९टी।। |
| **शुभम्** | * आत्मनः सद्धर्ममंगलं सद्गत्यादिकं वा । | ।।अ.सा.तृ. ९१टी।। |
| **शुश्रूषा** | * श्रोतुमिच्छा, गेयरागिकिन्नरगेयशुश्रूषाधिका । | ।।यो.श. १४टी।। |
| | * श्रोतुमिच्छा । | ।।ल.वि. सरणदयाणं व्या.।। |
| **शून्यमना** | * मुकुलितचित्तचैतन्यः । | ।।हित. ३६९टी।। |
| **शैक्ष्यः** | * अचिरप्रव्रजितः शिक्षार्हः । | ।।हित. १९०टी।। |
| **शैलेशी** | * शीलं सर्वसंवररुपं तस्येशोऽधिपः शीलेशः, तस्येयमऽवस्था शैलशी । | ।।यो.बिं. ३६७टी।। |
| **शैवाः** | * शैव-पाशुपत-महाव्रत-कालप्रमुखभेदैश्चतुप्रकाराः । | ।।हित. ३१३टी।। |
| **शोकः** | * इष्टवियोगादिजो मनोविकारः । | ।।यो. दृ. ७९टी।। |
| | * स्वजनमरणादौ चित्तखेदः । | ।।उप.मा.(सि.) ३१९ टी।। |
| **शोक्यासम-श्राद्धः** | * थद्धो छिद्दप्पेही पमायखलियाणि निच्चमुच्चरइ । सड्ढो सउक्किकप्पो साहुजणं तिणसमं गणइ ।। ४ ।। | ।।हित ३०१टी।। |
| **शोधनम्** | * स्थिरत्वसंपादनेनाशुभविकल्पत्यागेन विमलताविधानम् । | ।।अ.सा.तृ. ९६टी।। |
| **शौचम्** | * शरीरवस्त्रद्रव्यव्यवहारशुद्धिरुपम् । | ।।यो.बिं. ११६टी।। |
| | * व्रतपावित्र्यम् । | ।।अ.सा.स. ४२टी।। |
| **श्रद्धा** | * आस्तिक्यम् । | ।।अ.सा.तृ. ८९टी।। |
| | * वाञ्छा । | ।।ध.र. ७८टी।। |
| | * कर्मक्षयोपक्षमसज्ज्ञानप्रभवः पटुरऽभिलाषः । न पुन-र्विषयप्रतिभासमात्रं बालस्य रत्नग्रहाभिलाषवत् । | ।।ध.र. ९०टी।। |

| शब्दाः | उपनिषद् | ग्रन्थाः |
|---|---|---|
| | * विशुद्धागमबहुमानसारा । | ।।ध.र. १०३टी।। |
| | * धर्माभिलाषः । | ।।ध.र. १०५टी।। |
| | * गुरुग्रंथशुश्रूषायै क्षणे क्षणे प्रवर्द्धमाना हृदयानन्दाविष्कारिणी वासना । | ।।हित. १०३टी।। |
| | * संवेगलक्षणा । | ।।उप.मा.(सि.) १६७ टी।। |
| | * जिनवचनोक्तस्य करणेच्छा आस्तिक्यं च ,सा च मिथ्यात्वमोहनीयक्षयोपशमजा | |
| | जीवस्य धर्मरुचिपरिणामत्वात्, तथा इच्छायोगे साफल्यं ज्ञेयम् । | ।।अ.सा.तृ. ९१टी।। |
| | * जिनवचने परमास्तिक्यम् । | ।।अ.सा.पं. २०टी।। |
| | * सर्वज्ञोक्ते शुद्धास्तिक्यम् । | ।।अ.सा.स. ३८टी।। |
| | * निजोऽभिलाषः, मिथ्यात्वमोहनीयकर्म्मक्षयोपशमादिजन्यश्चेतसः प्रसाद इत्यर्थः । | |
| | अयञ्च जीवादितत्त्वार्थानुसारी समारोपविघातकृत् कर्म्मफलसम्बन्धास्ति- | |
| | त्वादिसंप्रत्ययाकारः चित्तकालुष्यापनायी धर्म्मः । | ।।ल.वि. अरिहंत चेइ. व्या.।। |
| | * शुद्धमार्ग्गरुचिः । | ।।ल.वि. प्रणिधान सूत्रम्।। |
| श्रद्धागुणः | * संयमाराधनलाम्पट्यपरिणामः । | ।।ध.र. ९३टी।। |
| श्रद्धाधनसमन्वितः | * श्रद्धानुष्ठानाभिलाषरुपधनसमन्वितः । | ।।यो.बिं. २२१टी।। |
| श्रमणाः | * श्रामयन्ति तपस्यन्ति परमपदायेति श्रमणाः निर्ग्रन्थास्तपस्विनः । | ।।हित. ११९टी।। |
| श्रवणम् | * श्रोत्रोपयोगः । | ।।ल.वि. सरणदयाणं व्या.।। |
| श्राद्धः | * सन्मार्गश्रद्धालुः । | ।।यो.बिं. २२७टी।। |
| | * तथाविधमोहापगमात्संप्रत्ययात्मिकादिश्रद्धावान् । | ।।यो. दृ. ४टी।। |
| | * श्रमणोपासकः । | ।।हित. १२३टी।। |
| | * तथाविधमोहापगमात् स्वसंप्रत्ययात्मिकादिश्रद्धावान् । | ।।ल.वि. नमुत्थुणं व्या.।। |
| | * विहिवायं नयवायं, आगमवायं खु चरियअणुवायं । | |
| | नाऊण सुसीलाणं, जो कुणइ सयावि सो सड्ढो ।।९।। | ।।संबोध.प्र.अविरत.दृष्टिः अधि.।। |
| श्रावकः | * संपत्तदंसणाई पइदियहं जइजणा सुणेइत्ति । | |
| | सामायारिं परमं जो खलु तं सावयं बिंति ।। १ ।। | |
| | परलोगहियं सम्मं जो जिणवयणं सुणेइ उवउत्तो । | |
| | अइतिव्वकम्मविगमा सुक्कोसो सावगो एत्थ ।। २ ।। | ।।ध.र. ३१टी।। |
| | * श्रद्धालुतां श्राति शृणोति शासनं दानं वपेदाशु वृणोति दर्शनम् । | |
| | कृन्तत्यपुण्यानि करोति संयमं तं श्रावकं प्राहुरमी विचक्षणाः ।।१।। | |
| | चिंतइ जइकज्जाइं न दिट्ठखलिओवि होइ निन्नेहो । | |
| | एगंतवच्छलो जइजणस्स जणणीसमो सड्ढो ।।२।। | |
| | हियए ससिणेहो च्चिय मुणीण मंदायरो विणयकम्मे । | |
| | भाइसमो साहूणं पराभवे होइ सुसहाओ ।। ३ ।। | |
| | मित्तसमाणो माणा ईसिं रुसइ अपुच्छिओ कज्जे । | |
| | मन्नंतो अप्पाणं मुणीण सयणाउ अब्भहियं ।। ४ ।। | |
| | थद्धो छिद्दपेही पमायखलियाणि निच्चमुच्चरइ । | |

| शब्दाः | उपनिषद् | ग्रन्थाः |
|---|---|---|
| | सड्ढो सवत्तिकप्पो साहुजणं तणसमं गणइ ।। ५ ।। | |
| | गुरुभणियो सुत्तत्थो बिंबिज्जइ अवितहो मणे जस्स । | |
| | सो आयंससमाणो सुसावओ वन्निओ समए ।।६।। | |
| | पवणेण पडागा इव भामिज्जइ जो जणेण मूढेण । | |
| | अविणिच्छियगुरुवयणो सो होइ पडाइयातुल्लो ।।७।। | |
| | पडिवन्नमसग्गाहं न मुयइ गीयत्थसमणुसिट्ठोवि । | |
| | थाणुसमाणो एसो अपओसी मुणिजणे णवरं ।।८।। | |
| | उम्मग्गदेसओ निन्हवोसि मूढोसि मंदधम्मोसि । | |
| | इय संमंपि कहंतं खरंटए सो खरंटसमो ।। ९ ।। | ।।ध.र. ३२टी।। |
| | * संपत्तदंसणाई, पइदियहं जइजणाओ निसुणेइ । | |
| | सामायारिं परमं, जो खलु तं सावगं बिंति ।।१।। | ।।संबोध.प्र.अविरत.दृष्टि.अधि.।। |
| | * अणुव्रताद्युपासकप्रतिमागतक्रियासाध्यः | |
| | साधुधर्म्माभिलाषातिशयरुप आत्मपरिणामः । | ।।ल.वि. धम्मदयाणं व्या.।। |
| | * शृण्वन्ति समाकर्णयन्ति सद्गुरुमुखारविन्दाद् | |
| | यतिश्रावकसामाचारीमिति श्रावकाः । | ।।हित. ११९टी।। |
| **श्रीमत्सिद्धसेनदिवाकरः** | * श्रीर्ज्ञानवैराग्यादिलक्ष्मीः सास्ति येषां स एव सिद्धिपथसेनासु | |
| | शिवसाधकमुनिगणेषु मार्गप्रकाशनगुणेषु दिवाकरः सूर्य इति । | ।।अ.सा.ष. ८८टी।। |
| **श्रुतनिकषः** | * आगमकषपट्टकः, बहुश्रुतत्वात् परीक्षास्थानमित्यर्थः । | ।।उप.मा.(सि.) १९१ टी।। |
| | * आगमसद्भावः | ।।उप.मा.(सि.) ४१५ टी।। |
| **श्रुतम्** | * समयः । | ।।हित. ४०३टी।। |
| | * आगमम् । | ।।यो. दृ. ८८टी।। |
| | * पारगतागमम् । | ।।ध.र. ८१टी।। |
| | * सिद्धान्तम् । | ।।ध.र. ११२टी।। |
| | | ।।हित. ११६टी।। |
| | * सुव्वइ य निसामिज्जइ पारंपज्जेण जेण तेण सुयं । | |
| | तं पि दुभेयं नेयं अंगपविट्ठं तदियरं च ।। ८२ ।। | ।।हित।। |
| | * द्वादशाङ्गगणिपिटकम् । | ।।हित. १६७टी।। |
| | * अङ्गानङ्गरुपम् । | ।।हित. ३७७टी।। |
| | * प्रवचनं सामायिकादिचतुर्दशपूर्वपर्यन्तम् । | ।।ल.वि. पुक्खर. व्या.।। |
| **श्रुतवान्** | * शब्दोल्लेखवान् । | ।।अ.सा.ष. ८५टी।। |
| **श्रुतसारविशारदः** | * सिद्धान्ततत्त्वाभिज्ञः । | ।।ध.र. ११५टी।। |
| **श्रुता-ऽऽज्ञाव्यवहारौ** | * आयारपकप्पाइं, सेसं सव्वं सुयं विणिद्दिट्ठं । | |
| | देसंतरट्ठियाणं, गूढपयालोयणं आणा ।।६९।। | ।।संबोध.प्र.आलो.अधि.।। |

## ष

| शब्दाः | उपनिषद् | ग्रन्थाः |
|---|---|---|
| **षट्स्थानम्** | * षण्णां वृद्धिस्थानानां हानिस्थानानां चानन्तभागासंख्येयभागसंख्येयभा | |
| | गसंख्येयगुणासंख्येयगुणानंतगुणलक्षणम् । | ।।ल.वि. लोगपज्जो. व्या.।। |

## स

**संक्षोभः** * विषादचिह्नोपदर्शन-दैवोपालम्भमनःशून्यता-नित्यकृत्यपरित्यागादिः । ।।हित. १२टी।।

**संग्रहशीलः** * तद्गुणानपेक्ष्य शिष्य-वस्त्र-पात्रा-द्यादानतत्परः,तथाविधस्य गुण-
वृद्धिहेतुवात् । ।।उप.मा.(सि) ११ टी. ।।

**संघः** * एगो साहू एगा य साहूणी, सावओ य सड्ढी वा ।
आणाजुत्तो संघो, सेसो पुण अट्ठिसंघाओ ।।२८८।।
निम्मलनाणपहाणो, दंसणजुत्तो चरित्तगुणवंतो ।
तित्थयराण य पुज्जो, वुच्चइ एयारिसो संघो ।।२८९।।
सव्वो वि नाणदंसणचरणगुणविभूसियाण समणाणं ।
समुदाओ होइ संघो गुणसंघाउत्ति काऊणं ।।२९०।।
इक्को वि नीइवाई, अवलंबंतो विसुद्धववहारं ।
सो होइ भावसंघो, जिणाण आणं अलंघंतो ।।२९१।। ।।संबोध.प्र.गुरु अधि.।।

**संज्ञानचक्षुः** * निर्मलविवेकलोचनम् । ।।यो.बिं. ३४१टी।।

**संतानः** * नानाकालीनकारणाऽनन्वितकार्यमात्रवर्तनाधर्मः उत्पादव्ययाभ्यां गुणपर्या-
यप्रवाह इति यावत् । ।।अ.सा.ष. ९५टी।।

**संतुष्टः** * अतिशयेन कृतार्थः । ।।अ.सा.पं. ८टी।।

**संतोषः** * आत्मरामतालक्षणा । ।।यो.बिं. ४१०टी।।
* निजलाभोदयानुमानसम्पद्यमानपुरुषार्थोपबृंहकवृत्तिमात्रजनितः स्वान्त-
धृतिपोषः सन्तोषः । ।।हित. १३टी।।
* चित्तस्य स्वास्थ्ये निवेशनम् । ।।अ.सा.च. १५टी।।

**संन्यासः** * निवृत्तिरुपरमः । ।।ल.वि. नमुत्थुणं व्या.।।

**संबंधः** * परस्परानुवृत्तिः चेष्टारुपः संयोगः । अवगाह्यावगाहलक्षणः । ।।ल.वि. आइगराणं व्या.।।

**संमूर्च्छिमप्रवृत्तम्** * संमूर्च्छन्ति यत्र तत्रोत्पद्यन्ते ये पतङ्गभृङ्गकीटादयस्तेषां यत्प्रवृत्तं
विमनस्कत्वेन प्रवर्तनं तद्वदिति । ।।अ.सा.तृ. ६४टी।।

**संयमस्थानः** * सामायिकादि । ।।यो.श. ९५टी।।

**संयोगनिषेधः** * संयोगो विवक्षितस्थाने संबन्धः, तेन निषेधो, यथा नास्ति गृहे देवदत्तः,
अत्र देवदत्तस्य गृहेण सह संयोगनिषेधः कृतः, न तु देवदत्तस्य गृहस्य वा । ।।अ.सा.च. ८६टी।।

**संरंभ-समारंभ-आरंभाः** * संरंभो संकप्पो, परितावकरो भवे समारंभो ।
आरंभो उद्दवओ सुद्धनयाणं तु सव्वेसिं ।।६१।। ।।संबोध.प्र.गुरु अधि.।।
* संकप्पो संरंभो, परितावकरो भवे समारंभो ।
आरंभो उद्दवओ, सव्वनयाणं विसुद्धाणं ।।६।। ।।संबोध.प्र.श्राव.प्र.अधि.।।

**संलीनता** * इन्द्रियनोइन्द्रियसंगुप्तता । तत्र रागद्वेषहेतुभ्यो मनोज्ञामनोज्ञशब्दादिभ्यः
संहृतव्यापाराणामिन्द्रियाणामात्मन्येव संयोजनमिन्द्रियसंलीनता । तथा
आर्तरौद्रध्यानपरिहारेण क्रोधादीनामुदयनिरोधः, उदयप्राप्तानां च वैफल्या-
पादनं नोइन्द्रियसंलीनता । ।।हित. १८९टी।।

| शब्दाः | उपनिषद् | ग्रन्थाः |
|---|---|---|
| संवरः | ※ चारित्रपञ्चकादिरुपः सप्तपञ्चाशद्विधोऽभिनवकर्मप्रवेशनिरोधः । | ।।अ.सा.पं. १३०टी।। |
| संवासः | ※ औचित्येन (अधिकगुण-तुल्यगुणप्राणि) तदुपजीवनादि निर्जराफलः । | ।।यो.श. ४४टी।। |
| संविग्नः | ※ मोक्षाभिलाषी । | ।।उप. मा. (सि) ३७६।। |
| संविग्नपाक्षिकः | ※ संविग्नपक्षे मोक्षाभिलाषिणि सुसाधुवर्गे सुन्दरा बुद्धि-विद्यते येषां ते संविग्नपाक्षिकाः । | ।।उप.मा.(सि.) ५१४ टी।। |
| संविज्ञपाक्षिकः | ※ संविज्ञा मोक्षमार्गे समुद्यतविहारास्तेषां पक्षो गुणधर्मप्ररुपणं यस्यास्ति स संविज्ञपाक्षिकः । | ।।अ.सा.प्र. ६६टी।। |
| | ※ कायेनाऽन्यत्र प्रवृत्तोऽपि दृढं मोक्षमार्गप्रतिबद्धचित्तस्तु संविज्ञपाक्षिक इति । | ।।उप.मा.(सि.) ५२५ टी।। |
| संविग्नाः | ※ मोक्षाभिलाषिणः, गीतार्थाः । | ।।ध.र. ८०टी।। |
| संविज्ञपक्षरुचिः | ※ संविज्ञा मोक्षभिलाषिणः सुसाधवः, तत्पक्षे तदनुष्ठाने रुचिरभिलाषो यस्या ऽसौ संविग्नपक्षरुचिरिति । | ।।उप.मा.(सि.) ५१३ टी।। |
| संविज्ञाः | ※ मङ्क्षु मोक्षाभिलाषिणः । | ।।ध.र. १००टी।। |
| संवेगः | ※ तथ्ये धर्मे ध्वस्तहिंसाप्रबन्धे, देवे रागद्वेषमोहादिमुक्ते ।<br>साधौ सर्वग्रन्थसंदर्भहीने, संवेगोऽसौ निश्चलो योऽनुरागः ।। २ ।। | ।।यो.बिं. २९०टी।। |
| | ※ मोक्षाभिलाषः । | ।।यो.विं ८टी।। |
| | ※ श्रद्धाविशेषः । | ।।यो. दृ. २९टी।। |
| | ※ मोक्षाभिलाषो देवगुरुधर्मेष्वास्तिक्यं च । | ।।अ.सा.तृ. ९०टी।। |
| | ※ मोक्षाभिलाषः । | ।।अ.सा.पं. १३२टी।। |
| | ※ धर्माद्यनुरागः । यदुक्तम्,<br>तथ्ये धर्मे ध्वस्तहिंसाप्रबन्धे, देवे रागद्वेषमोहादिमुक्ते ।<br>साधौ सर्वग्रन्थसंदर्भहीने, संवेगोऽसो निश्चलो योऽनुरागः ।।१।। | ।।ल.वि. पुक्खर. व्या.।। |
| संवेगगर्भम् | ※ अन्तःप्रवेशितनिर्वाणाभिलाषम् । | ।।यो.बिं. १६०टी।। |
| संवेजनी कथा | ※ सम्यग् वेज्यते भयं ग्राह्यते श्रोता यया सा संवेजनी कथा । नारकतिर्यगा-दिदुःखलक्षोपक्षेपणीं यां श्रुत्वा भव्यप्राणी चतुर्विधादपि संसारादुद्विजते मोक्षार्थं च घटत इति । | ।।हित. ४७२टी।। |
| संशुद्धानुष्ठानम् | ※ उपादेयधियात्यन्तं, संज्ञाविष्कम्भणान्वितम् ।<br>फलाभिसन्धिरहितं, संशुद्धं ह्येतदीदृशम् ।। २५ ।। | ।।यो. दृ.।।<br>।।ल.वि. नमुत्थुणं व्या.।। |
| संशुद्धिः | ※ स्वभावभूतमलक्षयः । | ।।यो.बिं. १७२टी।। |
| संसक्तः | ※ परगुणदोषेषु सङ्गात् । | ।।उप. मा.(सि) ३५३ टी।। |
| | ※ पासत्थाईएसु संविग्गेसुं च जत्थ मिलई उ ।<br>तहि तारिसओ होइ, पियधम्मो अहव इयरो य ।।१७।।<br>सो संसक्तो दुविहो, देसे सव्वे य इत्थ नायव्वो ।<br>अहच्छंदो वि पंचम अणेगविहो होइ नायव्वो ।।१८।। | ।।संबोध.प्र.गुरु अधि.।। |
| संसारः | ※ संस्रणं पुनः पुन-र्भवान्तरेषु भ्रमणम् । | ।।अ.सा.पं. १३४टी।। |
| संसारपथाः | ※ भवमार्गा गहस्थ-चरकादि-पार्श्वस्थादिरुपा इति । | ।।उप.मा.(सि.) ५२० टी।। |

| शब्दाः | उपनिषद् | ग्रन्थाः |
|---|---|---|
| **संसारवंचना** | * संसारे भवे वंचना स्वल्पविषयसुखगृद्धानां नरकादियातनास्थानप्राप्त्या विप्रलम्भना । | ।।उप.मा.(सि.) १७० टी।। |
| **संस्तवः** | * परिचयः। स च एकावसथाऽवस्थान-स्निग्धालाप-भोजनवस्त्रादिदानलक्षणः । | ।।हित. २३टी।। |
| **संस्थानविचयधर्मध्यानम्** | * जिणदेसियाइ लक्खण-संठाणासणविहाणमाणाइं ।<br>उप्पायट्ठिइभंगाइपज्जवा जे अ दव्वाणं ।।५६।।<br>पंचत्थिकायमइयं, लोयमणाइनिहणं जिणक्खायं ।<br>नामाइभेयभिण्णं, तिविहमहोलोगभेयाइ ।।५७।।<br>खिइवलयदीवसायर-नरयविमाणभवणाइसंठाणं ।<br>वोमाइपइट्ठाणं, निययं लोगट्ठिइविहाणं ।।५८।।<br>उवओगलक्खणमणाइ-निहणमत्थंतरं सरीराओ ।<br>जीवमरुविं कारिं, भोइं च सगस्स कम्मस्स ।।५९।।<br>तस्स य सकम्मजणियं, जम्माइजलं कसायपायालं ।<br>वसणसयसावयमणं, मोहावत्तं महाभीमं ।।६०।।<br>अन्नाणमारुएरिय-संजोगविओगवीइसंताणं ।<br>संसारसागरमणोरपारमसुहं विचिंतिज्जा ।।६१।।<br>तस्स य संतरणसहं, सम्मद्दंसणसुबंधणमणग्घं ।<br>नाणमयकण्णधारं, चारित्तमयं महापोयं ।।६२।।<br>संवरकयनिच्छिड्डं, तवपवणाविद्धजवणतरवेगं ।<br>वेरग्गमग्गपडियं, विसुत्तियावीइनिक्खोभं ।।६३।।<br>आरोढुं मुणिवणिया, महग्घसीलंगरयणपडिपुण्णं ।<br>जह तं निव्वाणपुरं, सिग्घमविग्घेण पावंति ।।६४।।<br>तत्थ य तिरयणविणिओगमइयमेगंतियं निराबाहं ।<br>साहावियं निरुवमं, जह सुक्खं अक्खयमुविंति ।।६५।।<br>किं बहुणा सव्वं चिय, जीवाइपयत्थवित्थरोवेअं ।<br>सव्वनयसमूहमयं, झाएज्ज़ा समयसब्भावं ।।६६।। | ।।संबोध.प्र.ध्यान अधि.।। |
| | * संस्थानस्य लोकाकारस्य चिन्तनात् तस्मिन्ननादिपरिभ्रमणनिर्धारणात् संस्थानविचयम् । | ।।अ.सा.पं. ११८टी।। |
| | * उत्पादस्थितिभंगादिपर्यायैर्लक्षणैः पृथक् ।<br>भेदैर्नामादिभिर्लोकसंस्थानं चिन्तयेद् भृतम् ।।१२२।। | ।।अ.सा.पं.।। |
| **संहिता** | * अस्खलितादिगुणोपेतसूत्रोच्चारणम् । | ।।ध.र. १टी।। |
| **सकामनिर्जरा** | * सह कामेन मोक्षाभिलाषपूर्वकोद्यमेन या निर्जरा कर्मपरिशाटना सकामनिर्जरा । | ।।अ.सा.तृ. ७२टी।। |
| **सकृदावर्तनाः** | * सकृदेकवारमावर्तन्त उत्कृष्टां स्थितिं बध्नन्ति ये ते सकृदावर्तनाः । | ।।यो.बिं. ३७०टी।।<br>।।यो.विं ३टी।। |
| **सङ्क्लेशः** | * चित्तविबाधा । | ।।उप.मा.(सि.) २८२ टी।। |
| **सङ्क्षोभः** | * चौरादेः त्रासः । | ।।उप.मा.(सि.) ३२० टी।। |

| शब्दाः | उपनिषद् | ग्रन्थाः |
|---|---|---|
| सङ्घः | ✻ श्रमण-श्रमणी-श्रावक-श्राविकारुपः । | ।।हित. ४टी।। |
| | ✻ साधुसाध्वीश्रावकश्राविकारुपः । | ।।हित. १६७टी।। |
| सचित्तत्यागप्रतिमा | ✻ एवंविहो वि नवरं, सच्चित्तं पि परिवज्जए सव्वं ।<br>सत्त य मासे नियमा, फासुयभोयणगतप्पडिमा ।।१०३।। | ।।संबोध.प्र.श्राव.प्र.अधि.।। |
| ४४ | **आचार्यस्य गुणाः (४४) (गुरु अधिकारः)** | |
| | आसायणतित्तीसं[३३], विरियायारस्स[३] तिगममगूहंतो । | |
| | एवं सूरिगुणाणं, छत्तीसं वण्णियं सच्चं ॥ **१३८** ॥ | ॥ संबोध प्रकरणम् ॥ |
| ४५ | **आचार्यस्य गुणाः (४५) (गुरु अधिकारः)** | |
| | पणवीसं भावणाइ[२५], भाविल्लो पंचमहव्वयाईणं । | |
| | इक्कारसंगधारी[११], सूरिगुणा हुंति छत्तीसं ॥ **१३९** ॥ | ॥ संबोध प्रकरणम् ॥ |

| क्रम | तत्त्वसंख्यामृतानि | ग्रन्थाः |
|---|---|---|

४६ **आचार्यस्य गुणाः (४६) (गुरु अधिकारः)**

तह बारसंगधारी[१२], पइण्णदसयं[१०] छछेय[६] चउमूलं[४] ।
नंदी[१] अणुओगधरो[१], अरागदोसेहिं[२] छत्तीसं ॥ १४० ॥ ॥ संबोध प्रकरणम् ॥

४७ **आचार्यस्य गुणाः (४७) (गुरु अधिकारः)**

नाणंमि दंसणंमिय, चरणंमि तवंमि तहय विरियंमि ।
करणकारणाणुमइभेएहिं हुंति पण्णरसं[१५] ॥ १४१ ॥
दसविहसामायारीकुसलो[१०] पणसमिय[५] पंचसज्झाओ[५] ।
अपमत्तेगगुणेहिं[१], कुणइ सया सूरि छत्तीसं ॥ १४२ ॥ ॥ संबोध प्रकरणम् ॥

४८ **आचार्यस्य गुणाः (४८) (गुरु अधिकारः)**

अट्ठ य पवयणमायाओ[८] सुहदुहसेज्झाण[८] अट्ठ तिविहसच्चं ।
छब्भासा[६] झाण[२] दुगं, सत्तविभंग[७] दुधम्म[२] छत्तीसं ॥ १४३ ॥ ॥ संबोध प्रकरणम् ॥

४९ **आचार्यस्य गुणाः (श्लोक ४९ टीका)**

संविग्गो[१] मज्झत्थो[२] संतो[३] मउओ[४] रिऊ[५] सुसंतुट्ठो[६] ।
गीयत्थो[७] कडजोगी[८] भावन्नू[९] लद्धिसंपन्नो[१०] ॥ १ ॥
देसणिओ[११] आदेओ[१२] मइमं[१३] विन्नाणिओ[१४] ।
निरुय[१५] वाई[१६] नेमित्ति[१७] ओयंसी[१८] उवयारी[१९] धारणाबलिओ[२०] ॥ २ ॥
बहुदिट्ठो[२१] नयनिउणो[२२] पियंवओ[२३] सुस्सरो[२४] तवे निरओ[२५] ।
सुसरीरो[२६] सुप्पइभो[२७] चाई[२८] आणंदओ[२९] चोक्खो[३०] ॥ ३ ॥
गंभीरो[३१] अणुयत्ति[३२] पडिवन्नयपालगो[३३] थिरो[३४] धीरो[३५]।
उचियन्नू[३६] सूरीणं छत्तीसगुणा सुयक्खाया ॥ ४ ॥ ॥ धर्मरत्न प्रकरणम् ॥

## ३७ संख्या

१ **निर्ग्रंथस्य प्ररूपणा (गुरु अधिकारः)**

पन्नवण[१] वेय[२] रागे[३] कप्प[४] चरित्त[५] पडिसेवणा[६] नाणे[७]
तित्थे[८] लिंग[९] सरीरे[१०] खित्ते[११] काल[१२] गइ[१३] ठिइ[१४] संजम[१५] निगासे[१६] ॥ २६४ ॥
[१७]जोगुवओग[१८] कसाए[१९] लेसा[२०] परिणाम[२१] बंधणे[२२] वेए[२३] ।
कम्मोदीरण[२४] उवसं[२५]-पजहण[२६] सण्णा[२७] य आहारे ॥ २६५ ॥
भव[२८] आगरिसे[२९] [३०]कालंतरे[३१] य समुघाय[३२] खित्त[३३] फुसणा[३४] य ।
भावे[३५] परिमाणं[३६] खलु अप्पाबहुयं[३७] नियंठाणं ॥ २६६ ॥ ॥ संबोध प्रकरणम् ॥

## ३८ संख्या

१ **अभव्यजीवस्य अस्पृश्य भावाः (देवाधिकारः)**

जह अभवियजीवेहिं, न फासिया एवमाइया भावा ।
इंदत्तमनुत्तरसुर[१-२]-सिलायपुरिसनरनारयत्तं[३-४] च ॥ २९४ ॥
केवलिगणहरहत्थे[५], पव्वज्जा तित्थवच्छरं[६] दाणं ।
पवयणसुरीसुरत्तं[७], लोगंतियदेवसामित्तं[८] ॥ २९५ ॥
तायत्तीससुरत्तं[९], [१०]परमाहम्मियजुयलमणुयत्तं[११] ।

| क्रम | तत्त्वसंख्यामृतानि | ग्रन्थाः |
|---|---|---|
| | संभिन्नसोय[१२] तह पुव्व धराहारयपुलायत्तं[१३-१५] ॥ २९६ ॥<br>मइनाणाइसुलद्धी[१६], सुपत्तदाणं[१७] समाहिमरणत्तं[१८] ।<br>चारणदुयमहुसप्पिय[१९-२१] खीरासवाखीणठाणं[२२-२३] वा ॥ २९७ ॥<br>तित्थयरतित्थपडिमा[२४]-तणुपरिभोगाइकारणे वि पुणो ।<br>पुढवाइयभावमपि, अभव्वजीवेहिं नो पत्तं ॥ २९८ ॥<br>चउदसरयणत्तेणवि[२५], पत्तं न पुणो विमाणसामित्तं[२६] ।<br>सम्मत्तनाणसंजम-तवाइ भावा न भावदुगे[२७-२८] ॥ २९९ ॥<br>अणुभवजुत्ता[२९] भत्ती, जिणाण साहम्मियाण[३०] वच्छल्लं ।<br>न य साहेइ अभव्वो, संविग्गत्तं[३१] च तप्पक्खं ॥ ३०० ॥<br>जिणजणयजणणी[३२-३३] जाया[३४], जिणभिक्खादायगा[३५] जुगपहाणा[३६] ।<br>आयरियपयाइदसगं[३७], परमत्थगुणड्डमप्पत्तं ॥ ३०१ ॥<br>अणुबंध हेउ सरुवा, तत्थ अहिंसा[३८] तिहा जिणुद्दिट्ठा ।<br>दव्वेण य भावेण य, दुहावि तेसिं न संपत्ता ॥ ३०२ ॥ | ॥ संबोध प्रकरणम् ॥ |
| | **४० संख्या** | |
| १ | **जिनमंदिरस्य मध्यम आशातनाः (देवाधिकारः)**<br>मुत्त[१] पुरिसं[२] पाणं[३], पाणा[४] ऽसण[५] सयण[६] इत्थि[७] तंबोलं[८] ।<br>निट्ठीवणं[९] च जूयं[१०], [११]जूयाइपलोयणं विगहा[१२] ॥ २५२ ॥<br>पल्हत्थीकरणं[१३] पि हु, पायपसारण[१४] परोप्परविवाओ[१५] ।<br>परिहासो[१६] मच्छरिया[१७], सिंहासणमाइपरिभोगो[१८] ॥ २५३ ॥<br>केससरीरविभूसण[१९], छत्ता[२०] ऽसि[२१] किरीड[२२] चमरधरणं[२३] च ।<br>धरणं जुवइहिं[२४] सवियार हास[२५], खिड्डुप्पसंगा[२६] य ॥ २५४ ॥<br>अकयमुहकोस[२७] मलिणं-गवत्थ[२८] जिणपूयणापवित्तीए ।<br>मणसो अणेगयत्तं[२९], सचित्तदवियाण अविमुयणं[३०] ॥ २५५ ॥<br>अचित्तदविअविओसग्गो[३१] तहणेगसाडियत्तमवि[३२] ।<br>जिणदंसणे अणंजलि[३३], जिणंमि दिट्ठंमि य अपूया[३४] ॥ २५६ ॥<br>अहवा अणिट्ठकुसुमेहिं[३५] पूयणं तह अणायरपवित्ती[३६] ।<br>जीणपडिणीय[३७] अणिवारण, चेइयदव्वस्सुवेहणमो[३८] ॥ २५७ ॥<br>सइसामत्थि उवाणह[३९], पुव्वंचिय वंदणाइपढणं[४०] च ।<br>जीणभवणंमि ठियाणं, चालीसासायणा एआ ॥ २५८ ॥ | ॥ संबोध प्रकरणम् ॥ |
| | **४४ संख्या** | |
| १ | **चारित्री प्राणान् रक्षयति (गुरु अधिकारः)**<br>सन्नीणं दसपाणा, एगूणासण्णिचउतिदु एगिंदिए चउरो ।<br>चउयालीसं[४४] पाणा, रक्खंतो होइ चारित्ती ॥ ४४ ॥ | ॥ संबोध प्रकरणम् ॥ |

| क्रम | तत्त्वसंख्यामृतानि | ग्रन्थाः |
|---|---|---|
| | **४७ संख्या** | |
| १ | **मुनेः आहारगता दोषाः (गुरु अधिकार)**<br>सोलस उग्गमदोसा[१६], सोलस उप्पायणाइ[१६] जे दोसा ।<br>दस एसणाइ[१०] दोसा, गासे पण[५] मिलिय सगयाला ।। २६८ ।। | ।। संबोध प्रकरणम् ।। |
| | **५५ संख्या** | |
| १ | **नृत्य मंडलीव गच्छस्य दोषाः (गुरु अधिकारः)** | |

सीसोदराइफोडणभत्तिं[१] लोहहेउगिहिथुणणं[२] ।
जिणपडिमाकयविक्कय[३], उच्चाडणखुद्दकरणं[४] च ।। ५६ ।।
संनिहिमाहाकम्मं[५], जलफलकुसुमाइ[६] सव्वसच्चित्तं ।
निच्चं दुतिवारभोयण[७] विगइलवंगाइतंबोलं[८] ।। ५७ ।।
वत्थं[९] दुप्पडिलेहियमपमाणसन्नियं दुकूलाइं ।
सिज्जोवाणहवाहणआउहतंबाइपत्ताइं[१०] ।। ५८ ।।
पडिमारक्खणपूया[११], समहिमजिणथुणणसवणपमुहाइ[१२] ।
इहलोयतवकारावण[१३] लहुहत्थाइकरणमेवं[१४] ।। ५९ ।।
सिरतुंडे[१५] खुरमुंड, रयहरमुहपत्तिधारणं[१६] कज्जे ।
एगागित्तब्भमणं[१७], सच्छंदं चिट्ठियं[१८] गीयं ।। ६० ।।
चेइयमढाइवासं[१९], पूयारंभाइ[२०] निच्चवासित्तं[२१] ।
देवाइदव्वभोगं[२२], जिणहरसालाइकरणं[२३] च ।। ६१ ।।
न्हाणुव्वट्टणभूसं[२४], ववहारं[२५] गंधसंगहं[२९] कालं ।
गामकुलाइममत्तं[२७], थीनट्टं[२८] थीपसंगं[२९] च ।। ६२ ।।
नरयगइहेउजोइसनिमित्ततेगिच्छमंतजोगाइं[३०] ।
मिच्छत्तरायसेवं[३१], नीयाण[३२] वि पावसाहिज्जं ।। ६३ ।।
सुविहियसाहुपओसं[३३], तप्पासे धम्मकम्मपडिसेहं[३४] ।
सासणपभावणाए[३५], मच्छरलउडाइकलिकरणं ।। ६४ ।।
कुलनीइइड्डिभंग[३६]–प्पमुहाणेगप्पओससंदिसणं ।
सावाइभयदंसणमिमाइकज्जाइवट्टणयं[३७] ।। ६५ ।।
थीकरफासं[३८] बंभे[३९] संदेह, कलंतरेण[४०] धणदाणं ।
वट्टणं[४१] य सीसगहणे, नीयकुलस्साविं दव्वेणं ।। ६६ ।।
अविहिकयाणुट्ठाणे[४२], पभावणं दंसणं पवाहकए ।
अपवयणुत्ततवंमि[४३], परुवणुज्जवणविहिकरणं ।। ६७ ।।
मयकिच्चे[४४] जिणपूयापरुवणं मयधणाण[४५] जिणदाणे ।
गिहिपुरओ[४६] अंगाइपवयणकहणं धणट्ठाए ।। ६८ ।।
सव्वावज्जपवत्तण[४७], मुहुत्तदाणाइ सव्वलोयाणं ।
सालाइ[४८] गिहिघरे वा, खज्जगपागाइकरणाइ ।। ६९ ।।

| क्रम | तत्त्वसंख्यामृतानि | ग्रन्थाः |
|---|---|---|
| | जक्खाइगुत्तदेवयपूया,[४९] पूयावणाइ मिच्छत्तं । | |
| | सम्मत्ताइनिसेहो[10] तेसिं मुल्लेण[५१] वा दाणं ॥ ७० ॥ | |
| | नंदिबलिपीढकरणं,[५२] हीणायारण मयनियगुरुणं । | |
| | वक्खाणस्स[५३] य मज्झे, महिला गायंति अप्पगुणा ॥ ७१ ॥ | |
| | केवलथीणं पुरओ, वक्खाणं[५४] पुरिसअग्गओ अज्ञा[५५] । | |
| | कुव्वंति जत्थ मेरा, नडपेडकसंनिहा जाण ॥ ७२ ॥ | ॥ संबोध प्रकरणम् ॥ |
| | **५६ संख्या** | |
| १ | **वैक्रियशरीरधारीजीव भेदाः (गुरु अधिकारः)** | |
| | तह नरयभवणवणजोइ कप्पगेविज्जणुत्तरुप्पण्णा । | |
| | सत्तदसट्ठुयपणबारनवपण छप्पण्ण[५६] वेउव्वी ॥ ३९ ॥ | ॥ संबोध प्रकरणम् ॥ |
| | **६४ संख्या** | |
| १ | **बाह्यपरिग्रहः (श्रावक व्रत अधिकारः)** | |
| | धन्नाइ चउव्वीसं[२४], धणरयणाइं वि हुति[२४] चउवीसं । | |
| | दसहा[10] चउप्पयं, दुविहं[२] दुप्पयं कुप्पमेगं[१] ॥ ५१ ॥ | |
| | वत्थुथावररुवं[३] तिविहं एवं हवंति चउसट्ठी । | |
| | अहवा[१] गणिमं[२] धरिमं[३], मेयं तह[४] पारिछिज्जं च ॥ ५२ ॥ | ॥ संबोध प्रकरणम् ॥ |
| | **६७ संख्या** | |
| १ | **सम्यक्त्वस्य स्थानानि (सम्यक्त्व अधिकारः)** | |
| | चउसद्दहण[४] तिलिंग[३], दसविणय[10] तिसुद्धि[३] पंचगयदोसं[५] । | |
| | अट्ठपभावण[८] भूसण[५], लक्खण[५] पंचविहसंजुत्तं ॥ ५९ ॥ | |
| | छव्विहजयणा[६]-गार[६] छब्भावण[६] भावियं च छट्ठाणं[६] । | |
| | इय सत्तसट्ठि दंसणभेयविसुद्धं तु सम्मत्तं ॥ ६० ॥ | ॥ संबोध प्रकरणम् ॥ |
| | **७० संख्या** | |
| १ | **करणसित्तरी (श्लोक ८७५ टीका)** | |
| | पिंडविसोही[१५] समिई[५] भावण[२५] पडिमा[१२] उ इंदियनिरोहो[५] । | |
| | पडिलेहण[१] गुत्तीओ[३] अभिग्गहा[४] चेव करणं तु ॥ २ ॥ | ॥ हितोपदेशः ॥ |
| २ | **करणसित्तरी (गुरु अधिकारः)** | |
| | पिंडविसोही[१५] समिई[५], भावण[२५] पडिमा[१२] य इंदियनिरोहो[५] । | |
| | पडिलेहण[१] गुत्तीओ[३], अभिग्गहा चेव करणं तु ॥ २३[१] ॥ | ॥ संबोध प्रकरणम् ॥ |
| ३ | **चरणसित्तरी (गुरु अधिकारः)** | |
| | वय[५] समणधम्म[10] संजम[१७] वेयावच्चं[10] च बंभगुत्तीओ[९] । | |
| | नाणाइतियं[३] तव[१२] कोह निग्गहाइ[४] चरणमेयं ॥ २३० ॥ | ॥ संबोध प्रकरणम् ॥ |
| ४ | **चरणसित्तरी (श्लोक ४७५ टीका)** | |
| | वय[५]-समणधम्म[10]-संजम[१७]-वेयावच्चं[10] च बंभगुत्तीओ । | |
| | नाणाइतियं[३] तव[१२]-कोहनिग्गहाइ[४] चरणमेयम् ॥ १ ॥ | ॥ हितोपदेशः ॥ |

| क्रम | तत्त्वसंख्यामृतानि | ग्रन्थाः |
|---|---|---|

## ९५ संख्या

१ **विषयज्ञा गीतार्थाः (गुरु अधिकारः)**

तत्त्वं ज्ञानाङ्गधर्म्मेन्द्रियमद[६]विषयद्रव्यसम्भोगयोगाः[१-१०] ।
संज्ञादिग्संयमर्द्धि व्रत विह्वतिवचो भावनाश्चर्यलेश्या[११-२०] ॥
पर्याप्तिप्राण[२१-२२] योनिस्वरमरणसमुद्घातचर्यार्हदाद्याः[२३-२८] ।
दाना-वस्था-वधोऽर्थश्रुत-नयविनयाऽऽकार-गर्भ-क्षुदाद्याः[२९-३७] ॥ **३२३** ॥
वस्त्रस्त्रीशस्त्रमिथ्यामलतनयगुणध्यानषट्स्थानकामा[३८-४३]: ।
वैयावृत्त्योपसर्गास्तृण[२२-४६] चरणलिपिब्रह्मकर्माष्ट भाषाः[४७-५१] ॥
शय्यामानादिसामायिककरणनमस्कारकल्पौड्कलोकाः[५२-५९] ।
निर्ग्रन्थक्षेत्र-कल्पद्रुम-कण-गतयो[६०-६४] मुण्ड-भाव- प्रमादाः[६५-६७] ॥ **३२४** ॥
स्थाननुष्ठानमुद्रा-व्रत[६८-७१] जपविधयः[७२] सप्तभङ्गी[७३] प्रमाणम्[७४] ।
प्रायश्चित्त-प्रवृत्ति-प्रवचनपटुताऽऽवश्यकं[७५-७८] हेतुवर्गः[७९] ॥
प्रत्याख्यानौनुयोगाऽणिमपरमगुणा-मैत्री-निक्षेप-दीक्षाः[८०-८६] ।
धर्म्मः सम्यक्त्व-रत्नो-पनय-शम यम-ब्रह्म शिल्प प्रमेयाः[८७-९५] ॥ **३२५** ॥
इच्चाइणेगससमेयपरसमयरहस्सगुणनिहीभूया ।
सम्मत्तस्स पभावण पयडा भव्वाण कप्पदुमा ॥ **३२६** ॥ — ॥ संबोध प्रकरणम् ॥

## १०८ संख्या

१ **जीवस्य परिणामाः (गुरु अधिकारः)**

संकप्पाइतिएणं, मणमाईहिं तहेव करणेहिं ।
कोहाइचउक्केणं, परिणामठुत्तरसयं[१०८] च ॥ **४८** ॥ — ॥ संबोध प्रकरणम् ॥

## ११६ संख्या

१ **जीव भेदाः (गुरु अधिकारः)**

ते नरतिरिसंगहिया, हुंति हु अडवण्णसंखया[५८] सव्वे ।
पज्जत्तापज्जत्तेहिं सोलसुत्तरसयं[११६] तेहिं ॥ **४०** ॥ — ॥ संबोध प्रकरणम् ॥

## २४३ संख्या

१ **अहिंसाया भेदाः (गुरु अधिकारः)**

भू[१]जल[२]जलणा[३]निल[४]वण[५]बि[६] ति[७] चउ[८] पंचिदिएहिं[९] नव जीवा ।
मणवयणकायगुणिया[३], हवंति ते सत्तवीसंति[२७] ॥ **२४** ॥
एक्कासीइ[८१] य करण[१]-कारणाणुमईहिं[३] ताडिया होइ ।
सच्चिय तिकालगुणिया, दन्नि सया[२४३] हुंति तेयाला ॥ **२५** ॥ — ॥ संबोध प्रकरणम् ॥

२ **जिवहिंसाया भेदाः (श्रावक व्रत अधिकारः)**

भूजलजलणानिलवणबितिचउपंचिंदिएहिं नव जीवा[१] ।
मणवयणकायगुणिया, हवंति ते सत्तवीसत्ति[२७] ॥ **८** ॥
इक्कासीई[८१] ते करणकारणाणुमइताडिया होइ ।
तेच्चिय तिकालगुणिया, दुन्निसया[२४३] हुंति तेयाला ॥ **९** ॥ — ॥ संबोध प्रकरणम् ॥

| क्रम | तत्त्वसंख्यामृतानि | ग्रन्थाः |
|---|---|---|
| | **३३६ संख्या** | |
| १ | **मतिज्ञानस्य भेदाः**<br>भेया दुन्नि य चउरो अट्ठावीसा य अट्ठसट्ठसयं ।<br>तिन्निसया छत्तीसा[३३६] मइनाणे हुंति नायव्वा ॥ ८१ ॥ | ॥ हितोपदेशः ॥ |
| | **३६३ संख्या** | |
| १ | **पाखण्डिनः (श्लोक ३४३ टीका)**<br>अशीत्याधिकं शतं क्रियावादिनाम्[१८०], चतुरशीतिरक्रियावादिनाम्[८४], सप्तषष्टिरज्ञानिनाम्[६७], द्वात्रिंशद्वैनयिकानाम[३२]; एवं प्रकाराण्यमूनि त्रिषष्ट्यधिकानि त्रिण्यपि शतानि पाखण्डिनाम्[३६३]।<br>उक्तं च,<br>असियसयं किरियाणं अकिरियवाईण होइ चुलसीइ ।<br>अन्नाणि सत्तसट्ठी वेणइयाणं तु बत्तीसं ॥ ४/४/३४५ ॥ -इति स्थानाङ्गे । | ॥ हितोपदेशः ॥ |
| | **५८४ संख्या** | |
| १ | **जीव भेदाः (गुरु अधिकारः)**<br>सण्णिदुगहीणबत्तीससंगयं तं सयं तु[१४६] छायालं ।<br>गतं भव्वाभव्वदूर-भव्वआसण्णभव्वं च ॥ ४१ ॥<br>संसारनिवासीणं, जीवाण सयं इमं छचत्तालं ।<br>चउगुणियं पणसययं[५८४], चुलसीइ जुयं हविज्ञ सया ॥ ४२ ॥ | ॥ संबोध प्रकरणम् ॥ |

# स्तबक :- ३
# सुभाषितानि

| क्रम | सुभाषितानि | ग्रन्थाः |
|---|---|---|
| | **अ कार आदि** | |
| १ | अकर्म्माण एव वीतरागा इति । | ।।हित.१८१ टी.।। |
| २ | अकारणं चिरदिक्षितता, निरतिचारतैवेष्टसाधिकेति, सा य गाढमप्रमादिनो भवति । | ।।उप.मा.(सि) ४७८ टी.।। |
| ३ | अकारणं ज्ञातिसम्बन्ध: प्रीत्यप्रीत्यो-र्विनयस्यैव प्रायस्तन्निबन्धनत्वात् । | ।।हित.२२८ टी.।। |
| ४ | अकुलीनसंसर्गो हि कुलवनितानां मूलबीजमपवादपादपस्य । | ।।हित.२८७ टी.।। |
| ५ | अगण्यपुण्यानुबन्धित्वाद् धर्म्माचार्यार्थवादस्येति । | ।।हित.३०० टी.।। |
| ६ | अचर्यैव चर्या बोधिसत्वानाम्, लक्षवेधिनोऽवन्ध्यचेष्टा ह्येते । | ।।यो.श.२६ टी.।। |
| ७ | अचिन्तयचिन्तामणिकल्पं भावधर्मस्थानम् । | ।।यो.श.५० टी.।। |
| ८ | अज्ञश्चानुग्राह्यो गुरुजनस्येति । | ।।हित.४८ टी.।। |
| ९ | अतीन्द्रियफलेषु चाऽनुष्ठानेषु शास्त्रस्यैव प्रतीतिहेतुत्वात् । | ।।यो.बि.२३९ टी.।। |
| १० | अत्यन्तनिर्गुणस्य लिङ्गत्याग एव ज्यायानिति । | ।।उप.मा.(सि) ५२० टी.।। |
| ११ | अधर्म्मानुगतं हि प्रियमपि न प्रियम्, उत्तरत्रानर्थानुबन्धित्वात् । | ।।हित.१३ टी.।। |
| १२ | अननुगुणयोगे हि परस्परमरक्तचित्तयो-र्दम्पत्यो-र्विडम्बनैव गृहवास: । | ।।हित.२९१ टी.।। |
| १३ | अनाराधनायामेकान्तेन प्रवृत्तस्य न किञ्चिदिष्टमनिष्टं वा फलं मोक्षोन्मादादि । सदनुष्ठानं हि मोक्षफलमेव । | ।।पंच सूत्रं - च. सू. टी.।। |
| १४ | अनार्जवं हि मूलबीजमर्धम्मद्रुमस्य । | ।।हित.१४ टी.।। |
| १५ | अनार्हतमेतदेकान्ताश्रयणम् । | ।।पंच सूत्रं - प.सू. टी.।। |
| १६ | अनाविष्कृतशक्तयस्तरस्विनोऽपि नियतमभिभवनीया भवेयु: । | ।।हित. ३३० टी.।। |
| १७ | अनुपाय एवैष धर्मप्रतिपत्तौ परोपताप: । | ।।पंच सूत्रं - तृ.सू. टी.।। |
| १८ | अनेकस्वरुपाभ्युपगमे ह्यऽपुनबन्धकस्य किमप्यऽनुष्ठानं कस्यामप्यवस्थायामऽवतरतीति । | ।।यो.बि.२५१ टी.।। |
| १९ | अनेकान्तवादस्तत्त्ववाद:, सर्वकारणसामर्थ्योपादनात् । | ।।पंच सूत्रं - प.सू. टी.।। |
| २० | अन्यायोपात्तं हि पुष्कलमपि वित्तं सुक्षेत्रेषु घुणक्षतमिव बीजं न विशिष्टफलाय । | ।।हित.१५४ टी.।। |
| २१ | अपरित्यक्तपौरुषे तु पुंसि प्रायो दैवमपि न नि:शङ्कमुपढौकते । | ।।हित.३६८ टी.।। |
| २२ | अपरिपाचितमलस्रंसनकल्पं ह्यपाठं श्रवणम् । | ।।यो.श.५२ टी.।। |
| २३ | अपुनर्बन्धकप्रभृतिकत्वाद्धर्माधिकारिणाम् । | ।।यो.बिं.१७७ टी.।। |
| २४ | अप्रशान्तवृत्तावेवौत्सुक्यदोषावकाशात् । | ।।यो.बिं.२१४ टी.।। |
| २५ | अप्राज्ञे हि प्रयास: शिलायां जलजारोपणमिव । | ।।हित.१०३ टी.।। |
| २६ | अभिनिवेशस्य तत्त्वप्रतिप्रतिं प्रति शत्रुभूतत्वात्, युक्तेरपि वैतथ्येन प्रतिभासनात् । | ।।यो.श.८९ टी.।। |
| २७ | अभिनिवेशो हि मिथ्यात्वप्रकारस्तद्वतां च कुतस्तत्वार्थश्रद्धानम् । | ।।हित.३९७ टी.।। |
| २८ | अमन्त्रापमार्जनकल्पाफलं प्रत्यऽनागमा क्रिया । | ।।यो.श.७४ टी.।। |
| २९ | अयुक्तलोभसंक्षोभितचित्तवृत्तयो निर्व्विवेका: कुर्वन्तु नाम विविधोपायन्, फलसम्पत्तिस्तु लाभोदयायात्तैव । | ।।हित.१३ टी.।। |
| ३० | अयुक्त्या हि गता काकिण्यपि दुनोति; किं पुन: सर्वस्वम् । | ।।हित.३९८ टी.।। |
| ३१ | अरघट्टघटीनामिव प्राणिनां प्रायो नैकान्तिकी रिक्तता पूर्णता च । | ।।हित.२९५ टी.।। |
| ३२ | अर्थशून्यं हि वचनमुन्मत्तवचनान्नातिरिच्यते । स्वच्छन्दोल्लालितलोलरसस्य वदनस्य निरर्गलस्य च पुरगोपुरस्य किमन्तरम्? | ।।हित.१३ टी.।। |
| ३३ | अलङ्कृता विभूषिता हि गृहिण्यो गृहमेधिनां श्रियमेधन्ते । | ।।हित.२८४ टी.।। |

| क्रम | सुभाषितानि | ग्रन्थाः |
|---|---|---|
| ३४ | अविधिना हि विधीयमानं सत्कर्म्मापि मन्दाग्ने: परमान्नभोजनमिव प्रत्युतानर्थाय जायते । | ।।हित.१६५ टी.।। |
| ३५ | अश्रद्धाने हि नरि कृपापाथोधरै-र्गुरुभि-र्बद्धपि ज्ञानजलमभिवृष्टमूषरक्षेत्र इव कं गुणमुत्पादयति? | ।।हित.१०३ टी.।। |
| ३६ | असकृत् प्रवर्तितदानवर्ष: कदाचिदुपशान्तदानोपि महेभ इव नाभिभूयते नीचजनेन । | ।।हित.१३ टी.।। |
| ३७ | असंसक्तयोगाराधको भवति नि:सपत्न-श्रामण्यव्यापारकर्त्ता, सूत्रानुसारित्वात् । | ।।पंच सूत्रं - च.सू. टी.।। |
| ३८ | असाराणामपि बहूनां समुदय एव यतो जयवान् । | ।।हित.३०७ टी.।। |
| ३९ | अहिंसालक्षणाद् धर्म्मान्नान्य: प्रकृष्टतमो धर्म्म: । | ।।हित.५३ टी.।। |
| | **आ कार आदि** | |
| ४० | आगमपरतन्त्रतैव लोकाचरितनिरपेक्षा परलोकाङ्गम्, तस्यां सत्यां शक्त्यनुरूपं यदेवानुष्ठीयते तदेव निर्जराकारी । | ।।उप.मा.(सि) ५२४ टी.।। |
| ४१ | आत्मादिप्रत्ययविकलस्तदऽन्यानुष्ठानवानपि योगी नैकान्तिकीं सिद्धिमाराधयितुं समर्थ: स्यात् । | ।।यो.बिं.२३६ टी.।। |
| ४२ | आभिप्रायिकी योगिनां धर्मदेशना, उपेयसाधनत्वेन उपायस्य तत्त्वात्। | ।।यो.श.२६ टी.।। |
| ४३ | आशातनावर्जनपरिणामस्य सम्यक्त्वरूपत्वात् । | ।।उप.मा.(सि) ४०९ टी.।। |
| ४४ | आश्रवनिश्छिद्रत्वं यतेरुपदेश: । संवरच्छिद्रं हि गिरिशिखरात् पातालतलपात: । | ।।यो.श.३५ टी.।। |
| | **इ कार आदि** | |
| ४५ | इयं च भागवती सदाज्ञा सर्वैव अपुनर्बन्धकादिगम्या । आदिशब्दान्मार्गाभिमुखमार्गपतितादय: परिगृह्यन्ते । न संसाराभिनन्दिगम्या, तेषां ह्यतो विषयप्रतिभासमात्रं ज्ञानमुदेति न तद्धेयत्वादि-वेदकमिति । | ।।पंच सूत्रं - प्र.सू. टी.।। |
| | **उ कार आदि** | |
| ४६ | उत्तमपदस्थस्य तद्धर्माननुपालनमऽघोषणा विडम्बना, इति वृद्धा: । | ।।यो.श.३७ टी.।। |
| ४७ | उत्पत्तिमतां देहादीनामवश्यविनाशधर्मित्वात् । | ।।हित.२६२ टी.।। |
| ४८ | उत्पाद्य कृत्रिमान् दोषान् धनी सर्वत्र बाध्यते । | ।।हित.३१० टी.।। |
| ४९ | उदारहस्तन्यस्तानि हि वित्तान्यपरापरपात्रोपभोगेन मुच्यन्त एव पूर्वयातनात: । | ।।हित.२३७ टी.।। |
| ५० | उदासीनायां च गृहीण्यां सीदन्त्येव गृहकृत्यानि । | ।।हित.२८५ टी.।। |
| ५१ | उदिते तु पदार्थप्रकाशनपरे दर्शनभास्करे प्रगट एव मोक्षमार्ग: । | ।।हित.१८ टी.।। |
| ५२ | उदिते हि जीवाजीवादिज्ञानभानुमति विलीयत एव मिथ्यात्त्वतम: । | ।।हित.२५९ टी.।। |
| ५३ | उपकृते ह्युपकरणं स्वस्य ऋणमोचनमेव, न पुन: सत्पुरुषता । | ।।हित.२६३ टी.।। |
| ५४ | उपायश्चोपेयसाधको नियमेन कारणं कार्याऽव्यभिचारीत्यर्थ: । | ।।पंच सूत्रं - च.सू. टी.।। |
| | **ए कार आदि** | |
| ५५ | एकान्ताऽनभिष्वङ्गानुष्ठानं क्रियमाणं श्रेय: । "तत्त्वाभिष्वङ्गस्यापि तत्त्वतोऽतत्त्वत्वाद् वस्त्रादि-शुद्धिविधावऽञ्जनकल्पत्वाद् धर्मरागादपि मुनिरऽमुनि:।" इत्यन्यैरऽप्यऽभिधानात् । | ।।यो.श. १८ टी.।। |
| ५६ | एतल्लिङ्ग एव बोध: परलोकपक्षपातो भगवद्बहुमानश्च भावनीयमेतत् । | ।।यो.श.७६ टी.।। |
| ५७ | एषाज्ञेह भगवत उभयनयगर्भा । | ।।पंच सूत्रं - प.सू. टी.।। |
| | **औ कार आदि** | |
| ५८ | औचित्याचरणमेव गुणवतामपि प्रसिद्धिनिबन्धनमिति । | ।।हित.२७१ टी.।। |

| क्रम | सुभाषितानि | ग्रन्थाः |
|---|---|---|
| | **क कार आदि** | |
| ५९ | कदभिनिवेशविसंस्थुले हि मनसि कुत: सरलाशयत्व – विनीतत्वादिसाध्यो गुणगण: । | ।।हित.३९६ टी.।। |
| ६० | कदर्या हि भृत्यभर्तव्यात्मवञ्चनेनापि धनमेव सञ्चिनोति, न धर्म्मम् । | ।।हित.१३ टी.।। |
| ६१ | कर्मक्षयसाहाय्यकारित्वाद् रोगाणाम्, तदधिसहनस्य परिषहजयरूपत्वात् । | ।।उप.मा.(सि) ३४५ टी.।। |
| ६२ | कर्म्मपारतन्त्र्येण हि प्राणिनामेहिरेयाहिरा: क्रिया: सम्पद्येरन् । | ।।हित.२३३ टी.।। |
| ६३ | कषायवृद्धौ हि दु:खोत्कर्षवृद्धि:, कषायक्षये च सुखोत्कर्षोपनिषदिति । | ।।हित.५१९ टी.।। |
| ६४ | कारणस्यापि कथंचित्कार्यत्वादिति । | ।।यो.बि.३६८ टी.।। |
| ६५ | कार्यनिष्पतौ सर्वत्र कारणस्याकारणीभूततया रुढत्वात् । | ।।यो.बि.३३२ टी.।। |
| ६६ | कुदृष्टं कुश्रुतं कुज्ञातं कुत्स्यमित्यादि सन्तो न भाषन्ते प्रायेण क्वचित्,किन्तु निश्चितं (असंदिग्धं) सारवच्चैव (नापार्थकम्), किन्तु सत्त्वार्थकृत् (परार्थकरणशीलं) सदा भाषन्ते । | ।।यो.श.१४२ टी.।। |
| ६७ | कूटाभिमानरूपत्वादात्मोत्कर्षस्य । विनयस्य च मार्दवरूपत्वात् । | ।।हित.३६२ टी.।। |
| ६८ | कृतघ्नादन्यो जगति न जघन्य: । कृतज्ञाच्च नाऽपरोऽप्युत्तम: । | ।।हित.३८३ टी.।। |
| ६९ | किल वैषयिकसुखार्थिनापि सत्त्वेन धर्म एव यत्न: कार्यस्तस्मिन् सति तस्य प्रासङ्गिकत्वात् । न पुनस्तत् परमार्थत: सुखम्, विपर्यासाद् दु:खेऽपि सुखबुद्धिप्रवृत्ते – र्विपाकदारुणत्वाच्च । | ।।उप.मा.(सि) २८४ टी.।। |
| | **ग कार आदि** | |
| ७० | गुणप्रकर्षविषयस्य बहुमानस्यैव फलदायकत्वात् । | ।।यो.बि.३०४ टी.।। |
| ७१ | गुणवद्गुरुयोगस्यैव गुणश्रेणिवृद्धिहेतुत्वात् । | ।।उप.मा.(सि) ४१२ टी.।। |
| ७२ | गुणशून्यस्य हि गर्जितं शरद्गर्जितमिव मुधैव । | ।।हित.३६३ टी.।। |
| ७३ | गुणाधिकस्य शरण्यत्वात्, गुणाधिकत्वेनैव ततो रक्षोपपत्ते:, रक्षा चेह तत्तत्स्वभावतया एवाभिध्यानत: क्लिष्टकर्मविगमेन शान्तिरिति । | ।।यो.श.५० टी.।। |
| ७४ | गुरुकर्मणां निमित्तशतैरप्यबोधदर्शनात् । | ।।उप.मा.(सि) २७ टी.।। |
| ७५ | गुरुजनापह्नवनं हि महतेऽनर्थाय, दिवाकीर्तिदत्तगगनगमनविद्याऽपलापकदकशूकरवत् । | ।।हित.१०५ टी.।। |
| ७६ | गुरुदेवधर्म्मकार्येषु पुन: सविशेषमेकचित्तैरेव भाव्यम् । | ।।हित.२९७ टी.।। |
| ७७ | गुरुबहुमानव्यतिरेकेण क्रियाप्यऽक्रिया प्रत्युपेक्षणादिरुपा । | ।।पंच सूत्रं – च.सू. टी.।। |
| ७८ | गुर्वायत्तत्वादागमानुयोगस्येति । | ।।हित.१४९ टी.।। |
| | **च कार आदि** | |
| ७९ | चरणोपबृंहितसम्यग्दर्शनस्याणीयसोपि विशिष्टफलहेतुत्वादिति । | ।।उप.मा.(सि) ८९ टी.।। |
| ८० | चारित्री देवतापरिगृहीतो भवति, तस्योचितमऽन्यदऽपि देवता कथयत्येव । | ।।यो.श.९७ टी.।। |
| ८१ | चित्तानुरुपफलत्वात् सर्वव्यापाराणाम् । | ।।यो.बि. २०३ टी.।। |
| | **ज कार आदि** | |
| ८२ | जनवाल्लभ्यं तु सम्यक्त्वतरो – मूलबीजम् । | ।।हित.३४९ टी.।। |
| ८३ | जनानुरागप्रभवा हि सम्पद: । | ।।हित.३६६ टी.।। |
| ८४ | जल्लेसे मरइ जओ, तल्लेसेसुं तु उववाओ । | ।।यो.श.९८ टी.।। |
| | **त कार आदि** | |
| ८५ | त एवात्र सचेतना ये अनुपकृता: परमुपकुर्वन्ति । | ।।हित.२६३ टी.।। |

| क्रम | सुभाषितानि | ग्रन्थाः |
|---|---|---|
| ८६ | तत्तद्व्यापारोपार्जितकर्मणः प्रेत्यफलमऽदत्वाऽपि निवृत्त्यभावादिति । | ।।यो.बिं.३२३ टी.।। |
| ८७ | तत्त्वज्ञानपूर्विकत्वान् मुक्तेः, न चास्य योगं मुक्त्वा अपर उपायः । | ।।यो.श.१ टी.।। |
| ८८ | तत्त्वफलं सानुबन्धमत्र प्रधानं बुधानां परमार्थतः । | ।।पंच सूत्रं - तृ.सू. टी.।। |
| ८९ | तत्त्वसंवेदानुगतमनुष्ठानमुत्तरोत्तरदोषविगमावहमेव भवति न तु कदाचनाप्यन्यथारुपमिति । | ।।यो.बि.२१९ टी.।। |
| ९० | तमांसीव सवितारि न प्रभवन्ति दुर्ज्जनवचांसि दातारि । | ।।हित.१३ टी.।। |

## द कार आदि

| | | |
|---|---|---|
| ९१ | दर्शनसाराणि हि प्रायः प्रेमाणि । | ।।हित.२८५ टी.।। |
| ९२ | दानशून्यो हि गुणवानपि न द्योतते । | ।।हित.४२ टी.।। |
| ९३ | दानाङ्कुशेन वशीकरोत्युदारः क्षणेन व्यालानिव क्षोणिपालान् । | ।।हित.१३ टी.।। |
| ९४ | दारिद्दसमो य परिभवो नत्थि । | ।।हित.३६७ टी.।। |
| ९५ | दास्यतुल्यं हि संसारित्वं कर्मपरतन्त्रत्वात्, प्रभुत्वसमा मुक्तता स्वतन्त्रत्वात् सा च हस्ततलप्राप्ता सद्धर्मानुष्ठायिनामित्याकूतम् । | ।।उप.मा.(सि) २८७ टी.।। |
| ९६ | 'दिव्वो वि ताण संकइ, जाणं तेओ परिप्फुरइ' त्ति श्रुतेः । | ।।हित.३६८ टी.।। |
| ९७ | दीना हि वृत्ति-र्व्यक्तीकृता नियतमवकेशिन्येव व्यसनोपनिपातप्रतिकारे, पौरुषोष्मायितं तु न तथा । | ।।हित.१३ टी.।। |
| ९८ | दीर्घभवभ्रमणहेतुत्वाच्चैत्यवित्तोपभोगस्य । | ।।हित.३५२ टी.।। |
| ९९ | दुराराधो हि तीक्ष्णप्रकृतित्वाद् विरक्तपरिच्छदः क्रमेण भवत्यसहायः । | ।।हित.१३ टी.।। |
| १०० | दुर्ल्लभा हि दुर्भिक्षे दातारो धाराधाराश्चेति ।। | ।।हित.७५ टी.।। |
| १०१ | दृष्टे हि दूरादपि दातरि प्रावृषेण्यपर्जन्य इव समुज्जीवति जनता । | ।।हित.१३ टी.।। |
| १०२ | देशकालान्तरितोऽपि दाता पुरः स्फुरन्निव प्रतिभात्यविनश्वरेण यशःशरीरेण । | ।।हित.१३ टी.।। |
| १०३ | देशस्य कालस्य तथा नृपस्य लोकस्य धर्म्मस्य विरुद्धं गुरुपदेशात् सुधियस्त्यजन्तस्त्यजन्ति सर्वव्यसनानि दूरम् । | ।।हित.३६० टी.।। |
| १०४ | देहस्य शोधनं रसशोषणेन धातूनामपचयः, स च तपसैव भवति । | |
| १०५ | उपचितेषु हि देहधातुषु प्रायः प्रादुर्भवन्ति मान्मथा विकाराः । | ।।हित.१८६ टी.।। |

## ध कार आदि

| | | |
|---|---|---|
| १०६ | धर्म एव सुगतिसुखहेतुत्वाद् धनम् । | ।।उप.मा.(सि) २६० टी.।। |
| १०७ | धर्माधिकारिणोऽपि प्राणिनो गर्भाद्यवस्थास्वप्युत्तरकालाभिव्यज्यमानगुणसंदोहबीजभाजो वर्तन्ते । | ।।यो.बि.२४५ टी.।। |
| १०८ | धर्माराधनमेव हितं सर्वसत्त्वानामिति । | ।।पंच सूत्रं - तृ.सू. टी.।। |
| १०९ | धर्म्माधिष्ठितमनसो हि प्रायः कृपाकोमलमतय एव भवन्ति । | ।।हित.३५५ टी.।। |
| ११० | धर्म्माविनाभूतत्वाच्छर्म्मणः । | ।।हित.३२१ टी.।। |
| १११ | धृतिः श्रद्धा सुखा विविदिषा विज्ञप्तिरिति धर्मयोनयः । | ।।यो.श. ३७ टी.।। |
| ११२ | ध्यानजं तात्विकं सुखम्, अपरायत्तत्त्वात् कर्मवियोगमात्रजत्वादिति। | ।।यो.श.१७३ टी.।। |

## न कार आदि

| | | |
|---|---|---|
| ११३ | न केवलं यो महतां विभाषते, श्रुणोति तस्मादपि यः स पापभाष्येव । | ।।हित.३०० टी.।। |

| क्रम | सुभाषितानि | ग्रन्थाः |
|---|---|---|
| ११४ | न खलु साधु-साध्वी-श्रावक-श्राविकारूपमुद्राचतुष्टयस्वीकारमन्तरेणापरोऽपि संसारोत्तारप्रकार इति । | ।।हित.४ टी.।। |
| ११५ | न खलु विनयादपरापि परपुरप्रवेशविद्या, तेन च सौमनस्यभाजो व्यञ्जयन्त्येव सर्वमन्तस्तत्त्वं गुर्वादिः । | ।।हित.२२७ टी.।। |
| ११६ | न खलु धर्म्मपोतमन्तरेणान्योऽपि भवाम्भःपतेः समुत्तरणोपायः । | ।।हित.३५८ टी.।। |
| ११७ | न खलु मरणादधिकं किमपि शत्रुरपि कर्तुमलम् । | ।।हित.३६९ टी.।। |
| ११८ | न खल्वऽकुशलारम्भतो हितम् । | ।।पंच सूत्रं - तृ.सू. टी.।। |
| ११९ | न खल्वाऽऽराधनातोऽन्यः सिद्धिपथ इति भावनीयम् । | ।।पंच सूत्रं - तृ.सू. टी.।। |
| १२० | न चाऽर्हद्धर्म्मसंयोजनमन्तरेणात्यन्तदुःप्रतिकारेषु पितृष्वन्योऽपि उपकृतिप्रकारः । | ।।हित.२७३ टी.।। |
| १२१ | न चोत्तमाङ्गनमनादपरोऽपि कायिकविनयप्रतिपत्तेः कोऽपि प्रकारः । | ।।हित.१ टी.।। |
| १२२ | न चाऽनिमित्तं कार्यमिति । | ।।पंच सूत्रं - प.सू. टी.।। |
| १२३ | न ज्ञस्तदाऽऽरभते, यद्विनाशयति । | ।।पंच सूत्रं - च.सू. टी.।। |
| १२४ | न पुनः कश्चिदत्र (संसारे) परमार्थो, वैषयिकसुखस्य दुःखरूपतया पामाकण्डूयनकल्पत्वान्म-हारतिविनोदद्वारेण विपर्यासात् तत्राविवेकीनां सुखबुद्धिप्रवृत्तेरिति । | ।।उप.मा.(सि) ४५१ टी.।। |
| १२५ | न मौनीन्द्रवचनपरिणतेरऽन्यत् शुद्धिकारणमिति । | ।।यो.श.१६ टी.।। |
| १२६ | न हि यथार्थफलभाजः अविसंवादिरुपत्वाल्लोक उपप्लवरुपतां लभन्ते,किं तु सत्यरुपतामेवेति ।। | ।।यो.बिं. ४२ टी.।। |
| १२७ | न हि सम्यग्ज्ञानाद्यभावे दूरं संसारविरक्तोऽपि यथाशास्त्रमेव प्रवृत्तिमऽवलम्बितुं क्षमः, किं तु घुणाक्षरवृत्त्यैव कदाचित्किंचिदेव । | ।।यो.बिं.२१३ टी.।। |
| १२८ | न हि सुगुरोरऽविधिरिति विधिसिद्धावऽपि विधिग्रहणं प्राधान्यख्यापनार्थमऽ-दुष्टम् । | ।।यो.श.४२ टी.।। |
| १२९ | न हि मुक्तिप्राप्तेरनासन्नः शास्त्रभक्तिमान् । | ।।यो.बिं.२३० टी.।। |
| १३० | न हि कारणवैचित्र्यमन्तरेण कार्यवैचित्र्यं लोकशास्त्रयोः क्वचित्केनापि प्रतिपन्नमस्ति । | ।।यो.बिं.२९१ टी.।। |
| १३१ | न हि स्वभावशून्यत्वे वन्ध्यासूतादीनामिव काचिदाऽऽत्मवादिपरिणतिः कस्यचिदस्तीति । | ।।यो.बिं.४१३ टी.।। |
| १३२ | न ह्यऽचित्रात्करणाच्चित्रकार्यप्रसूतिरिति । | ।।यो.बिं.४८६ टी.।। |
| १३३ | न ह्यऽपटवोऽतिचारदोषज्ञाः । | ।।यो.श.४ टी.।। |
| १३४ | न ह्यऽमहापुरुषा योगिनो भवन्ति । योगस्य भावैश्वर्यादेरऽमहापुरुषाभावतोऽस्य गुरुतरत्वोपपत्तेः । | ।।यो.श.४१ टी. ।। |
| १३५ | नाज्ञाते श्रद्धा, अश्राद्धस्य वाऽनुष्ठानमिति । यदि जानात्युत्पन्नरुचिस्ततो दोषान्निवर्तते । | ।।यो.श.२ टी.।। |
| १३६ | नाज्ञाविराधनतोऽन्योऽनर्थः । अर्थवत्तदाराधना इति । | ।।पंच सूत्रं - तृ.सू. टी.।। |
| १३७ | निरन्तरमाऽऽर्त्तरौद्रध्यानानुबन्धित्वात् खरकर्म्माणाम् । | ।।हित.३५५ टी.।। |
| १३८ | निरुपक्रमकर्मणः पापाशयकरस्यावश्यमेव वेदनीयभावरुपात् । | ।।यो.बिं.३७५ टी.।। |
| १३९ | निर्गुणस्य लिङ्गं धारयतो जनमिथ्यात्वोत्पादहेतुत्वेन गाढतरानन्तसंसारावाप्तेस्तत्त्यागः श्रेयानिति । | ।।उप.मा.(सि) ५१० टी.।। |
| १४० | निश्चयनयः पुरुषकारप्रवृत्तौ तमेव कार्यहेतुतया प्रतिपद्यते न पुनः सदपि दैवं, दैवप्रवृत्तौ च दैवमेव न तु सन्तमपि पुरुषकारं, अन्यथाऽन्योन्यसापेक्षत्वेनानयोरसामर्थ्यं स्यात्, ''सापेक्षमसमर्थं'' इति वचनात् । तस्मिंश्च सत्यर्थक्रियाकारित्वविरहलक्षणमवस्तुत्वं बलादाढौकेत । तस्माद्यद्यदा प्रधानभावेन व्याप्रियते तदेव तदा कार्यहेतुरिति । व्यवहारनयस्तु पर्यायेण प्रतिपन्नप्रधानोपसर्जन-भावद्वयमप्येतत्तत्कार्यकरणक्षमं संपद्यत इति प्रतिजानीते । | ।।यो.बिं.३२० टी.।। |
| १४१ | निश्चयसारत्वाद् योगस्य । | ।।यो.श.३ टी.।। |
| १४२ | नैसर्गिकी हि प्रायोऽभिजातानां विनयप्रवृत्तिः । | ।।हित.२२६ टी.।। |
| १४३ | नाऽकामी मण्डनप्रियः । | ।।हित.४५६ टी.।। |

| क्रम | सुभाषितानि | ग्रन्था: |
|---|---|---|
| १४४ | नाऽविपर्यस्तोऽनुपाये प्रवर्तते । इयमेवाऽविपर्यस्तस्याऽविपर्यस्तता यदुतोपाये प्रवृत्तिरन्यथा तस्मिन्नेव विपर्यय: । | ।।पंच सूत्रं - च.सू. टी.।। |
| | **प कार आदि** | |
| १४५ | परचेतोवृत्तीनां दुरन्वयत्वात् । | ।।उप.मा.(सि) २२ टी.।। |
| १४६ | परमेष्ठिपदमात्रानुसारिणऽपि श्रावकशब्दवाच्या: । पूर्वोक्तव्रतप्रतिपत्तिपरास्तु सुश्रावका: इति विशेष: । | ।।हित.४४४ टी.।। |
| १४७ | परिशुद्धचित्तरत्नं च सर्वत्रानाशंसया । | ।।यो.श.९६ टी.।। |
| १४८ | परिशुद्धवचनपूर्वकत्वाद् वस्तुतत्त्वनिश्चयस्य । न हीहाऽनिश्चितव्यवहारतत्त्वा व्यवहारिणोऽपि किंचित्फलमऽवाप्नुवन्ति, किं त्वऽनर्थमेवेति । | ।।यो.बिं.२६ टी. |
| १४९ | परिशुद्धोहापोहयोगस्य सम्यगनुष्ठानावन्ध्यकारणत्वात् । | ।।यो.बिं.२०८ टी.।। |
| १५० | पुरैव प्रगुणितदानयानपात्र: कदाचित् पतितोऽपि दैवादाऽऽपगापतौ निस्तारयत्याऽऽत्मानम् । | ।।हित.१३ टी.।। |
| १५१ | परोपकृतिमन्थरमनसामपरोपकारिणां सर्वथैव मनुष्याधमत्वम् । | ।।हित.२३४ टी.।। |
| १५२ | पापोपायरूपत्वादाश्रवप्रवृत्ते: । | ।।हित.३५२ टी.।। |
| १५३ | पिशुनधर्म्मत्वात् परदोषोद्घोषणस्य । | ।।हित.२९६ टी.।। |
| १५४ | पीडाप्रवृत्तेपि परे न पीडा कर्तव्येति । | ।।उप.मा.(सि) ४६२ टी.।। |
| १५५ | पुण्यप्रतिबन्धहेतुत्वाद् धर्म्माचार्यावज्ञाया: । | ।।हित.३०० टी.।। |
| १५६ | पूज्याश्च परमार्थत:सकलप्रणयिजनमन: सङ्कल्पतरव: श्रीमन्तो देव-गुरव एव । | ।।हित.१ टी.।। |
| १५७ | प्रकृतिसुकुमारत्वात् स्मरव्यापारस्य । | ।।हित.२१८ टी.।। |
| १५८ | प्रकृत्यैव हि प्राणिनां दु:खभीरुत्वात् सुखप्रियत्वाच्च । | ।।हित.५९ टी.।। |
| १५९ | प्रतिपन्नतत्त्वानां गुणाधिकविषयैव प्रवृत्तिर्न्याय्या । | ।।पंच सूत्रं - प्र.सू. टी.।। |
| १६० | प्रतिपन्नसत्यव्रतस्य हि परपीडोपपादकं वचनमसत्यमेव । | ।।हित.४१७ टी.।। |
| १६१ | प्रथमोभ्दव एवानिगृह्यमाणा रोगा: कालेनाचिकित्स्यतां प्रयान्ति । | ।।हित.५१५ टी.।। |
| १६२ | प्रयुक्तो हि विधिवद् विनय: शनै: शनै-र्धुनोति कर्मबन्धनिबन्धनान् सम्परायान् । | ।।हित.२२५ टी.।। |
| १६३ | प्रसन्नाश्च नृदेवा देवा इव किं नाभीष्टं सङ्घटयेयु: । | ।।हित.३३१ टी.।। |
| १६४ | प्रायशो भावाद् भावप्रसूते: । | ।।यो.श.२९ टी.।। |
| १६५ | प्रियप्रणयवचनं हि सञ्जीवनं समग्रापरापरप्रेमप्रकाराणां प्रस्तावे च प्रयुक्तं दानादिभ्योपि गौरवमारोपयति । | ।।हित.२८३ टी.।। |
| १६६ | प्रोद्भूतं हि मारविकारं यो मुकुलयितुमीष्टे स एव तत्त्वतो विद्वानिति भाव: । | ।।हित.१७८ टी.।। |
| | **फ कार आदि** | |
| १६७ | फलप्रधाना: समारम्भा इति । | ।।यो.श.९८ टी.।। |
| | **ब कार आदि** | |
| १६८ | बहुदृश्वानो हि पितृप्रभृतय: सम्यगाराधिता: प्रकाशयन्त्येव कार्यरहस्यानि । | ।।हित.२७४ टी.।। |
| १६९ | बहुस्वामिकं च वृन्दमवसीदत्येव । | ।।हित.३०० टी.।। |
| १७० | बाह्यदोषाभावेऽपि तत्त्वज्ञानविकलस्य पुंसोऽत एव कुराजसदृशस्य न परां गुणवृद्धिं प्राप्तुमुत्सहते, अज्ञानदोषोपघातादेव । | ।।यो.बिं.२१८ टी.।। |
| | **भ कार आदि** | |
| १७१ | भवोच्छित्तिनिमित्तत्वाद् दानादिधर्माराधनस्य । | ।।हित.२१२ टी.।। |
| १७२ | भावाभिग्रहस्य विशिष्टक्षयोपशमभावरुपस्याभिन्नग्रन्थेरऽसम्भव: । | ।।यो.बि. २७ टी.।। |
| १७३ | भाविन इष्टादे: सूचकानि निमित्तानि । | ।।यो.श.४३ टी.।। |

| क्रम | सुभाषितानि | ग्रन्थाः |
|---|---|---|
| | **म कार आदि** | |
| १७४ | मन:परिणामायत्तत्वात् कर्मबन्धस्य । | ।।हित.४७० टी.।। |
| १७५ | मनसो वीतरागत्वमेव मनोभवाभिभवमूलबीजं, न पुन-र्दर्शनमुद्राङ्गीकार इति भाव: । | ।।हित.१८० टी.।। |
| १७६ | मलिनै - र्हि कर्मभिरमलमपि कुलं कलयति कलङ्कपङ्किलताम् । | ।।हित.१२ टी.।। |
| १७७ | महालाभत्वात् ज्ञानदानस्य । | ।।हित.१०४ टी.।। |
| १७८ | मायावान् हि सकृद् दृष्टव्यलीकोप्याजन्म व्रजत्यविश्वासभाजनत्वम् । | ।।हित.१४ टी.।। |
| १७९ | मार्गानुसार्याऽऽज्ञाविशुद्धानुष्ठानस्य सदऽनुबन्धत्वात् । (इदमऽपि कथम् ? ) औचित्यप्रतिपत्तिपुरस्सरया सदाज्ञाराधनया तद्वृद्धि (सज्ज्ञानादीनाम्)-भावात् । | ।।यो.श.६ टी.।। |
| १८० | मिथ: कषायोदीरणं च निषिद्धमेव पूर्वर्षिभि: । | ।।हित.३७९ टी.।। |
| १८१ | मुनीनामिव कुलवनितानामपि महते दोषाय दोषाप्रचार: । | ।।हित.२८५ टी.।। |
| | **य कार आदि** | |
| १८२ | यथा सुवर्णघटो भिद्यमानोऽपि न सुवर्णानुबन्धं मुंचति, एवं शुभमऽनुष्ठानं तथाविधकषायोदयाद्भग्नमपि शुद्धफलमेवेति । | ।।यो.बिं.३५१ टी.।। |
| १८३ | यथा करुणया क्रियमाणया शत्रुणामपि क्लिष्टपरिणामलक्षणोऽपराधो निवर्तते चण्डकौशिकसर्पस्येव भगवति सा सर्वपापानामकरणनिमित्तमिति । | ।।यो.बिं.४१८ टी.।। |
| १८४ | यथा वाणिजक आय-व्ययतुलनया बहुलाभे प्रवर्तते तथा मुनिरपि प्रवर्तेतेत्यर्थः, केवलं प्रवर्तमानेन रागद्वेषपरिहारेण सम्यगात्मा रञ्जनीयः, न शाठ्याद् दृष्टालम्बनं विधेयम् । | ।।उप.मा.(सि) ३९१ टी.।। |
| १८५ | यथाशक्ति भगवदाज्ञाकरणात् तत्कर्तु: (मुने:) गौतमादेरिव यतित्वसिद्धे इति । | ।।उप.मा.(सि) ३८३ टी.।। |
| १८६ | यदुत्पत्तिमत्तदनित्यम् । | ।।यो.स.१९५ टी.।। |
| १८७ | यद्यत्कार्यं तत्तत्कारणं विना न स्यात्, यथा घटः। कार्यं च फलविशेषः । | ।।यो.बिं.३०७ टी.।। |
| १८८ | यद्यपि दैवादुत्तममैत्री नार्थं सम्पादयेत्, तथौप्यनर्थपरिहाराय जायत एवेति । | ।।हित.२९० टी.।। |
| १८९ | यस्य भागवती सदाज्ञा प्रिया तस्य नियमत: संवेग इति । | ।।पंच सूत्रं - प्र.सू. टी.।। |
| १९० | यादृशं तद्गोक्ता स्त्रीरत्नगोचरं गौरवमवलम्बते, ततोऽनन्तगुणमसौ सम्यग्दृष्टिर्गुरुदेवादिपूजाविषयं बहुमानमाऽऽतिष्ठत इति । | ।।यो.बिं.२६० टी.।। |
| १९१ | युक्तियुक्ताऽर्थाभ्युपगमे पुन-र्गुण एव । | ।।यो.बिं.२९७ टी.।। |
| १९२ | यो योगत्रयं सम्यग् नियन्त्रयति तेन सर्वोप्याऽऽगमाथाऽनुष्ठितो भवतीति । | ।।उप.मा.(सि) ४८२ टी.।। |
| १९३ | योगवञ्चनायां हि सर्वपुरुषार्थवञ्चना नियमात्संपद्यते । | ।।यो.बिं.४ टी.।। |
| | **रा कार आदि** | |
| १९४ | राजद्वारे श्मशाने च यस्तिष्ठति स बान्धव: । | ।।हित.२९५ टी.।। |
| १९५ | राजविरुद्धकारिणां हि कुत: परत्र हितेन धर्मेण इहलोकोपयोगिभिश्च द्रव्यादिभि: सह सम्बन्ध इति । | ।।हित.३३८ टी.।। |
| १९६ | राज्ञा राजवर्गेण च सममर्थसम्बन्ध: सर्वथा त्याज्य एवेति । | ।।हित.३१० टी.।। |
| | **ल कार आदि** | |
| १९७ | लब्धप्रसरा हि कुशीलकौलादयो विविधशास्त्रपरिमलितमनसं पुमांसमपि सत्पथात् प्रच्यावयन्ति । | ।।हित.२८५ टी.।। |
| १९८ | लब्धसम्यक्त्वस्य प्राणिनो मिथ्यादृष्टित्वेऽपि न सामान्यमिथ्यादृष्टेरिव बन्धः, किं तु कश्चिदत्यन्तन्यूनस्तद्विशेष एवेति । | ।।यो.बिं.२६७ टी.।। |
| १९९ | लोकोत्तराभिरामगुणग्राममन्तरेण नाभिमुखयितुं शक्यो भिन्नभिन्नरूचि-र्जन: । | ।।हित.३६६ टी.।। |
| २०० | लोभमूलानि पापानि । | ।।हित.३५४ टी.।। |
| | **व कार आदि** | |
| २०१ | वर्षाकल्पादि गुरोश्च सम्बन्धि सर्वं वन्द्यमेव भवति न भोग्यम् । | ।।उप.मा.(सि) ३७३ टी.।। |
| २०२ | विनयपरिमलविकलो हि पुमान् सर्वत्र दुर्भग एव, किं पुन-र्गुरुकुले । | ।।हित.१०३ टी.।। |

| क्रम | सुभाषितानि | ग्रन्थाः |
|---|---|---|
| २०३ | विनयाभिमानयो - स्तेजस्तिमिरयोरिवैकत्रानवस्थानात् । | ।।हित.३६५ टी.।। |
| २०४ | विना हि कर्म्मनिर्मूलनं न खलु विमलकेवललाभस्तदन्तरेण च कथं यथावस्थितपदार्थप्रथनम् ? | ।।हित.३ टी.।। |
| २०५ | विना हि दयां निष्फलं सकलमेवान्यद् धर्मानुष्ठानम् । | ।।हित.४५ टी.।। |
| २०६ | विना हि श्रद्धानं सहस्रशः परिशीलितसूत्रार्था अपि पर्यटन्त्येव भविनो भवकान्तारे । | ।।हित.९९ टी.।। |
| २०७ | विना हि सम्यक्त्वं न हि जिनप्रवचनप्रभावनाङ्गभूतेषु जिनभवननिर्म्माणादिषु प्रवृत्तिसम्भवः । | ।।हित.१५४ टी.।। |
| २०८ | विना हि जिनवचनामृतपानं कुतः कदभिनिवेशोपशमः । | ।।हित.४०१ टी.।। |
| २०९ | वियोगवांश्च योगः । | ।।पंच सूत्रं - प.सू. टी.।। |
| २१० | विवक्षितसिद्धि-र्मिथ्याभिनिवेशादिपातशक्त्यऽनुवेधान्न निर्वाणावसानफलाय सम्पद्यते । | ।।यो.बिं.२३३ टी.।। |
| २११ | विवेकस्य शमफलत्वादिति । | ।।यो.स.१७१ टी.।। |
| २१२ | विषं विरक्ता स्त्री । | ।।यो.श.६७ टी.।। |
| २१३ | व्यंसकवचनस्य महाऽनर्थहेतुत्वादिति । | ।।यो.बिं.२५ टी.।। |
| २१४ | व्यवहारतो ज्ञानं चरणरहितं स्यान् न पुनश्चरणं ज्ञानविकलं हेत्वभावात् । | ।।उप.मा.(सि) ४२३ टी.।। |
| २१५ | व्यवहारशुद्धिमन्तरेण गृहिधर्म्म इवाहारशुद्धिविनाभूतः सीदत्येव यतिधर्म्म इति । | ।।हित.४७८ टी.।। |

## श कार आदि

| क्रम | सुभाषितानि | ग्रन्थाः |
|---|---|---|
| २१६ | शतसहस्रलक्षम्भरित्वाद् भूभुजाम् । | ।।हित.३३६ टी.।। |
| २१७ | शास्त्रसद्भावः शासनाद् दुःखत्राणायोच्यते, तच्च जैनमेव । | ।।यो.बि.२१३ टी.।। |
| २१८ | शुद्धसमाचारा हि साधवः । | ।।यो.बि.४२ टी.।। |
| २१९ | शुद्धिकारणानां स्वकार्याव्यभिचारात् । | ।।यो.बि. ४१ टी.।। |
| २२० | शुभभावः शुद्धपुरुषकारबलोद्भव एव, उपदेशस्तु सत एवाभिव्यक्तिहेतुस्तस्येति । अनैकान्तिकभावश्च पचनखननयोरुपदेशस्य च, क्वचिदभावेऽपि भावाद्भावेऽपि चाभावा-ज्जलशुभभावयोरिति । | ।।यो.बि.३४६ टी.।। - |

## स कार आदि

| क्रम | सुभाषितानि | ग्रन्थाः |
|---|---|---|
| २२१ | संमार्गे प्रवर्तितव्यम्, सन्मार्गस्खलनाद्धि महतामप्यवस्तुता सम्पद्यत इति । | ।।उप.मा.(सि) ४५७ टी.।। |
| २२२ | सकलपुण्यारम्भपुण्याहमङ्गलरूपत्वात् प्राणिदयायाः । | ।।हित.५६ टी.।। |
| २२३ | सकललब्धिनिमित्तसाकारोपयोगत्वेन । | ।।यो.श.६५ टी.।। |
| २२४ | सङ्क्लिष्टचित्तविषं असंयमप्रवृत्तपुरुषं संसारमारेण मारयति, न वेषस्तं रक्षतीति । | ।।उप.मा.(सि) २० टी.।। |
| २२५ | सतां आर्यापवादः सर्वज्ञपरिभवः पुन-र्जिव्हाच्छेदाधिको मतः | ।।यो.स.११४।। |
| २२६ | सति धर्मिणि धर्माश्चानन्ता इति नीतिमद्वचो । | ।।यो.बिं.४६४ टी.।। |
| २२७ | सति ह्यहङ्कारे दूरस्थैव प्रायः प्राणिनां गुणश्रेणिः । | ।।हित.३६५ टी.।। |
| २२८ | सति हि समुत्ताने माने कौतुस्कुती विनयप्रवृत्तिः । | ।।हित.२२४ टी.।। |
| २२९ | सति हि विनयगुणे गौरवभाजः कलाः । | ।।हित.२२६ टी.।। |
| २३० | सदृशो हि भावः सदृशस्य हेतुर्भवति, यथा मृद् घटस्य । | ।।यो.बिं.२१६ टी.।। |
| २३१ | सद्धर्म्मानुरागस्यैव समस्तशस्तसन्ततिहेतुत्वात् । | ।।हित.१४० टी.।। |
| २३२ | समृद्धं हि राज्यमैन्द्रपदान्न परिहीयते । | ।।हित.३५ टी.।। |
| २३३ | सम्भृतसुगुप्तरत्नकरण्डप्राप्तितुल्या हि भिक्षवः । प्रथमसद्धर्मस्थानावाप्तिः । | ।।यो.श.१८ टी.।। |
| २३४ | सम्यक्त्वं तु मोक्षवृक्षस्य मूलबीजम् । | ।।हित.३४९ टी.।। |
| २३५ | सम्यक्प्रवृत्तिं च वाञ्छता ज्ञाने यत्नो विधेयः, ज्ञानशून्यस्य हि प्रवृत्ति - र्महतेऽनर्थाय । | ।।उप.मा.(सि) ३९६ टी.।। |
| २३६ | सम्यगाराधितो हि धर्म्मः सकलमपि संसृतिजालं लीलयैवोच्छिन्द्यात् । | ।।हित.१३९ टी.।। |

| क्रम | सुभाषितानि | ग्रन्थाः |
|---|---|---|
| २३७ | सम्यगासेवितसर्वविरतयो हि विमुच्यन्त एव भवोद्भवदु:खेभ्य इति । | ।।हित.४५१ टी.।। |
| २३८ | सम्यग्ज्ञानादिविकलेन न किञ्चिल्लिङ्गमात्रेण त्राणम् । | ।।उप.मा.(सि) ५२० टी.।। |
| २३९ | सम्परायाश्चिरकालार्जितमपि यतीनां चरित्रवित्तं हरन्ति । | ।।हित.४९१ टी.।। |
| २४० | सर्वत्र कारणशुद्धिपूर्वकत्वात्कार्यशुद्धिरिति । | ।।यो.बिं.५११ टी.।। |
| २४१ | सर्वत्र गुणप्रकर्षवान् स्तवार्हः । | ।।पंच सूत्रं - प्र.सू. टी.।। |
| २४२ | सर्वत्रः तुल्यवृत्तिः परं मुक्तावस्थाबीजमेतत् । | ।।यो.श.९५ टी.।। |
| २४३ | सर्वनयमयत्वाज्जिनमतस्येति । | ।।हित.१५१ टी.।। |
| २४४ | सर्वपापप्रारम्भाणां जीववधमूलत्वात् । | ।।हित.५६ टी.।। |
| २४५ | सर्वमपि यत् किञ्चिज्जिनशासने उपादेयत्वेनोक्तं तत् परमार्थहितमेव । | ।।हित.९ टी.।। |
| २४६ | सर्वसत्वसाधारणा मैत्री चेत् कर्तुं न पार्यते, तत् किं प्रत्युत तन्निन्दा विधेया ? | ।।हित.३४६ टी.।। |
| २४७ | सर्वे गुणा गुणवत्पारतन्त्र्यसाध्या । | ।।उप.मा.(सि) ३८१ टी.।। |
| २५८ | साधुधर्मस्य चित्रसमाधानसाध्यत्वात् । | ।।उप.मा.(सि) ३१८ टी.।। |
| २४९ | सानुबन्धाशुभकर्मण: सम्यक् प्रव्रज्याऽयोगात् । | ।।पंच सूत्रं - च.सू. टी.।। |
| २५० | सामान्येन फलपर्यवसानत्वाच्छास्त्रस्य । | ।।यो.स.५ टी.।। |
| २५१ | सामान्योपि क्षत्रियो वित्तार्थमभियुक्त: खड्गं दर्शयति । | ।।हित.३१० टी.।। |
| २५२ | सामायिकस्यैव प्रधान्येन मोक्षाङ्गता । | ।।यो.श.९१ टी.।। |
| २५३ | सिद्धिश्च प्रधानं फलं प्रव्रज्यापरिपालनस्य । आनुषङ्गिकं तु सुदेवत्वादि । | ।।पंच सूत्रं - प्र.सू. टी.।। |
| २५४ | सुप्रयुक्तस्य दम्भस्य ब्रह्माप्यन्तं न गच्छति । | ।।हित.५०६ टी.।। |
| २५५ | सुप्रसिद्धत्वं चाऽऽदौ साधुधर्मोपदेशस्याऽणुव्रतादिप्रदानकालविषयम्, अन्यथोक्त-विपर्यये दोषः । | ।।यो.श.२८ टी.।। |
| २५६ | सुप्राणिधानस्य फलसिद्धौ प्रधानाङ्गत्वात् । | ।।पंच सूत्रं - प्र.सू. टी.।। |
| २५७ | स्थानबहुमानेन तुल्यक्रियायामेवाऽऽज्ञाराधनविराधनाभ्यां कर्मक्षयादिविशेषात्। | ।।यो.श.७४ टी.।। |
| २५८ | स्वकार्यतात्पर्यपर्यवसितत्वात् प्रायश: पुंसाम् । | ।।हित.१३९ टी.।। |
| २५९ | स्वगत एव योग्यताभेदः सर्वत्र कार्यभेदनिबन्धनं प्रतिपत्तव्यमिति । | ।।यो.बिं.२७९ टी.।। |
| २६० | स्वभावत एव निस्तरङ्गमहोदधिकल्पस्यात्मनो विकल्परुपाः परिस्पन्दरुपाश्च वृत्तयः सर्वा अन्यसंयोगनिमित्ता एव । | ।।यो.बिं.३६५ टी.।। |
| २६१ | स्वभावसुकुमारश्च स्वाराध्यतया विपक्षपक्षीयैरपि समेत्य संसेव्यते एव । | ।।हित.१३ टी.।। |
| २६२ | स्वश्लाघापरनिन्दयो-र्जनिमृत्योरिव परस्परानुगतत्वात् । | ।।हित.३७८ टी.।। |
| २६३ | स्वसंवेद्यं सिद्धसुखमित्याप्तवादः । | ।।पंच सूत्रं - प.सू. टी.।। |
| २६४ | स्वामिनो द्रोहमशुभमिति । | ।।हित.३३५ टी.।। |

## ह कार आदि

| | | |
|---|---|---|
| २६५ | हेतुस्वरुपानुकारिण एव कार्यस्योपलम्भात् । | ।।यो.बिं.४६९ टी.।। |

## ज्ञा कार आदि

| | | |
|---|---|---|
| २६६ | ज्ञाततत्त्वस्य ऋद्धि-रस-सातगौरवेषु प्रतिबंधाभावात्, तद्वत: परमार्थतो ज्ञानशून्यत्वात् । | ।।उप.मा.(सि) ३२२ टी.।। |
| २६७ | ज्ञानाभ्युयोगस्य हि छद्मस्थै-र्यथावत् प्रथयितुमशक्यत्वात् । | ।।हित.७७ टी.।। |

# प.पू.आ. श्री विजय श्रेयांसप्रभसूरी

## प्रकाशितपुस्तका

### प्राकृत ग्रंथा:

| | | |
|---|---|---|
| १ | श्री भुवनभानु केवली चरियं (संशोधितम्) | रचयिता - अज्ञात |
| २ | श्री ज्ञानप्रकाश (संशोधितम्) | रचयिता - श्री जिनप्रभाचार्य |

### संस्कृत ग्रंथा:

| | | |
|---|---|---|
| ३ | नरवर्म चरित्रम् (संशोधितम्) | कर्ता - श्री विवेकसमुद्रोपाध्याय |
| ४ | कामदेव चरित्रम् (संशोधितम्) | कर्ता - आ.श्री मेरुतुंगसूरि |
| ५ | गुर्जर ग्रंथ सङ्ग्रहः (संशोधितम्) | - पूर्वाचार्यकृत (गुर्जरः) |
| ६ | भुवनभानुकेवली चरित्रम् | कर्ता - भवभावनाग्रन्थस्यः |
| ७ | हरिभद्र चरित्रम् | संपादक - प.पू.पं.प्र.सम्यगदर्शन वि.गणिः |
| ८ | श्री दान प्रकाश (सभाषांतर) | संपादक - प.पू.पं.प्र.सम्यगदर्शन वि.गणिः |
| ९ | श्री पञ्चाशत् पञ्चाशिका (पूर्वार्ध)(नवसर्जित) | रचयिता - प.पू.पं.प्र.सम्यगदर्शन वि.गणिः |
| १० | श्री सप्तविंशत् सप्तविंशिका (नवसर्जित) | रचयिता - प.पू.पं.प्र.सम्यगदर्शन वि.गणिः |
| ११ | पंचाशब्दष्टकानि (नवसर्जित) | रचयिता - प.पू.पं.प्र.सम्यगदर्शन वि.गणिः |
| १२ | सुभाषितसुरलता (नवसर्जित) | रचयिता - प.पू.पं.प्र.सम्यगदर्शन वि.गणिः |
| १३ | जयतिहुअणस्तोत्रम् | संपादक - प.पू.मुनि श्री धर्मतिलक वि. |
| १४ | प्रश्नपद्धति | संपादक - प.पू.मुनि श्री धर्मतिलक वि. |
| १५ | *अध्यात्म उपनिषद्* | संपादक - प.पू.मुनि श्री आत्मदर्शन वि. |

### गुर्जरग्रान्थाः

| | | |
|---|---|---|
| १६ | आत्माने ओळखो | व्या.- पू.आ.श्रीमद्विजय रामचंद्रसूरिश्वरजी म. |
| १७ | आत्मा | व्या.- पू.आ.श्रीमद्विजय रामचंद्रसूरिश्वरजी म. |
| १८ | मुक्तिनो राजमार्ग | व्या.- पू.आ.श्रीमद्विजय रामचंद्रसूरिश्वरजी म. |
| १९ | जैन कहो क्युं होवे जगत् गुरु | व्या.- पू.आ.श्रीमद्विजय रामचंद्रसूरिश्वरजी म. |
| २० | श्री जयानंद केवली | व्या.- पू.आ.श्रीमद्विजय रामचंद्रसूरिश्वरजी म. |
| २१ | जय शत्रुंजय | लेखक - प.पू.आ.श्री वि. मुक्तिप्रभसूरिश्वरजी म. |
| २२ | ५० पूजाओ (नवसर्जन) (भाग-१) | रचयिता - प.पू.पं.प्र.सम्यगदर्शन वि.गणिः |
| २३ | ५० पूजाओ (नवसर्जन) (भाग-२) | रचयिता - प.पू.पं.प्र.सम्यगदर्शन वि.गणिः |

द्ध प्रवचनकार

# रीश्वर महाराजानाम् संयमसुवर्णविसरे

## स्तकानां नामावली

| | | |
|---|---|---|
| २४ | प्रसंग गीतो पूजाओ (नवसर्जन) | रचयिता - प.पू.पं.प्र.सम्यगदर्शन वि.गणिः |
| २५ | हुं तो मांगु सम्यगदर्शन (प्रभु स्तवनो) (भाग-१) | रचयिता - प.पू.पं.प्र.सम्यगदर्शन वि.गणिः |
| २६ | हुं तो मांगु सम्यगदर्शन (प्रभु स्तवनो) (भाग-२) | रचयिता - प.पू.पं.प्र.सम्यगदर्शन वि.गणिः |
| २७ | हितपाथेय (हितशिक्षासंग्रह) (भाग-१) | लेखक - प.पू.आ.श्री श्रेयांसप्रभसूरिश्वरजी म. |
| २८ | हितपाथेय (हितशिक्षासंग्रह) (भाग-२) | लेखक - प.पू.आ.श्री श्रेयांसप्रभसूरिश्वरजी म. |
| २९ | बाल रामायण | संपादक - प.पू.पं.प्र.सम्यगदर्शन वि.गणिः |
| ३० | श्री ज्ञानविमल साहित्य संग्रह (स्तवन, थोय) | संपादक - प.पू.पं.प्र.सम्यगदर्शन वि.गणिः |
| ३१ | लईए श्री नवपद शरण | संपादक - प.पू.पं.प्र.सम्यगदर्शन वि.गणिः |
| ३२ | देववंदन माला | संपादक - प.पू.पं.प्र.सम्यगदर्शन वि.गणिः |
| ३३ | श्री ज्ञानपंचमी महापर्व | संपादक - प.पू.पं.प्र.सम्यगदर्शन वि.गणिः |
| ३४ | स्वाध्याय संजीवनी | संपादक - प.पू.पं.प्र.सम्यगदर्शन वि.गणिः |
| ३५ | पंच प्रतिक्रमण सूत्र (हिन्दी-अंग्रेजी) | संपादक - प.पू.पं.प्र.सम्यगदर्शन वि.गणिः |
| ३६ | जयानंद केवली चरित्र | संपादक - प.पू.पं.प्र.सम्यगदर्शन वि.गणिः |
| ३७ | चैत्री पूनम देववंदनमाला | संपादक - प.पू.पं.प्र.सम्यगदर्शन वि.गणिः |
| ३८ | गुरुपर्वोत्सव विशेषांक | प्रकाशक - स्मृतिमंदिर प्रकाशन |
| ३९ | महापर्वना पडघम (हिन्दी) | संपादक - प.पू.पं.प्र.सम्यगदर्शन वि.गणिः |
| ४० | बाल रामायण (हिन्दी) | संपादक - प.पू.पं.प्र.सम्यगदर्शन वि.गणिः |
| ४१ | सूरि रामनी ढळती सांज (अंग्रेजी) | संपादक - प.पू.पं.प्र.सम्यगदर्शन वि.गणिः |
| ४२ | धोध धर्म देशनानो (अंग्रेजी) | संपादक - प.पू.पं.प्र.सम्यगदर्शन वि.गणिः |
| ४३ | आचारांग सूत्र मूळ (भाग १) (प्राकृत) | संपादक - पू.सा. श्री ज्ञानरसाश्रीजी म. |
| ४४ | आचारांग सूत्र मूळ (भाग २) (प्राकृत) | संपादक - पू.सा. श्री ज्ञानरसाश्रीजी म. |
| ४५ | स्तुतितरंगिणी (गुर्जरः) | संपादक - पू.सा. श्री ज्ञानरसाश्रीजी म. |
| ४६-५७ | श्रेयःपद्मपरागस्वाध्याय (भाग १ थी १२) सार्थसूत्रो | संपादक - पू.सा. श्री नम्रगिराश्रीजी म. |

# एकादश अध्यात्म ग्रंथ उपनिषदानि

| | | |
|---|---|---|
| योगविंशिका | मुत्तूण लोगसन्नं, उड्ढूण य साहुसमयसब्भावं । | |
| | सम्मं पयट्टियव्वं, बुहेण मइनिउणबुद्धिए ॥१६॥ | (श्री हरिभद्रसूरयः) |
| योगशतकम् | एएसिं णियणियभूमियाए उचियं जमेत्थणुट्ठाणं । | |
| | आणामयसंयुक्तं तं सव्वं चेव योगो त्ति ॥२१॥ | (श्री हरिभद्रसूरयः) |
| योगदृष्टि समुच्चयः | प्राणेभ्योपि गुरु-र्धर्म, सत्यामस्यामसंशयम् । | |
| | प्राणांस्त्यजति धर्मार्थं, न धर्मं प्राणसङ्कटे ॥५८॥ | (श्री हरिभद्रसूरयः) |
| योगबिंदुः | औचित्यारम्भिणोऽक्षुद्राः, प्रेक्षावन्तः शुभाशयाः । | |
| | अवन्ध्यचेष्टाः कालज्ञा, योगधर्माधिकारिणः ॥२४४॥ | (श्री हरिभद्रसूरयः) |
| पंचसूत्रम् | सया आणागाहगे सिआ, सया आणाभावगे सिआ, | |
| | सया आणापरतंते सिआ, आणा हि मोहविसपरममंतो, | |
| | जलं रोसाइजलणस्स कम्मवाहि-तिगिच्छासत्थं, | |
| | कप्पपायवो सिवफलस्स ॥२ सूत्रम् ॥ | ( श्री चिरंतनाचार्यः) |
| धर्मरत्न प्रकरणम् | गिहवासं पासं पिव मन्नंतो वसइ दुक्खिओ तंमि । | |
| | चारित्रमोहणिज्जं निज्जिणिउं उज्जमं कुणइ ॥६॥ | (श्री शान्तिसूरि महा.) |
| उपदेशमाला | जं जं समयं जीवो, आविसई जेण जेण भावेणं । | |
| | सो तंमि तंमि समए, सुहासुहं बंधए कम्मं ॥२३॥ | (श्री धर्मदासगणिः) |
| हितोपदेशः | उवयारपरो वि नरो जो न मुणइ सम्ममुचियमाचरिउं । | |
| | सलहिज्जइ सो न जणे ता मुणिऊणं कुणइ उचियं ॥२७०॥ | (श्री प्रभानन्दसूरि महा.) |
| अध्यात्मसारः | परिणामाच्च तापाच्च संस्काराच्च बुधै-र्मतम् । | |
| | गुणवृत्तिविरोधाच्च दुःखं पुण्यभवं सुखम् ॥६४॥ | (उपा.यशोविजय गणि.) |
| ललितविस्तरा | भवनिर्वेदद्वारेणार्थतो भगवद्बहुमानादेव | |
| | विशिष्टकर्म्मक्षयोपशमभावादभयादिधर्मसिद्धेः, | |
| | तद्व्यतिरिकेण नैःश्रेयसधर्म्मासम्भवाद्, | |
| | भगवंत एव तया तया सत्त्वकल्याणहेतवः ॥१॥ | (श्री हरिभद्रसूरयः) |
| संबोध प्रकरणम् | त्थीसंगरुवपासण-पभिइसव्वं मुणीण पडिसिद्धं । | |
| | अत्तहियसुविहियाण बंभं तणुभूसणं परमं ॥५८४॥ | (श्री हरिभद्रसूरयः) |

Printed By : ICONCEPT # 09324 979 888 • 09322 979 888